टी·
राम

॥ ॥ श्रीकृष्णायनमः॥ ॥ अध्यास्ते यः सर्वकार्वर्द्दृशब्दप्रगोचरो वचसः॥ अहमिति संविद्विषयः पुरुषः
स परः पुरातनो जयति॥ अभीष्टदेवतानमस्काराद्युपनीतमदृष्टं हि विघ्नापरनामकसाध्यप्रतिबंधकाधर्मंति
रोधानद्वारा प्रारिप्सितपरिसमापयतीति प्रामाणिकमतो निष्प्रत्यूहप्रारिप्सितपरिसमाप्तिहेतुस्वेष्टदेवता
संकीर्त्तनाद्विशिष्टादृष्टमुत्पादयिष्युर्ग्रंथकारः प्रथमं पद्यं निबबंध·प्रस्येति·हे धीराः स भगवान् सेव्य
तामाराध्यतां धैर्यशालिन एव सेवितुं शक्नुवंतीति तानेव संबोधयति प्रकृतत्वाद्गुणाभिर्हितेष्टुभिः सक
यस्य गुणा मैत्रीमर्यादादयोऽणिमादयो वा अनघा निष्पापा रागाद्यसंवलिता इति यावत्तायहा अत्रैनघाहु
घाः तथा च धरणिः अनघोऽपापहृद्ययोरिति। गुण्यंते अभ्यस्यंत इति गुणाः गुणा आमंत्रणे कर्मणि घञ्य
स्याकिंभूतस्य ज्ञानदयासिंधोः ज्ञानं समस्तविषयावबोधः दृष्टं स्वार्थमनपेक्ष्य परदुःखप्रहाणेच्छा दयात
योरंबुतुल्ययोः सिंधोरिव सिंधोरिति निरूपकताभ्यां सिंधुरिव सिंधुः प्रकृत्यादित्वाद्वातृतीयांतेति येति योग
विभागात्समास इति तु सर्वधरादयः सिंधुशब्दोत्र विपुलाधारत्वादुपचरितः सिंधुसाम्यमाह अगाधस्या

राम
२

नवच्छिन्नमहिम्नोऽन्यैरनधिगतज्ञानपारत्वादपरिच्छेद्यगांभीर्यस्य वाः स किंभूतः परहितापादनेषु नास्ति क्षयो
विरामो यस्येत्यक्षयः मरणादिरहित्यात् ह्यफलाधीनैव प्रेक्षावत्प्रवृत्तिरत आह श्रियै चेत्यादि श्रीरत्र त्रिव
र्गसंपत्तिः तां प्राप्तुं क्रियार्थोपपदस्य चेत्यादिना चतुर्थी तथा च व्याडिः लक्ष्मीसरस्वतीधीत्रिवर्गसंपद्विभूति
शोभासु उपकरणवेशरचनाविधासु च श्रीरिति प्रथितेति। अमृताय मोक्षाय च चकारद्वयं तु भयपक्षावान्य
द्योतनार्थं भोगेच्छुभिः श्रियै मुमुक्षुभिर्मोक्षायेत्यर्थः एतेन हिताहितज्ञो हितैषीईशिता चातः सेव्यो हीति वि
शेषणानामभिप्रायः। समुद्रपक्षे समिंधुः समुद्रः सेव्यतां स कः यस्यागाधस्यात्तलस्पर्शस्याक्षयस्य सदा परि
पूर्णस्यास्य विल्लोः क्षयस्य निवासस्य वा गुणा अनघा रत्नादिमत्त्वान्नैर्मल्यादयः श्रियै लक्ष्म्यै अमृताय पीयू
षाय च सिंधुरपि सुरासुरैर्लक्ष्म्यै सुधायै च सेवितः सेवतिरत्र पक्षेऽनुशीलनार्थः यथा श्रियं सेवत इति अत्रा
नुक्तोऽपि श्लाघ्यलक्षणोऽर्थो ज्ञानदयादिभिः स्फुटं प्रतीयते। न च नेयतादोषः प्रस्तुतप्रसादेनामाथ्र्ये गुण एवा
यं यदुक्तं सरस्वतीकंठाभरणे यत्तु प्राकृष्यमैर्थस्य प्रसादः सोऽभिधीयत इति यथा अपमुदयति मुद्रामंजन



अ॰ टी॰
२

ःपद्मिनीनामित्यादावनुक्तोपिसूर्यउदयतिनाःपद्ममुद्राभंजनत्वादिनाचलक्ष्यते।यद्यपिकाव्यप्रदीपेमुख्यार्थ
हतिनाम्नोदोषस्यायमुदयतिमुद्राभंजनइत्युदाहरणमुपन्यस्तंतथापिमिरत्तुरोधमुख्यपदार्थाभावेमु
ख्यार्थहतिर्दोषइत्यवधेयं।इहतुवृक्षादिपदोल्लेखेकृतेदक्षिणपथपथिकसार्थानामनुपादेयतास्यात्
कृष्णादिपदोद्देशेतुतत्तत्कालवहलितमदोदुराणाबौद्धानामित्युभयसाधारण्येनोपादेयतार्थमुख्यानुद्दे
शोनदोषाय।अन्येत्वाहुः।क्वचिद्विशेषणमपिविशेष्यप्रतिपत्तिकरंयथानिधानगर्भामिवसागरांबरामिति
इहापिज्ञानदयासिंध्वादिविशेषणेनविशेष्यप्रतिपत्तिरित्यदोषः।श्लिष्टरूपकाख्योयमलंकारः॥अभि
धेयप्रयोजनानभिधानेप्रेक्षावत्प्रवृत्तेःसंप्रतिस्वप्रवृत्तिप्रयोजनंशास्त्रप्रयोजनंचसाभिधेयमाहस
माहृत्येत्यादिःमयानामलिंगानुशासनंशास्त्रमुच्यतेणमप्रह्वत्वेशब्देचेत्यनुसारात्नम्यतेभिधीयतेर्थो
नेनेतिनामायद्वाम्नायतेभ्यस्यतेइदमितिनामस्वर्गादिशब्दः।म्नाअभ्यासेसर्वधातुभ्योमनिन्इत्येषोदरादित्वा
त्प्रकृतिमलोपः।लिंग्यतेङीपूटाबादिभिर्ज्ञायतइदमितिलिंगंस्त्रीनपुंसकंनामलिंगेअनुशिष्यतेवु

राम
२

त्याद्येते। अनेनात्र वेत्तीति नामलिंगानुशासनमिदं शास्त्रं करणाधिकरणयोश्चेति ल्युट्। किं कृत्वा। अन्येषां व्याडिवररुचि
कात्यायनादीनां नामानुशासनानि लिंगानुशासनानि च तंत्राणि समाहृत्य एकीकृत्य एतेन स्वकपोलकल्पि
तत्वनिरासः। बहुवचनेन तंत्राणां भूयस्त्वमभिप्रेतमत एव सर्वोत्कर्षात् संपूर्णमिदं गुणैः संपन्नमिति यावत्तय
श्चासंपूर्णानीत्ययं काव्यस्येति यतस्त्रिकाण्डोत्पलिन्यादीनि नाममात्रतंत्राणि व्याडिवररुच्यादिप्रणीतानि तु लिंग
मात्रतंत्राणि। यद्वा वर्गैः संपूर्णं पूर्वं व्याख्याने तु वर्गैरित्युपलक्षणं तृतीया वर्गैर्लक्षितमित्यर्थः। वर्गाः प्रक
रणं प्रकरणवच्च सुखग्राह्यं भवति। ननु तर्हि कात्यायनादय एवं संतु किमनेनेति वर्गविशेषणमाह। संक्षि
प्तैः प्रतिसंस्कृतैरिति। स्तोकेन भूयोभिधानं संक्षेपः सूक्तिरूपेण प्रतिसंस्कारः। यद्वा हरिप्रियावत् प्रतिसं
स्कारः। अयमर्थः हरिरिति विष्णोर्नाम नोक्तं लक्ष्मीपर्याये तु हरिप्रियेत्युक्तं तेन हरिरर्थस्य नामेत्युक्तं भव
ति। पूर्वटीकाकृतस्तु संक्षेपो सारत्यागः प्रतिसंस्कारः सतो गुणान्तराधानमित्याहुः। क्षीरस्वामी तु संक्षिप्तै
र्लघूकृतैः प्रतिसंस्कृतैः प्रत्येकं परिपाटीस्थापनादिना कृतोत्कर्षैरित्याह। एतदभिधायकं शास्त्रं नाम

2

पुं १

लिंगोत्वमिधेयेताभ्यांसहास्यशास्त्रस्यवाच्यवाचकलक्षणःसंबंधःप्रयोजनंतुनामलिंगानुशासनपदोपा
त्तंसदसद्विवेकनैपुण्यं॥ध्वनिनामलिंगाभिधानेग्रंथगौरवमपाकुर्वन्लिंगज्ञानोपायमाहप्रायेति॰प्राय
शोबाहुल्येनरूपभेदोयथाक्रमंस्त्रीपुंसकानांङ्याप्विसर्गविंदुकृतस्तेनस्त्रीनपुंसकंज्ञेयंयथाकौमोदकी
गदाखड्गोनंदकःसलिलंकमलंजलं॰यथावालक्ष्मीःपद्मालयापद्मापिनाकोऽजगवंधनुःसवायंवाचि
द्विशेषणपदस्यसर्वनामपदस्यापिनिर्णायकःआद्योयथाकपोलौतत्परोहनूरिति॰अत्रतत्परइतिवि
शेषणाद्धनोःपुंस्त्वंप्रतीयतेद्वितीयोयथाकुतूः कृत्तेःस्नेहपात्रंसैवाल्पाकुतुपःपुमानितिसेत्युक्तेःकु
त्वाःस्त्रीत्वं॥प्रायशइतिकिंसुधर्मारूपभेदात्स्त्रीपुंलिंगोमाभूत्स्त्रीलिंगएवयथास्यात्॥निश्चितलिं
गेनाविप्रकर्षःसाहचर्यंयत्ररूपभेदोनास्तितत्रानेनापितत्कुत्रचित्ज्ञेयंयथाअश्वयुगश्विनीभानुः
करोवियद्विष्णुपदं॰अत्राश्वयुग्भानुवियतीतिसाहचर्यात्स्त्रीपुंनपुंसकानिअन्यथाकाकुत्स्थेनप्रसूतीनांस्त्री
त्वदर्शनात्स्त्रीत्वमपिभानोःशंक्येत॰प्रायशइति॥साहचर्येणापिसंवद्धं।मध्येचकारात्॥तेनावदुर्घाटा

नपुं १

राम
२

ह्कादिकेत्यत्रावयोः स्त्रीत्वं न स्यात्तात्तद्विशेषविधेः तस्य स्त्रीनपुंसकस्य विशेषोपादानादधिकचित्तज्ञानं यत्रा
पभेदसाहचर्येनस्तः यथाद्यो दिवौ द्वे स्त्रियौ नेमिः स्त्रीस्यात्प्रधिः पुमानूरोचिः शोचिरुभे क्लीबे इति प्राय शब्द
निवकल्पार्थो दित्यादिनामसु ॥ द्वंद्वैकशेषयो रूपभेदकृत लिंगनिर्णयाभावाल्लिंगज्ञानोपायं संकरदोषप
रिहारं चाह भेदेति अत्रामरकोषे भिन्नलिंगानां लिंगभेदमाख्यातुं द्वंद्व एकशेष श्च न कृतः द्वंद्वो यथा देवता
देवतामरा इति न कृतं एकशेषो यथा खं नभः श्रावणो नभा इत्यत्र खश्रावणौ तु नभसौ इति न कृतं एकलिंगा
नां तु तौ कृतावेव यथा स्वर्गनाकत्रिदिवत्रिदशालयाः अजाविष्णुहरछागा इति । ननु भिन्नलिंगानामपि नो
कृतौ यथा स्मरो यक्षराट् कोपं धर्वं किन्नरा इति । माता पितरौ पितराभवित्यत आह अनुक्तानामिति स्थानांतरेऽ
निर्दिष्टानां न कृतौ निर्दिष्टानां तु कृतावेव इह तु स्थानांतरनिर्देशो यथा स्त्रियां बहुष्वप्सरसः नैरतो यातु
रक्षसी जनयित्री प्रसूर्माता ताता तस्य जनकः पितेति । ननु रत्नकोषादिवत् स्त्रीपुंनपुंसककांडविधानेनैव
कथनमुचितं तथासति रूपभेदसाहचर्यादिप्रतिपत्तिगौरवमपि न स्यात्तत्किमिति लिंगसंकरः क्रिय

तद्दूष्यत आह क्रमादृत इति क्रमं विना संकरो न कृतः क्रमात्तु रोधात्तु कृत इति तात्पर्यं संकरस्तु भिन्नलिंगानां
मिश्रत्वरूपः क्रमः प्रक्रमः प्रस्ताव इति यावत् यथा स्वर्गप्रक्रमे द्योदिवौ भिन्नलिंगे अर्थवस्थ्य वाच्यत्वात्कथि
ते विष्णुप्रस्तावे च लक्ष्मीनामेति। यद्वा क्रमं विना भिन्नलिंगानां संकरो ध्या मिश्रभावो न कृतः ४ क्रमेण तु कृत
एव यथा सुरलोक इत्यंतेन पुंलिंगशब्दान्निरूप्य द्योदिवाविति स्त्रीलिंगशब्दौ तु स्कालोकौ त्रिविष्टपमुक्तं एवं
जन्तुर्जंभनजन्मानीति क्लीवलिंगान्निरूप्य जनिरुत्पत्तिरिति स्त्रीलिंगाणु स्कात्तत्र व शब्दः पुंलिंग उक्तः इ
हस्तु दीरस्वीमित्कृत व्याख्या विशेषोऽग्रे ग्रंथगौरवभयान्न लिखितः॥ विशेष्यविधावपि लाघवार्थं परिभाषा
माह त्रिलिंग्यामित्यादिना यावत् लिंगानांस माहार स्त्रिलिंगीति तत्र त्रिष्विति पदं ज्ञेयमिति परिभाष्यते यथा
मंडलं त्रिषु। स्त्रीपुंसौ मिथुनं तत्र द्वयोरिति पदं ज्ञेयं यथा द्वयोर्नीलकीलौ। द्वयोरिति द्विशब्दप्रयोगोपलक्ष
णं तेन द्विहीने प्रसवे सर्वं द्व्यहीने कुङ्कुंदरे इत्याद्युपपद्यते। तथा निषिद्धं लिंगं यस्य तत् निषिद्धलिंगं पदं
अर्यते गम्यते ज्ञायते शब्दोऽनेनेत्यर्थः प्रकृते लिंगं तच्छेषार्थं शेषलिंगकं ज्ञेयमित्यर्थः॥ विशेषनिषेधे

शेषाभ्यनुज्ञानात् यथा वज्रमस्त्रीति स्त्रीलिंगनिषेधे विद्यमानस्य पुंनपुंसकस्य विधिः। तथा तु शब्दांतेयस्य तत्त्वं
अथ आदिर्यस्य तदथादि त्वं तं वा अथादिवसमाहारः त्वंतमथादि च नामपदं लिंगपदं च पूर्वेन भजन्ते परेण हत
त्वसंबंध इत्यर्थः। तत्र नामपदं नगरी त्वमरावती त्वं वीथ श्री इं त्वरितमिति च। लिंगपदं यथा पुंसि त्वंत हिरण्य
वारणं शस्तं चाथ त्रिषु द्रव्य इति। अथ शब्दोत्रोपलक्षणं तेनाथो शब्दोपि ग्राह्यः यथा तु क्रोशोस्त्र्यथो हसः न्याय
सिद्धं चैतत् तु ना पूर्वस्मात् विशेषयोजनात् अथ शब्देन चार्थांतरारंभात्। ननु कथं तर्हि पुंस्येवांधुः प्रहीः कूप उ
दपानं तु पुंसि वेति। उच्यते अत्र तु शब्देन नियमितं पुंस्त्वमेवायव च्छिद्यते न तु नामयतः कूपः पुंलिंग एव
उदपानं त्वन्यलिंगमेवान्यत्र च दर्शनादित्यदोषः॥ इह त्रैलोक्ये अभिधेये विशिष्टतया सृष्टिप्राथम्येन स्वः
स्वर्गवर्गोभिधीयते स्वरिति अव्ययमेव संज्ञा शब्दानां सदसदर्थेन यथा कथंचिद्व्युत्पत्तिः कार्या तेलपायि
कावदिति भाष्यमेवमन्यत्रापि ज्ञेयं। स्वः शब्दोपतापयोः स्वरति शब्दायते अन्येभ्योपि दृश्यत इति विच् गुणे
रपरत्वं च स्वरादित्वादव्ययत्वं अग्न्यादयो माघुप इति मुः पृक् स्वः शब्दस्य रेफं न त्वादुत्वं न भवति। अतो रोर

८

प्लुतादप्लुतइत्यत्ररुसंवंधिरेफस्योत्वविधानात्॥ स्वर्गेपरेचलोकेस्वरित्यनेकार्थवर्गोपदिष्टस्यापियदत्रपर्याये
कथनंतत्प्रचुरप्रयोगार्थंतथाचायमेववक्ष्यतेभूरिप्रयोगायेयेषुपर्यायेष्वपितेषुतइति अतएवास्यवर्ग
कथितस्यापिस्वःशब्दस्यात्रकथनं आदावुपादानंतुस्वःशब्दस्यमंगलार्थंमहाव्याहृतिशब्दार्थत्वविशिष्टत्वात्तस्य
अव्ययमित्यव्यक्तलिंगंतदुक्तंसदृशंत्रिषुलिंगेषुसर्वासुचविभक्तिषुवचनेषुचसर्वेषुयन्नव्येतितदव्य
यमिति कथंतर्हिरम्यस्वरितिनविशेषणस्यक्लीवत्वंतथाचसनातनेस्वर्ह्रूपिमेनमनोहरंत्वसतत्पषह्लो
चनयारहितंतयेति उच्यतेअत्रलोकाश्रयत्वाल्लिंगस्येतितथाचवामनः द्विगुरपिपात्राद्यंतः क्रियाव्य
यविशेषणंचैकइति कौमुदीकारस्त्वाहइहनामलिंगानुशासनेऽलिंगस्याप्याद्येकथनंमंगलार्थं
लिंगादिकृतविकाराभावमेतद्विशेषणस्यचनपुंसकत्वंसूचयितुंवक्ष्यतिहिक्लीवेक्रियाव्ययानांभे
दकानीतियद्यपियन्नदुःखेनसंभिन्नंनचग्रस्तमनंतरं अभिलाषोपनीतंचतत्सुखंस्वःपदास्पदमि
तिश्रुतेः ब्रह्मज्ञानानंदपरत्वादत्रास्यगौणत्वंतथापिलाक्षणिका अपिमुख्यतुल्यकक्षाः प्रचुरप्रयोगा

णः प्राचीनाचार्यैर्निबध्यंतेपदाह शब्दार्थवकारः। वक्ष्यमाणमस्वतंत्रत्वात्काव्यादिषु चदर्शनात्मुख्यवत्प्र
सिद्धत्वात्प्रथमाल्लक्षणाश्रितेतिभ्रथवाने कार्थएवायमत्रापिशिष्टैरिष्टत्वात्। अन्यते स्थीयते स्मिन्निव्य
गः स्थानं त्र्यजगतिस्थानार्जनेषु हेलश्चेतिघञ् चजोः कुधिण्यतोरिति कुत्वं शोभनो गः स्वर्गः दुतिप्रादि
समासः। कं सुखं न कमकं दुःखं तन्नास्त्यत्रेति नाकः नञोऽस्त्यर्थानां वक्तव्यो वा चोत्तरपदलोपश्चेति समा
सोत्तरपदलोपो नभ्राण्नपादिति प्रकृतिभावः विद्यमानविरिंचिवर्गः। प्रधानेन व्यपदेशा भवंतीति त्रयो ब्र
ह्मविष्णुरुद्रा दीव्यंत्यत्र त्रिदशा दीव्यंत्यत्रेतिवा त्रिदिवः दिवेर्घञर्थे कविधानमिति कः यद्यपि घञर्थे कवि
धानेस्थास्नापाव्यधिहनियुध्यर्थमितिपरिगणनं वृत्तौ कृतं तथापि संभवोदाहरणमेवतत्। एषोद्वरादित्वा
द्दृशशब्दलोप इति सर्वानंदादयः। वयं तु मूलविभुजादित्वात्कप्रत्ययमेवयुक्तं मन्यामहे तथा च तत्रैव स्व
त्रेभाषावृत्तौ त्रिदिव इत्युदाहृतं। क्षीरस्वामी तु तृतीया द्यौर्लोकस्त्रिदिवः वृत्तिविषये दिवो के सद्ग इति वत्व दिव
शब्दोऽदंतः पूरणार्थाधिकं च त्रिशब्दस्य वृत्तौ त्रिभागवदित्याह। त्रिदशानामालयस्त्रिदशालयः। सुराणां लो

5

.दी
८

कइति षष्ठीसमासः। त्रिदशालयाद्दयः सुरसदनां द्युपलक्षकाः एवं यौगिकेषु सर्वत्रोन्नेयं। दीव्यंत्यत्रेति द्यौः। दिवेर्डोरि
तिड्यो प्रत्ययः टिलोपे गोशब्दवद्रूपं। द्युरिति स्त्री द्यु अभिगमने कर्मण्यो णादिको डो प्रत्यय इत्याह। दीव्यंत्यस्यामिति
द्यौः। वाहुलकाद्दिवेर्डिविः। द्विपि तु क्लोरित्यूवू स्यात्पदांते दिव उदित्युत्वे द्युभ्यां द्युभिरिति भवति। हे स्त्रिया विति
द्विवचने नैनैवह्यथैलाभे हेइति पुनरुक्तिरवधारणफला। एते स्त्रीलिंगे एवेति भरंचनारायणमेव चादौ स्वतः सुतौ है
ज्ञनयां वस्रुवेत्यादिवडुक्तार्थस्यापि द्विशब्दस्यापि प्रयोगइति वा अन्यत्र तु विशेषविशेषविध्यादिकमनियतमेवे
ति भावः। तेनां कुशोऽस्त्री शृणिः स्त्रियामिति शृणिप्रभृतीनां पुंस्त्वादिकमप्युपपद्यते अत एवारक्तमग्नमवमत्य
शृणिं शितायमिति माघः। एवं क्लीवे त्रिपिष्टपमिति रूपभेदानियमार्थं स्वर्गपर्यायः पुंसीति वक्ष्यति तत्र विशेषवि
घवाधितइति वक्ष्यते तदर्थमिदमिति वा एवमन्यत्रापि तत्तत्रोह्यं। त्रिदशानां पिष्टयं त्रिपिष्टपमिति पृषोदरादि
त्वाद्दशशब्दलोपः त्रयाणां पिष्टपमिति वा भूर्भुवः स्वरिति श्रुतेः तृतीयं पिष्टपं त्रिपिष्टपं पूरणप्रत्ययस्य तद्धितेग
तार्थत्वान्न प्रयुज्यते विभागवदिति तु मधुमाधवी इह क्षांदसा विष्टान् पातीति विष्टपमिति निरुक्तात्वाद्युत्याद्यपि

राम
८

विष्टयमितितृतीयंविष्टपंत्रिविष्टयमितिपकारपाठःप्राच्यानांग्रामादिकइत्याद्युक्तेःनभोविष्टपंद्यौगौर्नाकएस्त्रि
स्त्रापिसुरालयइतिरत्नमालाद्दावपिदर्शनादितिकौमुदी॥विष्टपपिष्टपविशिपोलपाद्युणरोकपेविशतेःपत्वंप्र
त्ययस्यतुट्‌वृत्वादिकार्यंपिष्टपंभुवनंत्रिपिष्टपंस्वर्गइतिदर्शनात्‌त्रिपिष्टपंत्रिविष्टपंचेतितुवयंतथावपिष्टपोवि
ष्टपोऽस्त्रीभुवनेचनपुंसकमित्यमरमालोक्तेःमर्त्यपातालापेक्षयातृतीयंपिष्टपंभुवनंत्रिपिष्टपमितिराजदे
वःएवंचशक्रभवनफलोदयावरोहोईलोकाद्युयोग्याह्याःस्वरादिनवभामानिस्वर्गस्य॥अमराइत्यादिमरणंमरः
मृङ्प्राणत्यागेबहुलवचनाज्ञावेऽन्तदोरपुंसप्रोनास्तीत्यमराःएतत्वनत्रोजरमरमित्रमृताइत्यत्रवृत्तौव्याख्या
तंनाकवत्समासोत्तरपदलोपोनम्रियंतेवाऽमराःपचाद्यच्॥सदायुवत्वान्निरस्ताजरायैस्तेनिर्जराःप्रादिभ्योधा
तुजस्येतिवहुव्रीहिर्वावोत्तरपदलोपश्चेति॥निष्क्रांताजरायाइतिवाअजादेरेकदेशविकृतत्वानन्यत्वाद्वाजरसादेशः
निर्जरोनिर्जरसावित्यादितेहिसर्वदापंचविंशतिवर्षदेशीयाःतथाचरामायणेस्त्रियंविंदतिसोमित्रेपंचविंशति
वर्षवदिति॥दीव्यंतीतिदेवाःक्वचिदपवादविषयेऽप्युत्सर्गोभिनिविशतइतिमेघवत्पचाद्यच्॥जन्मसत्ताविना

टी
१

शाख्यास्तिस्रो दशा एषामिति त्रिदशाः न तु मनुष्याणामिव बाल्ययौवनवार्द्धकाख्यास्तिस्रो दशाः निर्जरत्वात्तस्य द्वात्
तीयायौवनाख्या दशा सदैषामिति त्रिदशाः त्रिपिष्टपवत्त्रिशब्दस्यद्वतीयार्थता त्रीन्तापानूदशं तिप चाद्य चिष्ट
षोदरादित्वान्नलोपे त्रिदश इति राजदेवः ॥ विबुध्यंते न स्वपंतीति विबुधाः विशिष्टं बुध्यंत इति वा इगुपधत्वात्कः ॥ सु
राः सुरप्र सवैश्वर्य योः पूर्ववत्कः ऐश्वर्ययुक्ता इत्यर्थः क्षीरोदोत्था सुरैषामस्तीति सुरा इत्यागमः अशी आद्य च
सुरापरिग्रहाद्धासुराः तथा च रामायणे सुरापरिग्रहाद्देवाः सुराख्या इति विश्रुता ॥ अपरिग्रहणात्तस्या दैत्ये या
श्चासुरास्तथा ॥ शोभनममावास्यादि पर्वामीषां शोभनं चरितमेषां शोभनानि पर्वाण्यंगुल्यादिग्रंथयो येषामि
ति वा सुपर्वाणः ४ अविरतत्वाच्छोभनं पर्वउत्सवएषामिति वा ॥ शोभनं मन एषां सुष्ठु मन्यंते वा असु मनसः ॥ त्रिदि
वे स्वर्गे ईशते त्रिदिवेशाः ४ इगुपधत्वात्कः ॥ दिवि द्यौ ओको निवास एषां दिवौकसः दिवशब्दोऽदंतोप्यस्ति तेन दिवौका
स इति च तथा च त्रिकांडशेषः सदरः सैरिभः शक्रभवनं खं दिवं नभ इति तथा च बुद्धचरिते नशोभते तेन हि नो वि
ना पुरं मरुत्वतां दृत्रवधे यथा दिवमिति हलंतस्यैव पृषोदरादित्वाडुत्वाभावे दिवौकस इति हड्डचंद्रः दिव उ

त्रि ४

२३

सुरेति

राम
७

दित्यत्रतुशब्दपरविप्रतिषेधादुकारस्य यणादेशे दिवौकस इति तु मैत्रेयः अचः परस्मिन्निति स्थानिवत्त्वेनापि ने
कारस्य यणादेशः सकृद्गत परिभाषया निरासादिति गोवर्द्धनस्त्वाह हलन्तत्वाभावः संज्ञाविषयत्वादिति
।स्या द्दिवौका दिवौकाश्च देवेवापीह पाक्षिणी तिरंति देवः केयुभयमिति कनिन्नयुत्पषीत्यत्र बहुलवचना
त् केवलादपि दिवः कनि निष्पन्नो दिवौकस इति तु दिव औदित्यत्र भागवृत्तिः । नत्रोदात्तोऽडिति रिति शाक
टायनेः । तेन अदितिः स्यादिक्यरादिति डीषंतादितौ शवात्तस्त्रीभ्यो ढक् आदितेयाः अडीषंता द्दित्य दित्ये
ति ण्यः स्यात् । दिविसीदंतिव र्तंत इति सत्त्वस्थ द्दिषेत्यादिना क्विप् पूर्वपदस्य डेरलुग्वक्तव्य इत्यलुक् सुषामा
दिषु चेति षत्वं दिविषदो देवाः तत्पुरुषे कृतिबहुलमिति भाविबहुलवचनात्तत्कि तेन मनस्तु येन घुष
दान्यषी यतेति माघः । लिख्यंते गण्यंते ध्यानार्थं चित्रादौ लिख्यंते वा लेखाः अकर्त्तरीत्यादिना कर्मणि घञ्
वा हस्तपादेषु तिस्रो लेखा एषां संतीति वा प्रशंसायामर्श आद्यच् । नंदता इति नंद्यादित्वाल्ल्युः अदितेर्नंदना राम
अदितिनंदनाः कृद्योगा च षष्ठी समस्यत इति वक्तव्यमिति समासः । अदितेरयत्यानि दित्यदित्येत्यादिना ण्य आ

दित्याः। त्रनामा स्वर्गोऽदितिर्वासुरादिः तत्र ततो वा भवंतीति अत्र पूर्वाद्भवतेर्मितद्र्वादिभ्य उपसंख्यानमिति डुः उपप
दमासः क्विपि तु त्रिभुव इत्यन्ये। अविद्यमानः स्वप्नो निद्रा एषामिति अस्वप्नाः। अमर्त्या इति नञ्समासः न म्रि
यंते ऽमर्त्या इति वा हसिमृग्रिण्वाऽमिदमिलूपूधुर्विभ्यस्तन्निति तन् अमर्तस्तनो नवसूरमर्त्ययविष्ठेभ्यः स्वार्थे
यत्। अमृतमेषामन्नमेषामिति अमृतांधसः सांताः। वर्हिरग्निर्मुखमेषां वर्हिर्मुखाः तथा च मंत्रः अग्नौ प्रास्ता
हुतिः सम्यगादित्यमुपतिष्ठत इति। क्रतुं भुंजतेऽन्येभ्योपि दृश्यत इति क्विप् क्रतुभुजः। गीरेव निग्रहा
नुग्रहसमर्था वाणोऽस्त्रमेषां गीरं वनंते याचंते स्तुतिप्रियत्वादिति वा गीर्वाणाः। दानवा अरय एषामिति दा
नवानामरयो वा दानवारयः। प्रशस्तं वृंदं रूपमेषामिति शृंगवृंदाभ्यामारकन् वृंदारकाः। देवताशब्दात्
स्वार्थे प्रज्ञाद्यणि दैवतानि विशेषविधेः पुंस्त्वरूपभेदात् क्लीवत्वं तत्र प्रचुरतरप्रयोगं। देवशब्दात् स्वार्थे
तल् तलि स्त्रीलिंगवचनेन कर्तव्यमिति स्त्रीत्वं रूपभेदाद् देवस्त्रीत्वे लब्धे स्त्रियामिति वहुवचनांतपुंलिंगाशं
कानिरासार्थं। पुंसि सर्वत्र जातौ कामचार इति वहुवचनमेवमन्यत्रापि। षड्विंशतिर्नामानि सामान्येन दे

वतायाः॥ आदित्येत्यादि आदित्यविश्वादयः प्रत्येकं गणदेवताः संघचारिणो देवाः आदित्या द्वादश प्रोक्ता वि
श्वेदेवा दश स्मृताः वसवश्चाष्टसंख्याताः षट्त्रिंशत्तुषिता मताः॥ आभास्वराश्चतुःषष्टिर्वाताः पंचाशदूनकाः॥ म
हाराजिकनामानो द्वेशते विंशतिस्तथा॥ साध्या द्वादश विख्याता रुद्राश्चैकादश स्मृताः अमीषामेकत्वमपि
समुदायेषु हि वृत्ताः शब्दा अवयवेष्वपि वर्त्तन्त इति न्यायात् अदितेरपत्यार्थे दित्यदित्येत्यादिना ण्यः आदि
त्यः॥ विश प्रवेशने अशूप्रुषिलटिकणिखटिविशिभ्यः क्वन् विश्वशब्दः सर्वेषां विश्वदेवानां नामेति कृत्वा स
र्वे नाम संज्ञा यथा पूर्वजहत्तिः पूर्वशब्दः अत एव विश्वेदेवा इत्यादि प्रयोगः देवसन्निहितस्य चास्य प्रायः प्र
योगो जगत्पर्यायशंका निरासार्थः॥ ननु विश्वेदेवा इति मिलितमेव दृश्यते तत् कथमिहादित्यविश्ववस
व इति नैव मन्तव्यं अथर्ववेदे दर्शनात् तथा च आदित्याः पितरो विश्वे साध्याश्च वसवोपि च भृग्वांगिरसश्चेति
स्वर्लोकस्य परिच्छदा इति च शद्वार्णवः॥ यत्तु विद्याशीलेऽसि विधौ दिवि सुजिभ्यां विश्वे इति पठित्वा विश्वे इ
ति सप्तम्यन्त किरीटजेतरसि विश्वेदेवा इति सांतमुदाजहार॥ स तस्य विपर्यस्तदृशो दृशो दोषेण हर्षामर्षः॥ ते

नैवपारायणपरायणैर्गोवर्द्धनदामोदरपुरुषोत्तमादिभिर्विदितस्तुजिभ्यांविश्वेंइतिवेत्तिंपवित्वाविश्वंवेत्तिवि
श्वंवेत्तिविश्ववेदाविश्वभोजाइतिअशूद्रुषीतिक्वन्विधौविश्वंजगत्विश्वेदेवाइत्युदाहृतत्वादिति।वस
निवासेस्पृस्हस्निहित्रणसिवसिहनिक्लिदिबंधिमनिभ्यश्चेतिउःवसुःतुषत्तुषोरुचिकटिरूपिम्पःकि
तजितिवाडुलकात्किजन्चूर्जेषणंतुदूतारकादित्वाद्धाइतन्चू।आसमंताद्भासनशीलाआभास्वराःभास्व
दीप्तौस्थेशभासपिसकसोवरजितिवरच्।अन्यतेप्राण्यतेऽनेनानिलः अनच अस्माद्धातोःसलिकल्य
निमहिभडिभंडिशंडिपिंडितुंडिकुकिभूभ्यइलजितीलच्।एषामेवबहुतरत्वान्महत्तीराजिःपंक्तिःमहा
राजशब्दोवावाचकत्वेनास्त्येषामतइनिठनाविनिठन्महतीराजिरेषामितिसंज्ञायांकन्नित्यपरेवद्रुत्री
हौकविन्यन्येसास्यदेवतेत्यर्थेवामहाराजप्रोष्ठपदाट्ठञ्जिसंज्ञापूर्वकत्वान्नवृद्धिरित्यपरेकेचित्तुमा
हाराजिकइत्येवंपेठुःतन्मतेपूर्वेणठञिवृद्धिरेवासाध्येसिद्धिरेषामस्तिसाध्याःअर्शआद्यच्।रोदयंती
तिरुद्राःरुदेर्ण्यंताद्रोदेर्णिलुक्चेतिरक्।णिलोपः।तत्रचद्वादशादित्याश्चैत्रादिषुतपंतिये।विष्णुयमविव

19

राम

स्वंतोंऽशुमान् पर्जन्य इत्यपि। वरुणोंऽधाता मित्राः पूषा त्वष्टा भगः परः॥ क्रतुर्दक्षो वसुः सत्यः कालः कामो धृतिः कु
रुः॥ पुरूरवो माद्रवाश्च विश्वेदेवा दश स्मृताः। ध्रुवो धवश्च सोमश्च विष्णुश्चैवानिलोऽनलः॥ प्रत्यूषश्च प्रभासश्च
अष्टौ ते वसवः स्मृताः॥ प्राणापानावुदानश्च समानो व्यान इत्यपि। चक्षुः श्रोत्रं रसो घ्राणः स्पर्शो बुद्धिर्मनस्त
था। द्वादशैते हि तुषिता देवाः स्वारोचिषेंतरे॥ आत्मा ज्ञाता दमो दांतः शांतिर्ज्ञानं शमस्तपः॥ कामः क्रोधो मदो
मोहो द्वादशाभास्वरा इमे। वायुस्कंधाः सप्त ते षामेकैकं सप्त सप्ततिः॥ आमेघादेवावहादिरूपर्युपरिसंस्थि
तः॥ द्वौ शुक्रज्योतिरादित्यौ नंदो हरिस्तपास्तथा। चित्रज्योतिः सत्यज्योतिर्ज्योतिष्मानुस्कोधश्चावहः॥ ऋतजि
तु सजित्सेनजिदमित्रावमित्रजित्। भूरिमित्रसुषेणौ चेत्यामानोः प्रवहो गणः॥ ऋतः सत्यो ध्रुवो धर्त्ता विध
र्त्ता व विधारयः॥ वरुणश्च तृतीयो यमाचंद्रादवहो गणः॥ धवांतोनयउग्रश्च भीमः केपश्च साक्षयः॥ अभियुग्मोश्च
चाभेघश्च तुर्यः संवहो गणः॥ सुस्ना दृगीदृगन्यादृक् प्रतिदृङ्मितसंमताः॥ संभवश्चेत्याग्रहेभ्यः पंचमो विवहो
गणः॥ ईदृक्षः पुरुषोन्यादृग्यमितासमदृक्तथा। क्रामश्च प्रतिदृक्श्चेत्या सप्तर्षिः परावहः॥ मरुदिंडः सरभ

17

सः सामज्ञो मातुषी विशः। देवी विषोंववर्मा चस्कंधः ससमः प्राक्रवात्॥ महाराजिकास्तु सत्यसुधत्व सवनाद्यः षं
शत्यधिकशतद्वयसंख्याता ग्रंथगौरवान्न दर्शिताः॥ साध्या अपि द्वादशैव मनो मंत्रश्च प्राणश्च नयो पानो हयस्तथा
।नारायणो नरश्चैव हंसश्चिवित्तिस्तथा विभुः। प्रभुश्च द्वादशैवैते साध्या रुद्राः पुनस्त्विमे। वहनो नैर्ऋतिः सर्पो मृगव्या
धकपालिनौ। अजैकपादहिर्बुध्न्यः सेनानीरपराजितः॥ महातेजाः पिनाकी च क्वचिद्दंद्वरकादयः॥ रुद्रा इतिकु
रुस्थाने केचिद्बहुविलोचनौ। तथादित्यप्रभृतयः क्वचिदन्यादृशास्त्विमे। प्रयोजनवशात्तर्पणदैःपुराणभेद
तः॥ इह अजएकपादहिर्बुध्न्यः विश्वेदेवा इत्यादौ द्वे द्वे नाम नी विभक्त्यंते एवं वाचके इति निरुक्तं अत एवा ह
येवुध्न्याय स्वाहा इत्येवं प्रयोक्तव्यमित्युगडः॥ अत्रापरा अपि गणदेवता भूयस्यः संति ता अत्यंताप्रसिद्धत्वान्न
निबद्धाः पितरस्तु सुप्रसिद्धात्वात्ग्रंथकारेण न निबद्धा न त्वभावात्तथा च शब्दार्णवं सत्याजयाश्च पितरो वैकुं
गहरयोऽजिताः॥ मरीचयः सुशर्माणः स्वरूपा अमितौजसः॥ सुशाखारोहिताः पराः सुतारा हारिका अपि। इत्या
दयोन्येव हवो लिखिता इह बहुत्वभियान लिख्यंते तत्तु नैवाउसंधेया॥॥ विद्याधरइत्यादिदेवायोनिरुत्पत्ति

राम
१०

18

स्थानमेषां देवयोनयः देवांशका इत्यर्थः। स्वामी तु देववदेहष्टसहितेभ्यः परमाणुभ्यः संघोजायंते नागाश्चैवं एते
च देवयोनिनामानः इति भावः। तथा च भागुरिः। सिद्धा गुह्यकरक्षांसि पिशाचा देवयोनय इतीत्याह। विद्यां गुटिकांज
नादिकां धरंतीति पचाद्यच्। विद्याधरो जीमूतवाहनपुष्पदंतादिः कामरूपी खेचरः॥ समुद्रप्रभवत्वात् अद्भ्यः स्तना
अप्सरसः। आस्यातौ सर्तेरसुन्। अप सारयेति स्खलयतीति वा। औणादिकोऽसिः। पृषोदरादित्वादुपधाह्रस्वत्व
मपशब्दस्योत्याकारलोपश्च। अप्सरसो देववारयोषित उर्वश्याद्याः॥ यक्ष्यंते पूज्यंत इति कर्मणि घञ्। यक्षाः कु
बेरादयः। इः कामस्तस्येवाक्षिणी अस्येति यक्षः इत्यन्ये॥ रक्षंत्येभ्यः। रक्ष पालने। असुन्। रक्षांसि विभीषणादीनि॥
गंधर्वा रभमर्वति। अर्वपर्व गतौ। कर्मण्यण्। शकंध्वादित्वात् पररूपत्वं गानेव धर्मएषामिति पृषोदरादित्वा
द्वा। गंधर्वा हाहाहूहूप्रभृतयः॥ अश्वमुखत्वात् कुत्सिता नराः किं क्षेपे इति समासः। किन्नराः नरशरीरतुरगान
नादयः॥ पिशितमश्नातीति पचाद्यच्। कर्मण्यण् वा। पृषोदरादित्वात् शितशब्दलोपः। अशशब्दस्य शा वा। देवाः पि
शाचो मध्यनालच्यः सत्वविशेषः॥ गुह्यं कुत्सितं कायति कै गै रै शब्दे। आतोऽनुपसर्गे इति कः। गुह्यको माणिभद्रा

टी

18

दिः। ते च निधिरक्षका यक्षभेदास्तथा च निधिरक्षका इति ये यक्षास्ते स्युर्गुह्यकसंज्ञका इति व्याडिः॥ सिधु हिंसा
संराध्योः। गत्यर्थाकर्मकेत्यादिना कर्त्तरि क्तः। सिद्धोऽणिमादिगुणोपेतो विश्वावसुप्रभृतिः॥ इष्टं प्राप्नोतीति भूप्राप्तौ
पूर्ववत् कर्त्तरि क्तः। भूतोऽधोमुखोर्ध्वमुखादिः पिशाचभेदः भूतियोगाद्दर्श आद्य च भूतो रुद्रानुचरो बालग्रहः॥
एते विद्याधरादयो दश देवानामिव योनिरुत्पत्तिकारणमविभाज्यमेषामिति देवयोनिविशेषाः प्रत्येकं पृथ
क्पृथक्वर्त्तते॥ असुरा इत्यादि। अस्यन्ति देवानसुराः असेरुरन्नित्युरन् अविद्यमाना सुरा एषामिति वा सुरावि
रुद्धत्वादनर्थैव दितिवाप्रज्ञादित्वादणि आसुराश्च। द्यतेः क्तिचि दितिः पूर्ववत् ण्यः दैतेया इति आदितेयवद्
क्वादनुर्दक्षदुहिता तत्र जाता दनुजाः सप्तम्यां जनेर्डः॥ दनोरपत्यानि दानवाः तस्यापत्यमित्यण्। दैत्यानां
दानवानां चेति पृथग्दर्शनाद्यद्यप्येतौ भिन्नौ तथाप्यसुरत्वेनैकत्वात् समानशीलत्वाच्च पर्यायतामाहुः॥ य
था दानवे इतः स दैत्यः प्राप्तश्रीरिति। यथा दैत्ये हिरण्याक्षे दानवमिवेति। शुक्रस्य शिष्याः दितेः सुताः दिति
सुताः पूर्वे च ते देवाश्चेति पूर्वदेवाः पूर्वापरप्रथमेत्यादिना समासः पूर्वदेवा इति वा सह सुपेति योगविभा

राम
११

१६

गातसमासःएतेहिपूर्वंदेवाआसनूअन्यायाद्धिदेवत्वात्भ्रष्टाइतिभावः॥सुरान्द्विषंतिद्विषअप्रीतौसत्सू
द्विषेत्यादिना क्विप्सुरद्विषः दशनामान्यसुरस्य॥ सर्वज्ञ इत्यादि सर्वं जानातीति सर्वज्ञः॥ आतोनुपसर्गेकः
शोभनेगतंज्ञानमस्य॥ सर्वगत्यर्था ज्ञानार्था इति सुगतः॥ सुष्ठु अपुनरावृत्त्येगत इति वा॥ सुखेन संसारान्
गत इत्यन्यः॥ प्रशस्ता बुद्धिरस्य बुद्धः॥ प्रशंसायामर्शआद्यच्॥ बुध्यते ध्यायिभिः॥ मतिबुद्धीत्यादिना वर्तमा
नेक्तः इत्युपधत्वेनिके बुधश्च अथ बुद्धो जीनो योगी सर्वज्ञः सुगतो बुध इति व्याडिः॥ धर्मेणराजतेप बाध धर्म
र्मस्यराजावाराजाहः सखिभ्यष्टच् धर्मराजः॥ यथागतास्तेसुनयः शिवांगतिं तथागतः सोपितत्तथागत
इति वोह्यागमः॥ यथा पुनरावृत्तिर्नभवतितथातेनप्रकारेणगत इतितथागतः सुप्सुपेति समासः॥ समं
तात्सर्वतः पुण्यसंभारतो ज्ञानसंभारतश्च भद्रः श्रेष्ठः पंचमीतियोगविभागात्समासः॥ समंतात्संपू
र्णंभद्रमस्येतिवा समंतभद्रः पृषोदरादिः॥ माहात्म्यस्य समग्रस्य धर्मस्य यशसः श्रियः॥ कामस्याथप्रय
यत्नस्य षण्णां भग इति स्मृतिः तेनो मत्तुपि भगवान्॥ मारं कामं जयति मारजित् क्लेशादिमारं जयतीतिवा स

११

जयतिलोकान्

प्र॰टी॰ १२

वैधरः। तपसा लोकं भुवनं जयत्युपरमयति वा लोकजित्। क्विप्। जयति जिनाति वा भवं जिनः। शादूणादेः इण्षि
ञ्जिदीङुष्यविभ्यो नक्। दिव्यं चक्षुर्दिव्यं श्रोत्रं परचित्तज्ञानं पूर्वनिवासानुस्मृतिरात्मज्ञानं वियद्गमनका
यव्यूहादिलक्षणं ऋद्धिश्चेति षट्। षट् अभिज्ञा आद्यज्ञानशक्तयोऽस्य षडभिज्ञः। षट् सु दानशीलक्षा
न्तिवीर्यध्यानप्रज्ञासु आद्यज्ञानमेस्येति षडभिज्ञ इति तु सर्वधरः। दश बलान्यस्य सन्तीति दशबलः। पूर्व
वत् दानशीलक्षमावीर्यध्यानप्रज्ञाबलानि च। उपायः प्रणिधिर्ज्ञानं दश बुद्धबलानि वै। अद्वयं विज्ञा
नाद्वैतं वदत्यवश्यमिति अद्वयवादी त्याऽवश्यके णिनिः सत्यवादित्वाद्वा। विनयति हितमनुशास्ति विना
यकः। मुनिषु इन्द्रः श्रेष्ठो मुनीन्द्रः। ज्ञानपुण्यसंभारः श्रीसमाधनः पूर्णः श्रियायोगविभूत्या वा घनो निविड
ःत्वतीयेति योगविभागात् समासः श्रियाघन इव वर्षति वा श्रीघनः। पूर्वपदादिति प्राप्तं णत्वं तु क्षुभ्नादित्वा
न्न भवति। शास्ति विनेयान् शंसति वा हर्दिभ्यः संज्ञायां वा निटा विजितत्वम् शास्ता। पितृशब्दवदस्य रूपं। शास्ता शा। राम
स्मर इति। अप्रत्युत्पत्तिपक्षे अप्रत्याहिस्मरैत्रुपानां नदीर्घः व्युत्पत्तिपक्षे तु नम्रादित्वग्रहणस्य नियमार्थत्वा १२

रा॰

शास्तारौ। २

नश्चांद्रे शासेः क्तिचि शिष्टिरित्यत्र शास्तेति प्रत्युदाहरणेनौणादिकात्‌ तृच एव रत्नमतिना दर्शितत्वात्‌ बुद्धवा
चिनोऽपि दीर्घ इति सुभूतिः। मन ज्ञाने मनेरुच्चेति इनुः उपधाया उत्वं च मननान्मुनिः। सर्वज्ञाद्यष्टाद
श नामानि बुद्धस्य॥ शाक्येत्यादि इक्ष्वाकुराजसुताः केऽपि पित्रा वनवासाय दत्ताज्ञा गौतमवंश्यस्य
कपिलस्याश्रमे शाकच्छन्ने वसन्ति स्म तेन ते शाक्या इत्यागमः। शाकवनवासित्वाच्छाक्या दिगादित्वा
द्यत्। तथा च सुन्दरानंदचरिते शाकवृक्षप्रतिच्छन्नं वासं यस्माच्च चक्रिरे। तस्मादिक्ष्वाकुवंश्यास्ते शा
क्या इति भुवि श्रुताः। तद्वंशावतीर्णो मुनिः शाक्यश्चासौ मुनिश्चेति। तथा यस्तु शाक्यमुनिः स शाक्यसिं
हः शाक्यः सिंह इव उपमितं व्याघ्रादिभिरिति समासः सिंहादिशब्दा हि उत्तरपदभूताः पूर्वपदस्य श्रे
ष्ठतां गमयंतीति शाक्योऽपि नीमवत्‌। सर्वार्थेषु सिद्धो निष्पन्नः सिद्धशुष्केत्यादिना समासः सर्वार्थः सिद्धो
ऽस्येति त्रिपदो बहुव्रीहिरिति सुसर्वानंदः अत एव सिद्धार्थोऽपि सिद्धार्थौ बुद्धसर्षपाविति शाश्वतः। शुद्धश्चौ
दनोऽस्येति शुद्धोदनः शाकंध्वादिः तस्य राज्ञोऽपत्यं शौद्धोदनिः। गौतमवंशस्य मुनेरयं शिष्य इति तस्ये

दमित्यण् गौतमः गोतमस्यैव शिष्य इति माधवी। अर्कबंधुः सूर्यवंशजत्वात्। मायादेव्याः सुतो मायादेवी
सुतः सः सप्तशाक्यवंश्यस्य मुनेः॥ ब्रह्मेत्यादि॥ बृंहतीति बृंहिवृद्धौ योमादय इति बृंहेर्मनिन्नलोपोऽ
मागमश्च ब्रह्मा तदुक्तं बृहद्दस्य शरीरं यदप्रमेयं प्रमाणतः। बृहद्विस्तीर्णमित्युक्तं ब्रह्मा तेन सउच्यत
इति बृंहयति प्रजा इति एयन्तान्मनिन्वा। आत्मना भवतीत्यात्मभूः भुवः संज्ञांतरयोरिति क्विप्। सुरा
णां ज्येष्ठः प्रथमजः सुरज्येष्ठः। परमे स्थाने तिष्ठतीति परमेष्ठी किदितीतिः तत्पुरुषे कृतीत्यलुक्
स्थास्थिन् स्थूनां वेति कर्तव्यमिति षत्वं। लोकपितॄणां प्रजापतीनाम पि पिता पितामहः पितृव्यमा
तुलेति निपातितः स तु पितुः पिता भवति पितृजननी च तन्मूर्तिरित्यागमः। उपचारात्तत्र हिरण्म
यमंडं हिरण्यं तथा च मनुः तदंडमभवद्धैमं सहस्रांशुसमप्रभमिति तदस्य गर्भः उत्पत्तिकारणं तस्य
गर्भोऽयमिति वा तत्प्रभवत्वाद्धिरण्यगर्भः। लोकस्य चतुर्दश भुवनस्य ईशो लोकेशः। स्वयमात्मना भ
वतीति स्वयंभूः पूर्ववत् क्विप् आत्मभूरित्यनेनैव लब्धे स्वभूनिवृत्त्यर्थं स्वयंभूरित्युक्तं एवमुत्तरत्रापि

ज्ञेयं। चत्वार्याननान्यस्येति चतुराननः॥ सर्वं दधातीति धाता। तृच्। विष्णोर्नाभिकमलजत्वादब्जयोनिः॥ का
मक्रोधादिभ्यो सुरेभ्यो वा द्रुह्यतीति द्रुहिणः। द्रुह जिघांसायामिनन्निति इनन् वा द्रुल्यात् द्रुहणो भावः। ब्रह्मात्मभूः
स्यात्। द्रुहिणो द्रुघणश्च पितामह इति मायुरो द्रुघणोपि। भूतानि विरचयति रचयतिय तेः तृच्। पृषोदरादि
त्वाद् इकारयोरित्वं नकारागमश्च विरिंचिः। रीच वियोजनसंपर्चनयोः स्वरादिः इः अ वइः पृषोदरादित्वान्नु
म् कुंजरवदुपधाह्रस्वत्वं च विरिंचिः। विरिंच्यन्ये विरिंचोपि विरिंचो द्रुघणः। शिंजो विरिंचि द्रुहिणो मत इति श
ब्दार्णवात्। विरिंक्ते सृजते विरिंचिः। विभिर्हंसैः रिच्यते ऊह्यते वा विरिंचिः। विरिंचिरिति प्राच्या इति क्षीरस्वामी॥ क
मलमासनमस्य कमलासनः॥ सृजतीति स्रष्टा। तृन् तृचः॥ प्रजानां संततीनां पतिः प्रजापतिः॥ विदधाती
ति विधाता। वेधश्चैव असुन् वेधादेशश्च विध विधाने इत्यतो वा असुन्। वेधाः॥ विधाता धातेति वृत्तः अन्यो
पसर्गनिवृत्त्यर्थः॥ विश्वं सृजतीत्यन्येभ्योपि क्विप्। क्विवंतस्य वा क्विन् प्रत्ययो यस्मात् दृष्ट इति सक्विन्। नुप्
त्यय इति जद्गुणसं। विज्ञानपक्षे [illegible]

वसृड्भ्यामित्यादि अन्तर्गुणसंविज्ञानपदे तु क्विन उपलक्षणत्वात्तद्भावे क्विवंतस्यापि कुत्वं विश्वसृक्
विश्वसृग्भ्यामित्यादि ज्ञेयं। विदधाति वहुलवचनात्कर्त्तर्य्युपसर्गे घोः किरिति किः विधिः विधविधा
नेइगुपधत्वात् किः विधिः। विंशति नामानि ब्रह्मणः॥ विष्णुरित्यादि वेवेष्टीति विष्णुः विष्लृ व्याप्तौ वि
षेः कित्चेति नुः रषाभ्यामिति णत्वं विशति सर्वभूतानि वा विष्णुः पृषोदरादित्वात्षत्वं विशोर्धातोः प्रवे
शनादिति भारतं। नराणां समूहो नारं तस्य समूह इत्यण् तदेवायनं स्थानमस्येति नारायण इति नि
रुक्तिकाराः क्वचिन्मन्वंतरे नरस्यर्षेरपत्यत्वमुपगत इति नरस्यापत्यं नडादिभ्यः फक् नाराय
ण इति तु वैयाकरणाः आपो नारा इति प्रोक्ता आपो वै नरसूनवः। ता यदस्यायनं पूर्वं तेन नारायणः
स्मृत इति तु मन्वादयः नरादात्मनो जातान्याकाशादीनि नाराणि कार्याणि एषयं कारणात्मा णतिव्याप्नो
तीति नारायणः नराज्जातानि तत्वानि नाराणीति ततो विदुः तान्येवायनं तस्य तेन नारायणः स्मृत इति
मंत्रवर्णः पृषोदरादित्वान्नरायणोपि अथ नारायणो विष्णुरूढिकर्मा नरायण इति शब्दार्णवात् सर्व

त्रपूर्वपदादिति णत्वं। कलियुगे कृष्णवर्णत्वात्। कर्षत्यरीन्वा कृष्णः कृषेर्वर्णे इति बाहुलकान्नक् तथा च संक्षिप्तभारते। सत्यत्रेताद्वापरयुगेषु सितरक्तपीतवर्णाभः। कृष्णः किल कलिकाले स एव पुरुषोत्तमो जयति कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः। तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयत इति ब्रह्मोपनिषदः। उत्कृष्टा निर्वृतिरस्मादिति वा व्युत्पत्तिः। चाक्षुषमन्वंतरे विकुंठायाः अपत्यं वैकुंठः। शिवादित्वादण् विकुंठनं गुरोश्चेत्यप्रत्यये विविधा माया अस्यास्तीति वा ज्योत्स्नादिणि वैकुंठः। पलाशो विष्टरः। स्थिर इति त्रिकांडशेषः। तरुश्चात्राश्वत्थोऽभिमतः। तथा चाश्वत्थः सर्ववृक्षाणामिति गीतानां तत्र श्रूयत इति सर्वधातुभ्यो ष्ट्रन्निति विष्टरः। कुशमुष्टिरिव श्रवसी कर्णौ वस्येति वा विष्टरश्रवाः। बाल्ये चापलनिषिधायया यशोदया दाम्ना उदरे बद्धत्वात् दाम उदरे अस्येति दामोदरः। गमकत्वाद्वैयधिकरण्येऽपि समासः। हृषीकस्येंद्रियस्येशो हृषीकेशः। प्रशस्ताः केशाः संत्यस्येति केशा इति केशवः। यद्वा यस्मात्त्वयैष दुष्टात्माहतः केशी जनार्दन। तस्मात्केशवनामा त्वं लोके ख्यातो भविष्यसीति हरिवंशोक्तेः। हंत्यर्थो द्व धेः केशिनं हतवानित्यन्येभ्योऽपि

दृश्यत इति डः पृषोदरादित्वात् केशिशब्दस्यैकपरस्याकारे न लोपे च केशवः ॥ यदोर्ज्येष्ठः पुत्रो मधुस्तद्वंशत्वात्त
स्यापत्यमित्यणि माधवः ॥ अन्येपि तद्वंश्या माधवाः ॥ तथा च प्रहितः प्रधनाय माधवानिति माघः ॥ माया
लक्ष्म्या धव इति वा ॥ ख्यातो भवति पूर्ववत् क्विपि स्वभूः ॥ दैत्यानामरिः दैत्यारिः ॥ अवयवलक्षणया आ
यतत्वात् पुंडरीके पुंडरीकपत्रे इवाक्षिणी अस्य पुंडरीकाक्षः बहुव्रीहौ सक्थ्यक्ष्णोः स्वांगात् षच् पुं
डरीकस्थाने अक्षि अस्येति वा ॥ अनेन पूर्वं किल रुद्राय सहस्रपुंडरीकावलिरुपनीता सा तत्रैकं
भक्तिं ज्ञातुमपहृतं ततोऽनेन स्वचक्षुरेकमुत्पाद्य पुंडरीकस्थाने कृतमेतच्च महिम्नस्तोत्रे हरिस्ते सा
हस्रमिति पद्ये व्यक्तं यद्वा अक्षेष्विंद्रियेषु दृश्यते अधिष्ठातृरूपेणानुभूयत इत्याक्षः परमात्मा शेष
इत्यणः सर्वेंद्रियाणामधिष्ठातेत्यर्थः हृत्पुंडरीकमध्ये परमात्मरूपेण स्थितत्वात् पुंडरीकाक्षः स
र्वेंद्रियाणामपीडियमिति यावत् तथा च श्रुतिः प्राणस्य प्राणमुत चक्षुषश्चक्षुः श्रोत्रं च श्रोत्रम
नसो यं मनो विदुरिति आलोहित्यात् पुंडरीकं कथासमिवाक्षिणी अस्य पुंडरीकाक्षः कथासशब्दस्त

वानरकटिवचन इति तु विष्णुपुराणटीकाकाराः॥ गां सुवं विन्नवानिति विद्लृ लाभे· गवादिषु विदेः संज्ञायामि
ति ३।१।१३८ सूत्राद्विनामिति तु भूगोविंदः महावराहे· गोवर्द्धनं गिरिं सुतं पाद्यं गोकुलमनेन रक्षितमिति ब्रा
ह्मणैर्गोष्ठाधिपत्यमस्मै दत्तमिति तु सुभूतिः॥ गरुडो ध्वजश्चिह्नमस्य गरुडध्वजः॥ पीतमंबरमस्येति पीतां
बरः॥ कदापि कुतोपि न च्युतोऽच्युतः। निजपदान्नास्ति च्युतं स्खलनमस्येत्यच्युत इति वा शृंगमस्य विका
रः अनुदात्तादेश्चेत्यञ् शार्ङ्गं धनुस्तद्योगात् दत इनि वा विनीतिः शार्ङ्गी॥ विष्वक् नानार्थं व्यथने स्यादि
ति वोपालितः न्यासेपि लोमादिसूत्रे विषुशब्दो नानार्थो निपातो मूर्द्धन्यो णो दर्शितः पामादित्वान्न प्रत्य
ये विषुण इति णत्वदर्शनात् विषुर्गच्छतीति क्विनि विषूची नानाऽञ्चती सेनास्येति विष्वक्सेनः विषु सर्व
तोऽर्थेऽव्ययं विषूची सर्वतोऽञ्चती सेनास्येति तु पंजिकादयः पूर्वपदात्संज्ञायामग इति न णत्वं विष्वक्
शब्दस्य गकारांतत्वात् ककारांतत्वं च णत्वे कर्तव्ये परस्य खरिचेति चर्त्वस्यासिद्धत्वादिति कलिंगः विषु
गिति मूर्द्धन्यमध्य एव विषक् विष्वक्सेनो विज्ञैर्विष्णुर्वै विष्वं वनयेति द्विरूपकोषात् तालव्यामूर्द्ध

टी.
६

न्याश्चैते शब्दाः शटी च परिवेषः विष्वक्सेनोऽश्वेषः प्रतिष्कशः कोशविशदौ चेत्सूक्ष्म वि विकाश्चकदावि
तालव्यमध्योपि विष्वक् सर्वतो व्यापिनी सेनास्येति सुभूतिः ॥ जनाः समुद्रस्थदैत्यभेदास्तेषां मर्दनः ज
नार्दनः अर्द हिंसायां नंद्यादित्वात् ल्युः ॥ अनुजत्वादिंद्रमुपगत इत्युपेंद्रः उपगत इंद्रोऽस्येति वा कुगा
तीत्यादिना समासः इंद्रोऽस्येति वा कुगतीत्यादिना समासः इंद्रलोकादप्युपरि लोके वर्तमानत्वादुपें
द्र इति कल्लिंगः यद्वा हरिवंशे मयोपरि यथेंद्रस्त्वं स्थापितो गामिरीश्वरः ॥ उपेंद्र इति कृष्ण त्वां गास्यंति
दिवि देवताः ॥ इंद्रस्यावरं जातोऽनुजत्वादिंद्रावरजः ॥ चक्रं पाणावस्येति प्रहरणार्थेभ्यः परे निष्ठास
प्तम्याविति परनिपाते चक्रपाणिः ॥ चत्वारो भुजा अस्येति चतुर्भुजः ॥ पद्मं नाभावस्येति पद्मनाभः
अच् प्रत्यन्ववपूर्वादित्यत्राज्जिति योगविभागादच् योगविभागस्य हि पूर्वाचार्येष्टमात्रसाधकत्वं न तु ना
म्यंतस्य सर्वत्रैवाच् समासांत इति नियमः तेन प्रजा इवांगादरविंदनाभेरिति माघः नाधारेण विना
[illegible] रपीष्यत इत्यादिप्रयोगाः उक्तं च योगविभागादिष्टसिद्धिरिति ॥ मधुनाम्नोऽसुरभेदस्य

से.

राम
२६

रिपुर्मधुरिपुः॥ वसुदेवस्यापत्यं वासुदेवः वासुश्चासौ देवश्चेति वा तथा च विष्णुपुराणे सर्वत्रासौ समस्तं
च वसत्यत्रेति वै यतः॥ ततो सौ वासुदेवेति विद्वद्भिः परिपठ्यते इति वासुरपि तथा च त्रिकांडशेषः वासुर्ना
रायणः पुनर्वसुर्विश्वरूपा इति। बलिर्वंचनार्थं भूर्व्योम स्वर्गं त्रयो विक्रमाः पादन्यासा अस्येति त्रिविक्र
मः॥ देवकस्यापत्यं देवकिः अत इञ् संज्ञापूर्वकत्वाद्वृद्ध्यभावः ततः स्त्रियामितो मनुष्यजातेरिति ङीष्
देवकीति वर्णदेशना देवकानां च षष्ठ इति निर्जनाद्वत् इः ततो ङीषि देवकीति समाधेयमिति तु श्रीध
रः देवकी देवकीति द्विरूपकोशश्च तस्या नंदनो देवकीनंदनः इति वृद्धिरहितः पाठः॥ शूरो नाम यादवो व
सुदेवपिता तद्वंशजत्वात् शौरिः बाह्वादेराकृतिगणत्वादिञ् शर्वः शिवे केशव एव शौरिरिति शका
रभेदात्तालव्यादिः सूङ् प्राणिप्रसवे सुसूधाञ्गृधिभ्यः क्रन् सूरो यादवे देत्यवानिति तु मधुमाधवौ॥ श्रि
यः पतिः श्रीपतिः यौगिकत्वाल्लक्ष्मीपतिरित्यादिः॥ पुरुषेभ्य उत्तमः पुरुषोत्तमः इति पंचमीति यो
गविभागात्समासः सह सुपेत्यस्य लक्षणत्वे ऽप्यगतत्वे वा तत्समासो वा तथा च गीतायां यस्मात्क्षर

टी॰

मतीतोहमक्षरादपि चोत्तमः। अतोस्मिंलोके वेदे च प्रथितः पुरुषोत्तमः। तथा च उत्तमः पुरुषस्त्वन्यः परमा
त्मेत्युदाहृतः इति षष्ठ्यां तु न निर्द्धारणे इति समासनिषेधः स्यात् सन्महदित्यादिना कर्मधारये च उत्तमपु
रुष इति यत्र समुदायान्निर्द्धार्यमाणे निर्धारहेतुश्चेति त्रयं सन्निहितं तत्रैव न निर्द्धारणे इति निषेधः इह
तु सम्भवानेकदेशरूपतया व्याख्यातुं न शक्यत इति नास्ति निषेध इत्यनुन्यासः। शेषषष्ठ्यात्र समास इति तु
कज्जटः॥ वनं वनपुष्पैः तन्माला ऽस्येति वनमाली व्रीह्यादित्वादिनिः। सपल्लवपुष्पग्रथिता स्रग्वनमाले
त्येके आपादपद्मया माला वनमालेति सामन्तेति तु कलिंगाः। बलिमसुरं ध्वंसितुं शीलमस्येति ताच्छी
ल्ये णिनिः वलिध्वंसीति सदानुस्वारवान् सकारस्य यय्यनेत भीवेन परसवर्णाभावात्। कंसस्यारातिः कंसा
रातिः॥ अधक्षमिंद्रियेऽधइंद्रियं पादौ ताभ्यां जातो ऽधोक्षजः अन्येभ्योपि दृश्यत इति डः। न तु क्रमेकादशेंद्रि
यगणेन विष्णुपुराणे पायूपस्थं करौ पादाविति अधोक्षाणां जितेंद्रियाणां जायते प्रत्यक्षीभवतीति वा ऽक्षजं
ज्ञानमधो ऽस्य वा ऽक्षादिंद्रियाज्ज्ञाता अक्षजाः प्राणिनस्तेऽधः कृतायस्मादिति वा यद्वा ऽधो न क्षीयते जातु इति

राम
१०

पृषोदरादित्वादधोक्षजः।तथाचोद्योगपर्वणि।अधोनक्षीयतेजातुयस्मात्तस्मादधोक्षजइति।अधोऽक्षिभ्यांह
न्यांजातइत्यधोक्षजइतितुपंजिका॥विश्वंबिभर्त्तिविश्वंभरः।संज्ञायांभृतॄवृजीतिखच्।अरुर्द्विषदजंतस्यमु
म्।कैटभमसुरंजितवानितिसत्सूद्विषेत्यादिनाक्विपिकैटभजित्।विधत्तइतिविधुः।असुरान्विध्यती
तिवाव्यधेःपृभिदिव्यधिगृधिधृषिभ्यइतिकुः॥महापुरुषलक्षणंश्वेतरोमावर्त्तविशेषःश्रीवत्सः।वदंतिम
हत्वमितिवदेर्वृतन्हवदिहनिकमिकषिभ्यःसइतिसप्रत्ययेवत्सः।श्रीयुक्तोवत्सः।क्रुद्धस्यदुर्वाससःपादा
घातरूपोरेखाविशेषःश्रीवत्सइतितुपंजिका।सएवलांछनमस्यश्रीवत्सलांछनः।शौरिःश्रीवत्सदैत्यारिवि
ष्वक्सेनजनार्दनाइतिशाश्वतः।पाणिवात्तश्रीवत्सोपि।ऊनचत्वारिंशन्नामानिविष्णोः॥वस्विति।अस्यजनकः
पितावसुभीरत्नैर्दीव्यतिपचाद्यच्।वसुभिर्दीव्यतीतिकर्मण्यण्वा।कृष्णेजातेदेवैरानकादुंदुभयोवादि
ताअस्यगृहइत्यानकदुंदुभिः।पृषोदरादित्वात्सिद्धिः।आनकदुंदुभोवसुदेवपितातस्यापत्यमित्यमित्य
र्थेऽतइञितिस्त्रीमीढ्वेनामनीकृष्णपितुः॥वलभद्रइति।वलंभद्रंश्रेष्ठमस्यवलेनभद्रोवावलभद्रः।प्रलंबंहतवा

नफलं वघ्नः देवत्वादमनुष्यकर्तृकेष्वेतिटकू मूलविभुजादित्वात्कइतिनुकौमुदी। वलातिशययोगाद्बलः
अर्शआद्यच्च बलस्यासौ देवश्चेति बलदेवः। बलेन दीव्यतीति वा। अच्युतस्याग्रजोऽच्युताग्रजः। रेवत्यारम
णो रेवतीरमणः। नंद्यादित्वाल्ल्युः। रमयति मोदयति प्रजा रूपमस्य रामः। ज्वलितिकसंतेभ्योणः। कामभिक्षा
च्चोत्कटत्वात्स्मां वा विलासित्वात् शृंगारात्मकं कामं वा पालयति कामपालः। पृपालनहरणयोः कर्मण्य
णः। हलं लांगलमायुधमस्य हलायुधः। नीलमंवरमस्य नीलांवरः। रोहिण्या अपत्यं रौहिणेयः। शुभ्रादि
भ्यश्चेति ढक्। तालो वृक्षविशेषोऽङ्को ध्वजोऽस्य तालाङ्कः। मुसखंडने हृषादिभ्यः कलच् मुसलं दंत्यमध्योऽत
था च सर्वस्य द्वे इत्यत्र न्यासः विसविसं मुसलं मुसलं इति षत्वं स्यादिति च मरमुसलस्तु पाइतिसकारभेद
श्च मुषस्तेये इत्यतो मूर्द्धन्योपीति वर्णदेशनात् घोगान्मुसली एवं हली। संकर्षति संहारमूर्तित्वात् हलेन
वेति संकर्षणः। गर्भस्थस्य सम्यक्कर्षणाद्वा तथा च हरिवंशे गर्भसंकर्षणात्सोथ लोके संकर्षणः स्मृतः। तदु
त्तिनंद्यादित्वाल्ल्युः। द्वितीयपक्षेऽर्शआद्यच्। सीरो लांगलं पाणावस्येति सीरपाणिः। सीरादंत्यादिः अजगरस

२

पंशीरस्ताल ध्यादिः क्विभिरान्नातः लांगलवचनो नियतं दंत्यादिर्दृश्यते शास्त्रदृत्युष्मविवेकात् ॥ कालिंद्याय मुनाया भेदनः कालिंदीभेदनः ल्युः ॥ वलयोगाद्बलः ॥ सप्तदश बलस्य ॥ मदनइत्यादि ॥ [illegible] मदयतीति मदनः ल्युः ॥ मनो मथ्नातीति मन्मथः पृषोदरादिः मदी हर्षे मा धत्तीति मन्त्वक्विप् मथ्नातीति मथः अत्र मत्वासो मथ श्चेति सर्वानंदः मननं मत्त्वं तेन नाक्विप् अनुदात्तोपदेशेत्यादिना अनुनासिकलोपे तु कम् मथ्नाति ॥ तिमथः अत्र मतो मथो मन्मथ इति स्वामी ॥ म्रियतेऽनेनेति मारः करणे घञ् विरहिणं मारयति वा पचाद्यच् ॥ प्रकृष्टं द्युम्नं बलमस्येति प्रद्युम्नः ॥ मत्स्यजातित्वात् मकर एव मीनः स एव केतनमस्येति मीनकेतनः ॥ के ब्रह्मणि दृप्तवान् कं ब्रह्माणं दर्पितवान् वा कंदर्पः पृषोदरादिः कमत्ययं कुत्सायां कं दर्पोऽस्येति वा कंदर्पः ॥ दर्पयतीति दर्पकः अविद्यमानमंगमस्येत्यनंगः ॥ कामयत इति कामः पचाद्यच् काम्यतेऽनेनेति वा पुंसि संज्ञायामिति घः ॥ उन्मादनस्तापनश्च शोषणः स्तंभनस्तथा ॥ संमोहनश्च कामस्य पंचबाणाः प्रकीर्तिताः ॥ एते पंच शरा अस्येति पंचशरः पंचेंद्रियार्थाः शरा अस्येत्यन्ये ॥ स्मरः पचाद्यच् स्मर्यतेऽनेनेति वा घः सं

स्मरयति उत्कंठयति

१५

टी.

वरणं संवरस्तस्यारिः संवरारिः दैत्यपक्षे संवृणोत्याच्छादयतिप चाद्यच् संवरो दैत्यादिः क्लीबं तु संवरं नीवौवौ
इव्रतविशेषयोः। विशेषे पुंसि दैत्यस्य मत्स्यस्य हरिणस्य चेति दंत्यादौ रभसः दैत्यानां शं कल्याणं वृणोति
शमिधातोरित्यादिनाउच् शंवरस्तालव्यादिः शंवरं सलिले पुंसि मृगदैत्यविशेषयोरिति तालव्यादौ मेदि
निः तस्यारिः वर्णदेशनायां पक्षे हृदये दर्शितं। शृंगाररूपेण मनसि जायते मनसिजः सप्तम्यां जनेर्डः तत्पु
रुषे कृतीत्यलुक् क्वलु किंतु मनोजः। कुसुमानि इषवोऽस्य कुसुमेषुः। न मनसोऽन्यस्माज्जायते न विद्यतेऽन्यय
स्मात् सोऽनन्यो विष्णुः सर्वं विष्णुमयं जगदिति ज्ञात्वा तस्माज्जातः अनन्यज इति वा। पुष्पं धनुरस्य पुष्प
धन्वा वा संज्ञायामित्यनंत पक्षे पुष्पधनुः सांतोऽपि द्रुतमेत्य पुष्पधनुषो धनुष इति माघः। रतेः पतिः रति
पतिः। मकरो जलजंतुविशेषो ध्वजोऽस्येति मकरध्वजः। आत्मना भवत्यात्मभूः पूर्ववत् क्विप्। ब्रह्मतपः
सुवति वाऽलयति ब्रह्माणं सुवति प्रेरयति वा ब्रह्मसूः सूप्रेरणे अन्येभ्योऽपीति क्विप्। विश्वव्यापी केतुर्ज्योति
रस्येति विश्वकेतुः पताकायां ध्रुतौ केतुर्ग्रहोत्पातारिलक्ष्मसु इति रभसः क्वचिद्दृश्यकेतुरिति पाठः खड्गा

राम
१९

पुषोगनिरुद्धः स्यात्तथा चैवर्ष्यकेतन इति सावधुरार्णात्तिएणः कुरंगमो रिश्यः स्यादृश्यश्चारूलो वनइतिपु
रुषोत्तमः ध्वजनिर्णयस्यालौकिकत्वात्तस्य सप्रमाददर्शनिह इचंडः ब्रह्मसूत्वादिनामचतुष्टयमनिरुद्धस्य
स्यैके अनिरुद्धे विश्वकेतुर्ब्रह्मसूः पृषापतिरिति वृहदमरकोषात् ब्रह्मसूस्त्वनिरुद्धः स्यादिति शब्दार्ण
वाच्च आत्मभूर्ब्रह्मसूः काम इत्यमरमालादर्शनात् कामदेव एवोक्तत्वात् कामस्यैव नामेत्यपरो एक
विंशतिर्नामानि कामदेवस्य॥ अनीति युद्धे केनापि न निरुद्धः अनिरुद्धः॥ उषायाः पतिः उषापतिः मूर्द्ध
न्यमध्यः ऊषा बाणस्य पुत्री स्यादनिरुद्धगृहिण्युषेति अजयकोषदर्शनाद्दीर्घादिरपि। हेऽनिरुद्ध
स्य॥ लक्ष्मीरिति लक्षयति पश्यति नीतिशालिनं लक्ष्मीः लक्ष दर्शनांकयोः लक्षेर्मुट् चेति ईकारः मुडा
गमश्च अत एव ह्यन्तत्वाभावान्न सुलोपः॥ पद्ममालयोऽस्याः पद्मालया पद्ममस्ति विद्यतेऽस्याः पद्मा अर्शआ
द्यच्। एवं कमला। उभयोरुपादानादन्यकमलपर्यायेणानभिधानं सूचितं। श्रयतीति श्रीः श्रिञ् सेवायां
क्विब्वचीत्यादिना क्विप् दीर्घः संप्रसारणनिषेधश्च श्रीलक्ष्म्योः कृदिकारादित्यत्र सावर्ण्यग्रहणान्ङी।

श्री॰

घंतावपीतिमैत्रेयः तां दृष्ट्वा श्रीमिवायंतीमिति प्रयोगः॥ हरेः प्रियाहरिप्रिया॥ षट्कं लक्ष्म्याः॥ शंखइत्या

दि समुद्रेति मि रूपधारी पंचजननामासुर आसीत्तदस्थिभवत्वात्तव हि र्दैव पंचजनेभ्य इत्युपसंख्यानात्

त्र्यः विष्णोः शंखस्य नामैकं॥ चक्रमिति लक्ष्मीपतेरित्येव सदारिघ्नुछेदंकरोत्यनेनकरोतेः कप्रत्ययेके

कृत्रादीनामिति द्विर्वचनेच चंक्रमक्तेः सुखेनहश्यतइति भाषायां शासिम्युधिदृशिधृषिमृषिभ्यो युच्

त्त्यइति खलथवादेयुच् अभिरामत्वात्शोभनं दर्शनमस्य वा सुदर्शनः सुदर्शनोऽस्त्रियां चक्रइतिवु

नामनिधानात्क्लीवत्वं च एकं॥ कौमोदेति लक्ष्मीपतेरित्येव कौ पृथिव्यां मोदते सदाजययोगात्कौ

मोदकी वकुल्लमन्यत्रापि वुन् विष्णुः कुमोदकः शौरिरिति कोषांतरात् कुमोदको विष्णुस्तस्येयमित्य

र्थेऽण्॥ कौमोदकी संहिनास्तुकौमोदकीतिपाठः कुपोदकाज्ञानेत्याम्नायादितिस्वामीदेवास्त्वाहुरद

ति गदाप्रवाघजेतात्तदेशप्रएकं॥ खड्गइतिलक्ष्मीपतेरित्येव नंदयतिदेवादीन् नंदकः राबुन्नएकं॥ कौस्तु

भइति लक्ष्मीपतेरित्येव वष्टुभस्तंभेकौ स्तोभते कुस्तुभो विष्णुः इगुपधत्वात्कः तस्येदमित्यण् कौस्तुभः कुं

मुवं स्कन्नातीति व्याप्नोतीति कुस्कम्भो द्विस्तस्यायमिति स्वामी एकं ॥ गरुत्मेति प्रशस्ता अतिशयिता वा गरुतः पक्षा
अस्य संतिमतुप् यवादिपाठात्तक्ष्णय इति न वत्वं गरुत्मान् गरं विषं हंति गरुड् गिरडीयते गिरति नागं वा अन्येभ्योपि
दृश्यत इति डः पृषोदरादिः ॥ एकस्मिन्नूकल्ये तृक्षस्य मुनेरपत्यं तार्क्ष्यः गर्गादित्वात् यञ् बहुत्वे यञञोश्चे
ति लुक् इति तृक्षाः ॥ विनताया अपत्यं स्त्रीभ्यो ढक् इति वैनतेयः ॥ खगानामीश्वरः खगेश्वरः न चात्र प्रतिपदविधा
ना षष्ठी न समस्यत इति वक्तव्यमिति समासनिषेधः शंकनीयः यावता शेषलक्षणैवेयं न हि स्वाम्या
दिसूत्रेण विधीयते किंतु सप्तम्यनेन विधीयमाना षष्ठ्या बाधिका मा भूदिति चकारेण षष्ठ्याः प्रतिप्र
सवः क्रियते न तत्वपूर्वरूपतया विधानं एवं विधविषये च समासः स्यादेव न निर्धारण इति ज्ञापकात् अ
न्यथा प्रतिपदविहितत्वात् षष्ठ्याः समासो भविष्यति किं निषेधेनेति ॥ नागानामंतको नागांतकः ॥ र
थस्थानीयत्वाद्वहत्वाद्वा विष्णो रथः विष्णुरथः ॥ तथा च त्रिकांडशेषः रथः पौरुषदेहयोरिति ॥ कान
कमयत्वाच्छोभनं पर्णं पक्षो ऽस्य सुपर्णः ॥ पन्नगानश्नातीति अश भोजने ल्युः पन्नगाशनः नव गरुडस्य ॥

·टी·
२१

शंभुरिति शंकल्याणंभवते प्राप्नोति शंभुः भूप्राप्तावात्मनेपदी आधृषाद्वेति णिच्भ्रामितद्वादित्वात् डुः
शंकल्याणं भवत्यस्मादिति वा। ईष्टे इतीशः ईश ऐश्वर्ये इगुपधत्वात्कः। स्कांदे पालयामि पशून्यस्मा
त्तस्मात्तामि च यदृच्छया। तेषां च पतिरेवाहं तस्मात्पशुपतिः स्मृतः इति। पशुर्मृगादौ छागले प्रमथे
च पशुमानयमिति तालव्यांतेरभसः। पशवः प्रमथास्तेषां पतिः पशुपतिरिति कौमुदी। पशूनां सु
रनरतिरश्चां पतिः पशुपतिः तदुक्तं तिर्यग्जातौ पशुः प्रोक्तः सर्वप्राणिनि पुंस्ययमिति स्वामी। शि
वं कल्याणं तद्योगाल्लोकानां शिवकारित्वाद्वा शिवः। अशूं आघञ्। शूलमस्यास्तीति इनिः शूली। महां
श्चासावीश्वरश्चेति महेश्वरः सन्महदित्यादिना [illegible] समा
सः आन्महदित्यादिना त्वं। ईशितुं शीलमस्य ईश्वरः स्कांदे ईशएवाहमत्यर्थं न च मामीशते परे। द
दामि च सदैश्वर्यमीश्वरस्तेन कीर्तित इति स्थेशभासेत्यादिना वरच्। प्रलये शृणातीति शॄ हिंसा
यां कृ दृ शॄ हृभ्यो वः शर्वस्तालव्यादिः अर्व सर्व हिंसायामित्यतः पचाद्यच् विसर्वो दंत्यादिः ऐप्सु पा

राम
२१

व्यायसर्वस्वेअतएवसर्वस्तुशर्वोभगवान्शंभुःकालंजरःशिवइतिनामनिधानंऐश्वर्यसामर्थ्या
दीशानःताच्छील्यवयोवचनेत्यादिनाचानश्।।शश्वद्भूतानांशंकल्याणंकरोतिशंकरःनथाचस्कांदेशं
करोमिसदाध्यानात्परमंयन्निरामयं।भूतानामसकलंयस्मात्तेनाहंशंकरःस्मृतःशमिधातोःसंज्ञाया
मित्यच्।।चंद्रःशेखरोऽस्यचंद्रशेखरः।।भूतानांप्रमथादीनामीशःभूतेशः।।गदासुरवधेखंडःपरशुरस्य
खंडपरशुःखंडयतीतिखंडःपरशुरस्येतिवाचतुरचतुकोष्टयंखंडपशुःपर्शुरामेशंकरेन्नृणिलेपिनीति
विश्वात्गिरेःकैलासस्यईशःगिरीशः।।गिरौशेतेतिष्ठतिगिरौडश्छंदसीतिडोवागिरिराश्रयत्वेनास्या
स्तीतिलोमादित्वाच्छःगिरिशः।।मृडइतिमृडतग्रामंमृडःमृडसुखनेइगुपधत्वात्कः।।मृत्युंजयःसंज्ञायांभृतृ
वृजीतिखश्मुम्।।कृत्तिश्चर्मवासोऽस्यकृत्तिवासाःसांतः।।पिनाकोधनुरस्यास्तीतिपिनाकीइनिः।।प्रम
थानांगणानामधिपःप्रमथाधिपः।।उग्रःतेरोद्रत्वात्क्रुधासमवैतिउग्रःसर्वोपरिवर्ततेवाउग्रः
उचसमवायेऋज्रेंद्रादिनारन्गश्चांतादेशः।।कपर्दोजटाबंधोऽस्तीतिकपर्दीइनिः।।कालकूटम्भक्षणात्
स्मा

मृत्युंज

29

अ॰टी॰
२२

श्रीः शोभा कंठेऽस्य श्रीकंठः। हृतं कंठे विषं घोरं ततः श्रीकंठनामगादिति नीलकंठस्तव। अत एव शितिः
कालः कंठोऽस्य शितिकंठः। ब्रह्मकपालं बिभर्त्ति कपालभृत्। लोकाचारविपरीतत्वाद्वामः। इवमत्र द्वि
रण्योघ्निनोदात्तोपदेशेत्यादिना हृद्विनिषेधे प्राप्ते अनाचमेरिति कम्यमिवमीत्यादिनाऽनिषेधः। वामः
सुंदरो देवः संसारवामत्वाद्वेति स्वामी। एवं महांश्चासौ देवश्चेति महादेवः सर्वदेवानां महनीयत्वान्म
हत्वाच्च तथा च शैवपुराणे पूज्यते यत्सुरैः सर्वैर्महांश्चैव प्रमाणतः। धातुर्महेति पूजायां महादेवस्त
तः स्मृतः इति स्कांदेऽपि महतामपि देवानामहमेव महान्यतः। नतु मत्तो महानन्यो महादेवस्ततो ह्यह
मिति। रविचंद्राग्निरूपत्वात् विविधरूपत्वात् विविधरूपाण्यक्षी ण्यस्य त्रित्वाद्वा विरूपाक्षः। बहुव्री
हौ सक्थ्यक्ष्णोः षच्। त्रीणि लोचनान्यस्य त्रिलोचनः। कृशानौ रेतोऽस्य कृशानुरेताः। देव्यास्तस्य दुमशक
त्वादग्नौ क्षिप्तमस्य रेतः। अत एव कुमारः पावकिरिति स्वामी। सर्वं जानातीति सर्वज्ञः। कः। जटझट संघाते। स
र्वधातुभ्य इन्नीतीन्। जटिर्जटा शिला शिली नित्यद्विरूपकोषः। धुरस्ते लोकाविंताया जटिः संघातो जटिः। धू

राम
२२

गंगा जटास्य पृषोदरादित्वादाकारस्येत्वमिति स्वामी। अंतःउक्तरूपेण जटिसाधनात्सूर्धूरस्य वा जटिर्जटा
स्येति तु कौमुदी। तुक्तो ब्रह्मणो ललाटे स्वेदो जातस्तं माहेश्वरं ते जोध्यतिष्ठत् तस्याग्रे निपत्य नीलं भू
त्वा लोहितेव स्वबत्ततोऽयं जातस्तु इति नीललोहित इति पौराणिकाः। स्कंदे नीलं येन मम मांगं तु रसा कंलोहि
तं त्विषा। नीललोहित इत्येव ततो हं परिकीर्तित इति वा नीलः कंठे लोहिताश्च केशा अस्येति स्वामी प्रलये
कृत्स्नं हरति हरः पचाद्यच् पृषोदरादित्वादीत्वे हीर इति च। हीरः कपर्दी शमिर इति संसारवर्तीत्। स्मरं हरति
६ स्मरहर तेरनुद्यमनेऽच्। भर्ज्जति भर्गः पचाद्यच् न्यंक्वादित्वात् कुत्वं भृज्ज्यतेऽनेन कालेरयो वा घञ् भर्गः भृज्ज्या
ते पच्यते जगदनेनेति भर्ग्य इति पाठे अर्हलोण्यत् चजोः कुघिण्यतोरिति कुत्वं वहुभिरस्त भर्ग इत्येव सूलपा
वः स्त्रीकृतः त्रीण्यंबकान्यक्षीण्यस्य त्रयाणां लोकानामंबकः पिता वा त्र्यंबकः तिस्रो अंबा यो भूम्यापोऽस्ये
ति तु भारते। त्रयाणां पुराणां समाहारस्त्रिपुरं पात्रादित्वात् तस्यांतकः त्रिपुरांतकः॥ धरतीति धरः पचाद्यच् गंगा
या धरो गंगाधरः अच्चयथा तु कर्मण्यणे संज्ञायां भृतृवृ वाख्या त्। अंधक दैत्यस्य रिपुः अंधकरिपुः॥ दक्षयज्ञ

22

अ॰टी॰
२३

ध्वंसनात्क्रतुध्वंसी नांतः॥ वृषो ध्वजश्चिह्नमस्य वृषध्वजः॥ गंगाधरणाय व्योमव्यापी केशोऽस्य व्योमद्यौः केमू
र्द्धि शेतेऽस्य वा शीर्ष्णो द्यौः समवर्ततेति श्रुतेः अन्ये त्वव्योपि डः व्योमकेशः भवत्यस्मा हिँतिभवः बाहुल्याद पुवि
श्वमस्त्यस्मिन्निति वा अस्त्यादेशाद्भुवोऽप्भवः स्त्रिणी भुवइत्यत्र स्त्रिणी साहचर्याद्भुवो भौवादिकादेव घञ्। वि
भेत्यस्मादिति भैरवरूपात् भीमः भीमादयोऽपादाने इति साधुः॥ पलयेति छतीति स्थो णउरिति स्थाणुः॥ रुद्र इत्
क्तः सर्वगतरुजां द्रावणाद्रोदनहननाद्वा रुद्रः तथा च स्कंदे रुजः सर्वगता यस्मात् द्रावयामि जगत्यहं। रोदनं ह
न्मि यस्माद्वा रुद्रस्तस्मादहं प्रिय इति। उमायाः पतिरुमापतिः॥ अष्टचत्वारिंशत् शंभोः॥ कपर्द इत्यस्य
तु जटाजूटो जटाबंधः पर्वपूरणे सपदादित्वात् क्विप् उराल्लोपः कस्य गंगाजलस्य परापूरणेन दायति शुध्य
तीति कपर्दः दैप् शोधने सुपीति योगविभागात् कः कस्य जलस्य पूः पूरणमिति षष्ठी दरादित्वा द्रूकारस्या
कार इति त्वन्यः के शिरसि पर्दते शब्दायते के शिरः पिपर्त्तीति कपर्दः औणादिको द इति तु स्वामी जटानां जूटो
बंधः क्षण इति ख्यातः शिवजटाबंधनस्यैकं॥ पिनाक इति त्रिपुरदाहे शरानलज्वालाजालेन नाकमपि

स्वभिः

राम
२२

पिहितवानितिपिनाकः निजमासापिहितनाकोवापिरेवपिहितार्थकाचीपृषोदरादित्वात्पूर्वनिपातोऽका
रलोपश्चयद्वापातीतिपिनाकः पिनाकादयश्चेतिपातेराकः नुमागमइत्वंचनिपात्यते। अजोविष्णुःकोब्रह्मा
तावत्रस्तइतिगांडुजगात्संज्ञायामितिवः निपातनात्गत्वंआजकवमितितुभाष्यंतन्मतेसूत्रेपिक का
रःप्रज्ञादित्वाद्‍णआजगवमितिदीर्घोद्यपितेनशार्ङ्गधनुर्मुरारेराजगवमजस्यवापिनाकंवेतिवोपालि
तःस्थाणोर्धनुराजगवमित्यमरमालाचाकपदेऽन्येषामयीतिदीर्घत्वेऽजकावमित्यपिधनुस्त्वजगवंयुगय
मजकावमजीजकमितिशब्दार्णवात्। शिवधनुषोद्वेनाम्नी॥ प्रमथाइत्यादि। अस्येत्येवास्यपारिषदाःरुद्रदे
षिणांप्रमथ्नंतीतिप्रमथाः मथविलोडनेपचाद्यच् पारिषदिसाधुवःपारिषद्याः परिषदोण्यइतियोगविभा
गाद्‍ण्ण्येतुपारिषद्यइत्यपिपर्षदोह्यवुकत्वंचततःपार्षदपार्षद्यावपिस्मृताः शिवस्यपार्षदाइतिसंसा
रावर्तेदिःसपार्षदेरंवरमासुपूरइतिजांववत्यांपाणिनिःद्वेशिवानुचराणां॥ ब्राह्मीतिअस्यमातरोब्रह्मादी
नांस्वेदनिर्गतत्वात्तस्येदमित्यण्ब्राह्मोऽजातावितिटिलोपेब्राह्मीब्राह्मीमाहेश्वरीचैंद्रीवाराहीवैष्णवी

ना॰टी
२४

तथा। कौमारीत्यपि चामुंडा चर्चिकेत्यष्टमातरः तथा च भट्टस्वामी अस्याष्टौ परिवारत्वेन मातिवर्त्तन्ते मातरइति
सर्वेश्वरादयस्तु चामुंडा चर्चिकाशब्दावपनीय कौवेरीति पठित्वा सप्तैव मातर इत्याहुः ब्रह्माण्याद्यास्तु मातर
इति पाठे ब्रह्माणमणति कीर्त्तयतीति अणरणेति दंडकधातोः कर्मण्यण्ङीपि ब्रह्माणी ब्रह्माण्याद्याः स्मृताः
सप्तदेवतामातरो बुधैरिति हलायुधः ब्रह्मादिशक्तिदेवतानामेकैकं॥ विभूतिरिति विशेषेण भूतिर्भवन
मस्याविभूतिः एवं भूतिः भवतेः स्त्रियांमंत्रेवृषेषपचमनविदभूवीराउदात्तइति क्तिन् भूतिरित्युक्ता विभू
तिरित्यन्यप्रादिनिहत्यर्थकासौ विभूतिर्भूतिश्चैत्याह ऐश्वर्यमिति अणिमा लघिमा प्राप्तिः प्राकाम्यं महि
मा तथा। ईशिता वशिता चैव तथा कामावशायिता तत्राणिमाऽणुत्वं येन सूक्ष्मीभूत्वा विचरति लघिमा
लघुत्वं येन वायोरपि लघुतरो भवति प्राप्तिरंगुल्यग्रेणं चंद्रादेः स्पर्शः प्राकाम्यमिच्छानभिघा
तः महिमा महत्वं येन भुवनेऽपि न संमाति ईशिता प्रभुत्वं येन स्थावरादिसर्वभूतान्यादेशकारीणि भवं
ति वशिता यया भूमावपि जलवन्मज्जनोन्मज्जने कामावशायिता सत्यसंकल्पता श्रीडोणिनिः सर्वानंद

राम
२४

स्फुकामावशायिनेत्यनेकार्थत्वाद्धात्वनांस्यतिरिहतिष्ठत्यर्थ इतिवदन्नूदंत्यमर्धमन्यतेएतदेवयुक्तंमन्यामहे
वङ्गुषुप्रयोगात् ऐश्वर्यमपिनामविभूतिर्भूतिरितिशंभुदृतभस्मनोनामद्वयमितित्वन्ये। अणुत्वाद्यष्टविधवि
भावस्यनामत्रयं॥ उमेति उमेतिमात्रातपसेनिषिद्धेत्युमायद्वा अवतिरक्षत्यापद्भ्य इति अविसिविसिशुषिभ्य
किदितिमन्प्रत्ययेकित्वेन्नरत्वरेत्यूठि वाङ्कुल्लकाङुस्वत्वे च उमा क्वचित्कल्पे आमहिम्नरस्यमालक्ष्मीरिति
वा। कतस्यापत्यमितिगर्गादित्वाद्यञ्नेतत: सर्वत्रलोहितादिकतंतेभ्य इति ष्फ: षित्वान्ङीषु कात्यायनी। गौ
रीगौरादित्वान्ङीषु तथा च स्कंदे इच्छामि देव दिव्यं च वपु: कनकसुप्रभं। गौरीतिलोकेख्याता च भवेयं कम
लोद्भवेति। अवस्थाभेदेन कालीज्ञानपदेत्यादिनाङीषु वर्णस्याविवक्षायां कालाउमा कात्यायनी दुर्गा काली
हैमवतीश्वरा। कालाकालंजरीगौरेतिवाचस्पति:। हैमवतीतस्यापत्यमित्यए। ईष्टेस्थेशमासेतिवरचूह
पुईश्वरा अश्नोतेराशुकर्मणि वरट् च ईश्वादेरितिटित्वान्ङीपि ईश्वरी ईश्वर: शंकरे ऽधीशतत्पत्यामीश्वरी
श्वरेतिवोपालित: शक्तिशक्तिमतोरभेदात् श्रेयस्करीत्वाद्वाशिवा डुं योगे शिवीतिस्वामी। भवस्यस्त्री भवानी इं

प्र·टी· २५

डुवरुणेत्यादिना ङीषानुकौ। एवं रुद्राणी शर्वाणी मृडानी। सर्वाणि मंगलान्यस्यां सा सर्वमंगला। तपस्यंत्या नया स्व
यं विशीर्णमपि पर्णं न भुक्तं न विघ्ने पर्णमप्याहारो वास्याः अपर्णा जाते रित्यनुवृत्तेः पाककर्णेत्यादिना ङीष्
पर्वतस्यापत्यं पार्वती पूर्ववदण्। सर्वे गत्यर्था ज्ञानार्था इति दुःखेन गम्यते ज्ञायते ऽसाविति दुर्गा अन्येभ्योपि दृ
श्यत इति डः दुःखेन गंतुं ज्ञातुं शक्यते ऽस्यामित्याधारविवक्षायां सुदुरोरधिकरणे ड इति नु माधवी दुर्गगिरि
र्वने वा निवासत्वेनास्या अस्तीत्यर्श आद्यच् वा दुर्गनामासुरवधाद्वा तथा च तत्रैव च वधिष्यामि दुर्गमाख्यं
महासुरं दुर्गा देवीति विख्यातं तन्मे नाम भविष्यति। इति मार्कंडेयपुराणं। अतिकोपत्वाच्चंडिका चंडिकोपे
चंडतीति पचाद्यच् विस्त्रियां व ह्वादिभ्यश्चेति ङीष् ततः संज्ञायामिति कन्। केऽण इति ह्रस्वः। खलु त्वा जगन्मा
तृत्वाद् दैवैवांविका संज्ञायां कन्। सप्तदश उमायाः॥ विनायक इत्यादि विघ्नानां विशिष्टानां नायको विगतो नाय
को नियंता ऽस्य वा विनायकः खलु। तथैव विघ्नानां राजा नियंता विघ्नराजः राजाहः सखिभ्यष्टजिति टच्॥
दुर्गयाचामुंडया पालितत्वात् द्वयोर्मातुरपत्यं द्वैमातुरः मातुरुत्संख्यासंभद्रपूर्वाया इत्यण् उत्वं रपरत्वं च

राम· २५

२८

शिरोरहितोजातोहस्तिशिरसियोजितइत्यतोहस्तिन्याअपत्यत्वात्द्वयोरपत्यमितितुकौमुदी।गणानांप्रमथा
नामधिपोगणाधिपः।कार्त्तिकेयेनोत्पाटितदंतत्वादेकदंतः।हेशंकरेरंबतेलंबतेवाल्यइतिहेरंबः।हेमृत्युहे
रंबतेशब्दायतेइतितुस्वामी।यद्वाहेशिवसमीपेरंबतेशब्दायतेहेरंबः।अविरविशब्देपचाद्यच्।तत्पुरुषेकृतीत्य
लुक्।लंबंमुदरमस्येतिलंबोदरः।गजआननमस्येतिसमुदायेऽपिप्रवृत्ताःशब्दाअवयवेष्वपिवर्त्तन्तइति
गजाननः।गजाननमिवाननमस्येतिवाउष्ट्रमुखवत्समासोत्तरपदलोपो।अष्टौगणपतेः।।कार्त्तिकेयइ
तिकृत्तिकानामपत्यंनत्पालितत्वात्कार्त्तिकेयः।महतीसेनास्यमहासेनः।सदैत्यः।शरवनाज्जन्मास्यश
रजन्मा।कृत्तिकानामग्निपत्नीनांषण्णांस्तनपानार्थंषडाननान्यस्येतिषडाननः।पार्वत्यानंदनःपार्वतीनंद
नः।ल्युः।स्कंदतिगच्छतिशोषयतिवादैत्यान्स्कंदः।तथाचवायुपुराणेस्कंदितादानवगणास्तेनस्कंदःप्रताप
वानितिस्कंदिरगतिशोषणयोःपचाद्यच्।सेनांनयतिसेनानीःसत्सूद्विषेतिक्विप्।पुराकिलतारकोपद्रुत
देवरक्षार्थंशिवेनाग्निरूपेस्ववीजंवह्निमुखेक्षिप्तंतेनापिकृत्तिकासुक्षिप्तंताश्चदैवागतगर्भसत्रपाःशरवणे

अ.टी.
६

प्रविश्य प्रसूताः तेनाग्निभूरिति सर्वानंदः कौमुद्यां तु तारकभीतदेवरक्षाक्षमपुत्रोत्पादाय रेव्यां वीजमुत्सि
सृष्टं रुद्रो गौरीगर्भजातत्वदपत्याद्दतिवलाद्देवाभीरव इत्यग्निना ज्ञापितो भूमौ रेतो गक्षिपत् देवीशापात्सग
र्भोऽग्नावेवाभूत् स च तं गर्भं खिन्नो गंगायामक्षिपत् सा च शरवणे कुमारमसूत स च कृत्तिकाभिर्नीत्वा पालि
त इत्यतोऽयमग्निभवत्वादग्निभूरित्युक्तः । गूहति रक्षति सेनां गुहः गुहू संवरणे इगुपधेति कः । बहुलाः कृत्ति
कास्तासामपत्यं वाहुलेयः स्त्रीभ्यो ढक् तारकं जयतीति तारकजित् । विशाखा नक्षत्रेण युक्तः काल इत्यण् तस्य
लुब्विशेष इति लुप् लुपि युक्तवद्व्यक्तिवचने इति प्रकृतिलिंगसंख्ये ततो विशाखायां जात इत्यर्थे संधिवे
लादीत्यण् तस्य श्रविष्ठाफल्गुनीत्यादिना लुक् किंतु जातद्विन लुकीति टापो लुकि विशाखः । शिखी मयूरो वाह
नमस्य शिखिवाहनः । षण्णां मातृणामपत्यं षाण्मातुरः द्वैमातुरवत् । शक्तेर्धरः । अन्यथा खजणः प्राप्तेः । वा
युपुराणे यस्मात् क्रीडति सोऽत्यर्थं कुमारस्तेन कीर्तित इति कुमार क्रीडायामिति धातोः पचाद्यच् कास्य तइति राम
कमेः किडु चोपधाया इत्यारन् प्रत्यये उपधायाश्चोत्वे कुमार इति तु व्याख्यास्तेन सदावालत्वाद्वा तथा च स्कांदे २६

त्रस्तेनभविता देवि महायोगबलान्वितः॥ सदा बालोऽथ सुभगो धर्मविद्धर्मवत्सल इति नारदवाक्यात् षोडशवर्षदे
शीयः नत्वन्नूढ तया कुमार इति प्रवादश्चादर्त्तव्यः यतोनेन देवसेना व्यूढा तथा च वायुपुराणे शतक्रतोरूपव
त्नी देवसेनेति या सुता। सा महेंद्रेण रत्यर्थं भार्यात्वेनोपपादिता। तेदीर्णसेनापत्ये महासेनाय सुव्रतेति
क्रौंचेः क्विनिप्रज्ञाद्यणि क्रौंचमसुरं पर्वतं वा दारयति क्रौंचदारणः दृ विदारणे एयंतात्ल्युः क्रौंचपर्वतं वा
तथा च कैलासधनदावासे क्रौंचः क्रौंचोभिधीयत इति हृहद्धारावली इहापि द्वैरूप्यं। नन्तु दशकार्त्तिके
यस्य॥ [illegible]ति। इंदति परमैश्वर्यं करोति इंद्रः ऋजेंद्रेत्यादिना रक्। मरुतो देवा अनुचरत्वेनास्य संतीति
मरुत्वान् मतुप् रूय इति वत्वं तसौ मत्वर्थ इति भत्वात् पदकार्यजश्त्वाभावः। मह्यते मह पूजायामित्य
तः श्वन्नुक्षन्पूषन् इत्यादिना कनिनि मघवन्निति निपातितः मघवा बहुलमिति पक्षे त्रादेशात् सौदी
र्घाभावात् मघवन्निति हविर्जक्षिति निःशंको मखेषु मघवानसाविति भट्टिप्रयोगान्मघः सौख्यम
स्तीति मतुब् वंतोपि एवं मघवा मघवन् मघवानिति द्वैरूप्यं। वेवेष्टीति विष्ल्व्याप्तौ क्विपू विट् व्यापकमा

टी० १७

जोऽस्येति विडोजाः। सांतः। पृषोदरादित्वादकारागमे विडौजा इति च विड भेदने इगुपधत्वात्कः। विडं दैत्यानां भेदकमो
जोऽस्येति विडौजा इति स्वामी। पाकं वृत्रभ्रातरं शासितवान् ल्युः पाकशासनः। दितेर्गर्भमतिबलमसह्यं मत्वा ततः प्रवि
श्य कौनपंचाशत्खंडान् कृतवानित्यतो वा पाकानामर्भकाणां शासन इति तु कौमुदी। वृद्धेभ्यः शृणोतीति असुन् वृद्ध
श्रवाः। सांतः। वृद्धोपजीवीत्यर्थः वृद्धा हृद्दे हस्यन्ते शृणोतीति वा वृद्धे श्रवसी अस्येति तु स्वामी।। णासृ शब्दे वा कुल्नका
दीरच् नासीरा अग्रेसरास्ते शोभना अस्येति सुनासीरो द्विरंत्यः। तत्र सुनो वायुः शीरः सूर्यस्तावस्य स्त इत्यर्श आ
द्यच् अन्येषामपीति दीर्घ इति सुभूतिः प्रत्याहितालव्योपि एतत्पक्ष एव शोरिसुनाशीर शास्तशिवशं खा इति ता
लव्यादा वृषभविवेकः। आसुर्नासीरोस्येति पृषोदरादित्वादाकारलोपे सुनासीर इत्यन्ये। युद्धे पुरु नाम्नाऽसु
रेण हूत इति पुरुहूतः। ह्वेञ् क्तः। संप्रसारणं हल इति दीर्घः पुरुप्रचुरं कृतमाह्वानं यज्ञे अस्येति पुरुहूतः स्वा
मी। पुराण्यरीणां दारयतीति पूः सर्वयोर्दारिसहोरिति खच् वाचंयमपुरंदरौ चेति निपातितः।। जयनशीलो
जिष्णुः ग्लाजिस्थश्च क्स्नुः।। लेखा देवास्तत्र ऋषभो लेखर्षभो देवश्रेष्ठः सप्तमीयोगविभागात्समासः। लेखा

राम २

यं ऋषभ इवेति वा उपमितं व्याघ्रादिभिः समासः॥ शक्नोत्यतिशयेन जेतुं शक्रः स्फायितंचीत्यादिना रक्। शतं मन्यवो यागा अस्य शतमन्युः॥ दिवः स्वर्गस्य पतिर्दिवस्पतिः तत्पुरुषे कृतीत्यत्र बाहुलकाद् हलन्त्यपि षष्ठ्या अलुक् षष्ठ्याः पतिपुत्रेत्यादिना सत्वं॥ सुत्राम्णा त्रायते भुवनमिति त्रैङ् पालने आतो मनिन्क्विबित्यादिना मनिन् अन्येषामपीति दीर्घत्वे सुत्रामेति वर्णदेशना पाक्षिकं दीर्घत्वमिति रूपमंजरी॥ मते निर्णये च सुत्रामेत्यस्य ग्रहणात्॥ तं मात्राखिति॥ गोत्रा भूर्गिरी नूपकु भेदाश्छिनत्तीति गोत्रभित् भिदेः क्विप्॥ वज्रयोगाद्वज्री इनिः॥ वसूनि रत्नानि बहून्यस्य संतीति वासवः ज्योत्स्नादित्वादण् एवं वसोरपत्यं वा वासव इति मुकुटः स्वामी॥ वृत्रं हतवानिति वृत्रहा ब्रह्मभ्रूणवृत्रेषु क्विप्॥ वृत्रहा॥ वर्षतीति वृषा पृषु वृषु मृषु सेचने कनिन् वृषवृषितक्षिराजिधन्विद्युप्रतिदिव इति कनिन् सर्वनामस्थाने इत्यादिना दीर्घः॥ वास्तोः गृहक्षेत्रस्य पतिः रक्षिता वास्तोष्पतिरिति द्यावापृथिवी शुनासीर मरुत्वदग्नीषोम वास्तोष्पति गृहमेधाश्चेति निपातनात् षष्ठ्या अलुक् षष्ठ्याः पतिपुत्रेत्यादिना सत्वे इणः षः परत्वान्न इन्द्रमघ्या॥ सुराणां पतिः सुरपतिः॥ बलासुरस्याराति र्बलारातिः शच्याः पतिः श

चीपतिः। जंभमसुरं भेत्तुं शीलमस्य जंभभेदी णिनिः। शालिहोत्रे त्वश्वे कोशवालरोमाणि सुवर्णाभानि यस्य
तु। हरिः सवर्णोऽश्वः स्कपीतकौशेयसप्रभ इति हरिर्हयोऽस्येति हरिहयः। स्वः स्वर्गे राजते क्विप् पुरोरीति
रलोपे ढ्रलोप इति दीर्घः स्वाराट्। जंतः व्रश्चभ्रस्जेति षः जश्त्वं डकारः परोऽनुनासिकेऽनुनासिको वा न प
दांतादिति नकारस्य णत्वाभावः। नमुंवतीति नमुचिः मुचेर्ह्लमो कृण्ड् कृकृष्यादिभ्य इतीकुनाकवत् नञः
प्रकृतिभावः तं सूदितवानिति नमुचिसूदनः सूदक्षरणे नंद्यादित्वात् ल्युः अनुदात्तेत स्व हलादेरि
ति वा युच् सूददीपदीक्षश्चेत्यस्य नय इति योगविभागेनानित्यत्वान्न युचो निषेधः। संक्रंदयति दैत्य
स्त्रीरिति गर्भसंक्रंदितवानिति वा संक्रंदनः दारुणकर्मस्य मरुतो वा कदि क्रदि आह्वाने रोदने चेति ल्युः।
दुःखेन च्यवनं पतनमस्येति दुश्च्यवनः च्यवनमुनिनैकदाजितत्वात् दुःसहश्च्यवनोऽस्येति वा दुष्टं च्यवनं प
रदारेषु रेतःस्कन्नेर्वा चलनशापात्यादिति वा दुःखेन च्यवते रणादिति प्रादिसमास इति तु स्वामी। तुरं त्वरि
तं साहयत्यभिभवत्यरीन् तुरं वेगं वं तं सहत इति वा तुरस्त्वरितः सन् परबलानि सहत इति वा तुराषाट्। हांतः

छंदसि सह इति णिवः सहेः षाडः स्व इति षत्वं अन्येषामपि दृश्यत इति दीर्घः तुरासाहावित्यादौ तु साडुरूपाभा
वान्न षत्वं। महामेघा गजरूपधारिण ऐरावतादयो वाहनमस्य मेघान् वाहयति चालयति वा मेघवाहनः इंद्रो हि मेघा
नाविश्य वर्षतीत्यागमः। आखंडयत्यरीनित्याखंडलः खडखडि भेदे वृषादिभ्यः कलच् आभवः क्रियंत्यत्रेति डः
ऋभुक्षः स्वर्गः सोस्याश्रयत्वेनास्तीति इनिः ऋभुक्षा इति कौमुदी ऋभुक्षो वज्र इति धातुपारायणे पूर्णचंद्रः इति
ऋभुक्ष ४ स्वर्गवज्रयोरिति विश्वः अर्थैर्भुक्षि न जितितु स्वामी ऋभून् देवान् क्षिपति कार्येषु व्यापारयतिष्ट घोद
रादिरिति तु पंजिका। इतोत्सर्वनामस्थाने इतीकारस्यात्वं पथिमथि ऋभुक्षामादिति नकारस्यात्वं ऋभुक्षाः
पथिशब्दवद्रूपं पंचविंशतिः इंद्रस्य॥ तस्य त्वित्यादि पुलोम्नः सुतेजीता पंचम्यामजातावितिडः पुलोमजा पौलो
मीत्यपि शाचतिव्यक्तं वक्तीति शच व्यक्तायां वाचि सर्वधातुभ्य इतीन् शचिः कृदिकारादिति ङीष् शची नालव्या
दिः सर्वेनित्वि येषु सचते समवैतीति सच समवाये सर्वधातुभ्य इः रिति इन्ह्यन्ये सचिः सचीति दंत्यादीति पंजिका।
इंद्रस्य स्त्री इंद्राणी इंद्रवरुण इति ङीष् आनुकौ अत्र किं कर्तव्ये दीर्घाकारमात्रकं शास्त्रिन ज्ञापयतीयतो विहितं न

२८

टी
९

तोन्यत्रापि भवतीति तेन कीर्याणी गिर्याणीत्यादि सिद्धं भवतीति धातुपारायणे अत एव लेखर्षभोप्यथ शचीस्यादिंद्रा
णी शतावरी चारुधारा महेंद्राणी शक्राणी जयवादिनीत्तिरभसः ॥ तस्येति प्रासादो वैजयंतइत्येतत्पर्यंतसुत्रेयं
त्रीणींद्रपत्न्याः ॥ नगरीति अमराः संत्यस्यां मत्वुपि मतोश्च बह्वचोऽनजिरादीनामिति दीर्घः अमरावती एकं ॥ ह
यइति उच्चैः श्रवसी अस्य उच्चैः शृणोतीति वा उच्चैः श्रवाः असुन्नंतः वा शरीति पक्षे विसर्गस्य सत्वं तस्या पिस्त्र
त्वे शकारः एकं ॥ सूत इति धात्तू नामनेकार्थत्वात् मतंगगतिः मतंलातीति मातलिः बहुलवचनात्कर्तरि क्तिः
पृषोदरादित्वादाकारः मतलस्यापत्यं मातलिर्वा एकं ॥ नंदनमिति नंदयतीति नंदनं ल्युः एकं ॥ स्यादिति प्र
शस्ता वैजयंत्यः पताकाः संतीति अर्शआद्यच् वैजयंतः विजयत इति विजयंतो विष्णुः तृभूवहिवसिभासि
साधिगंडिजिनंदिभ्यश्चेति झच् तस्यायं वैजयंत इति स्वामी इंद्रगृहस्यैकं ॥ जयंत इति जयतीति जयं
तः तृभूवहि इत्यादिना झच् झोंत इत्यंतादेशः पाकशासनस्यापत्यं पाकशासनिः द्वे इंद्रपुत्रस्य ॥ ऐरावत इति
इरावत्यब्धेर्भव इत्यणि ऐरावतः इरावती कश्यपजाऽनपत्या पुलहप्रिया तया संभृतत्वाद्वा तथा चागमः इरा

डि२

राम
२९

[illegible] इरावत्या सुतः पुत्रस्यार्थे ऐरावतस्तत इति। अ
भ्रात्मकौमारतेगोमध्यपदलोपी समासः। ऐरावत एव ऐरावणः पृषोदरादित्वान्नस्य णः। अभ्रमोर्वल्लभो ऽभ्रमुवल्ल
भः च त्वार्यैरावतस्य॥ ह्रादिनीति ह्रादत्यवश्यं ह्राद अव्यक्तशब्दे आवश्यके णिनिः ह्रादिनी ह्रादः स्फूर्जथु रस्या
अस्तीति ह्रादिनी अत इनिठनौ इति तु स्वामी। वज्रतियात्येव न प्रतिहन्यत इति वज्रं चाग्रेंडेतिरक्। अस्त्रीति कुलि
शेनैवान्वीयते वज्रो स्त्री हीरके पवौ विति नानार्थवत्प्रमाणत्वात् अस्त्रियो वज्रकुलिशौ दंभोलिरशनिर्द्वयोरिति
संसारावर्तः कलिंगस्त्वित द दृष्टान पुंसके कुलिश शतधारे इति रत्नकोषं पश्यन्न स्त्रीति वज्रेण संवध्नन्कु
लिशो मम वक्षसीति भट्टि मृणाकुलयति स्म कुलिर्हस्तो भुजा दल इति त्रिकांडशेषः कुलो हस्ते शेत इति ड
प्रकरणेऽन्यत्रापि दृश्यत इति कुलिशं कुलिनः पर्वतान् श्यति पक्षच्छेदेन तनूकरोति कुत्सितं लिशतित
नूकरोतीति वेति तु स्वामी भिदनशीलत्वाद्भिदुरं विदिभिदिच्छिदेः कुरच् कर्मकर्तरि चायमिष्यत इत्यत्र च
कारः कर्तरीत्यनुकर्षणार्थः तेनाकर्मकात्कर्तर्यपि भवतीति वामनः तथा च गुरुमत्सरच्छिदुरयेति माघः के

२८

टी
१०

विदुभिदिरभिदिति पवंतिन त्रइषिमदीत्यादिना किरच्चाप्रुनाजीति पविः हीरकस्य पविवत्वोक्तेः पुन्नानेरचक्रः
वज्रोस्त्री हीरके पवावित्युक्तेर्नसांतत्वाशंका। शतानि दशशतानि कोट्यो धारा अस्येति शतकोटिः शतंव
ह्य: कोटयोस्येत्यन्ये। स्वरत्युपतापयतीति दैत्यान् स्वरुः स्वृ शब्दोपतापयोः। स्वृस्ति हि त्रथसि वसि हनि
क्लिदिवंधिमनिभ्यश्चेति उः। सुशोभनान्यरूंषि धारा अस्येति वा सांतइतिस्वामी। शमयति शंवः। अन
र्भावितण्यर्थाच्छमेर्वन्निति वन्। शंसुभमस्यास्तीत्यमेघत्वात्कं शंभ्यां वभयुस्तितुतयसइति वः। ताल
व्या अपि दंत्याश्च शंवशूकरपांशव इत्यूष्मविवेकाद्दन्त्यादिरपि। दंभादाटोपात् लीयते श्लेषयतीति दं
भोलिः पृषोदरादिः दभ्नोतिखेदयति उलिप्रत्यये दंभोलिरितिस्वामी अत्र स्वरुदंभोली शंवसाहच
र्यात् पुंलिंगौ स्वरुसाहचर्यात् शतकोटिः ततसाहचर्यात् पविरिति बोध्यं अन्यत्रतु पविर्द्वयोरित्यु
क्तं। अश्नाति शैलानश्यते भुज्यते स्वाराज्यमनेन वेन्वनमनेनवेत्यशनिः। अर्तिसृधृधम्यम्यश्यवितृभ्यो
ऽनिः। नशनैर्यातिवा ऽशनिरितिस्वामी वज्राशनिरितिसमुदितं नामास्य वज्राशनिं विदुर्वज्रमिति

राम
२०

कांडशेषादथवज्राशनिर्द्वयोरितिनामनिधानाच्च ॥ दशवज्रस्य ॥ व्योमेति व्योम्नि यांत्यनेनेति व्योमयानं कर
णेल्युट् । विशिष्टं मानयंत्यनेनेति करणे घञ् विमानः विमाति वर्त्तेनेस्मिन् देवा इति तु स्वामी । द्वे देवरथस्य ॥
नारदाद्या इति नारदाद्याः सुरर्षिशब्देनोच्यंते आद्येन तुंबुरुभरतपर्वतादेर्ग्रहणं नरस्य धर्म्यं नारं नराच्चेति
वक्तव्यमित्यण् तद्ददातीति नारदः यद्वा नारं पानीयं पितृभ्यः सदा ददाति नारदः तथा चागमः नारं पानीयमित्यु
क्तं तत्पितृभ्यः सदा भवान् । ददाति तेन ते नाम नारदेति भविष्यति एकं ॥ स्यादिति शोभनो धर्मोस्यामिति
सुधर्मो धर्मादनिच् केवलादिति नकारांतात् सुधर्मामिवंतोसकौशिकां विंध्याटवीं विवेशेति वासवदत्ता
यामावंतत्वे समासांतो विधिरनित्य इति कृत्वा यहोः डाबुभाभ्यामिति डाप् अत्र तु अन्नेभ्योऽपि दृश्यत इत्र
नो वृद्धी हेरिति प्रतिषेधः देवानां सभा देवसभा इंद्रस्य स्थानगृहं अत एव देवसभेत्यत्र शाला चेति न
क्लीबत्वं नापि सभा राजामनुष्यपूर्वेत्यमनुष्यशब्दस्य रूढः पिशाचादिषु रूढत्वादिति ॥ पीयूषमिति पीयत
इति पीयूषं पीयूरिति सौत्रो धातुः पीयेरूषन् । न म्रियंते नेनेत्यमृतं तनिमृङ्भ्यां किच्चेति तन् किच्च । अवि

टी·

ध्मानं मृतं मरणमनेनेति तु स्वामी। सुखेन धीयत इति सुधा धेट् पाने आतश्चोपसर्ग इत्यङ्·ति पूर्वटीकाकृतस्तद्
युक्तं कर्मण्यङोऽभावात् द्वितीयमावश्यहणस्य कारकाधिकार निवृत्त्यर्थत्वात् तस्मात् सुष्ठु दधाति पुष्णाति शरीर
मिति प चाद्यजं नादाप् सुधेति तु वस्तेश्वरः त्रीण्यमृतस्य॥ मंदेति मंदमकिंतु शीलमस्या मंदम कत्यव श्यमिति वा
मंदाकिनी त्र्यक कुटिलायां गतौ णिनिः खजेराक इत्यत्र वकुल वचनात् मंदते राके मंदाकानि स्नोनां सि संत्यस्यां मं
दाकिनी वियद्गंगेति तु धातुपारायणे मंदना म्नः सरसोऽकति मंदाकिनीति तु कौमुदी। वियतो गंगा वियद्गंगा। स्वः
स्वर्गस्य नदी स्वर्णदी वा प्रकरणे गिरिनद्यादीनामुपसंख्यानमिति पूर्वटीकाकृतः वयं तु तत्र गिरिनदी वक्रनदीव

३७

क्रनितं वेत्युदाहरणत्रयमेव दृष्टवंतस्तेन स्वर्णदीत्यत्र पूर्वपदात् संज्ञायामिति नित्यमेव णत्वमिति कौमुद्युक्त
मेव पश्यामः यत्तु पुरुषोत्तमेन स्वर्णदी विभाषा वृत्तावुदाहृतं तत् दमूलेकानंत्र रसवज्जुमरादि व्याकरणे षु च
णे तु च स्वर्णदीति नित्यणत्वदर्शनात्। सुराणां दीर्घिकेव सुरदीर्घिका। चत्वार्याकाशगंगायाः॥ मेरुरिति मातिमा
नं गच्छतीति मा मानेमा पोरुरिच्चेति रुः इकारस्यांतादेशः गुणः मेरुः मिनोति क्षिपत्युच्चत्वात् ज्योतींषि मेरुरिति

मातिमानेनतछ[illegible]नायोतारिखेतितः इकारस्यानादेशः सुराः मेरः [illegible]मितोगिरिरिति स्वामी। सुरनचिकार्थे इंद्रमहें
द्रवत्सुमेरुः सुमेरुरित्यनेनान्योपसर्गानिवृत्तिस्क सर्वेश्वरः॥ हेमप्रधानोद्रिर्हेमाद्रिः शाकपार्थिवादिः उलोपइति
दीर्घः हेमाद्रिरिति वा। रत्नानि सानावस्य रत्नसानुः रत्नप्रधानः सानुरिति वा। सुराणामालयः सुरालयः॥ पंचकेसु
मेरोः॥ पंचैत इति मंदते मोदयति मदिक्कनि मोदमदस्वप्नगतिष्विति यनोऽ मिमदिमंदिस्य आरन्नित्यारन्नुमंदारः
मंदा आराधारास्य सरलत्वादिति श्रीधरः॥ समुद्रपारे जातः पारिजातः पृषोदरादिः स्वार्थे कन् पारिणः पारवतोऽब्धे
र्जात इति तु स्वामी पारिजातो जन्यत्वेनास्यास्तीत्यर्श आद्यच् पारिजातः समुद्रः तत्र भव इत्यण् पारिजात इत्यन्ये।
सम्यक्तनोति फलमिति तनोतेर्ण उपसंख्यानमिति णः तननं तानः रोधस्य सम्यक्तानोस्येत्यन्ये सम्यक्तन्यंते
पुष्पाण्यस्मिन्नित्यधिकरणे घञित्यपरे। कल्पः संकल्प इच्छा तत्फलको वृक्षः कल्पवृक्षः कल्पः संकल्पितोर्थस्त
स्य वृक्ष इति त्वन्ये कल्पस्थायी वृक्ष इति वा कल्पः संकल्पस्तस्य वृक्षः जन्यजनकसंबंधात् कल्पवृक्ष इति तु
माधवी। चंदत्याह्लादयति नंद्यादित्वात् ल्युः चंदनं हरेश्चंदनं हरिचंदनं चदि आह्लादने दीप्तौ च वा खुसीत्यु

टी॰ ३२

क्तेः हरिचंदन इत्यपि पंचानां देववृक्षाणामेकैकं नाम॥ समदिति हंसगो द्रुहिणः सनदिति ब्रह्मपर्याये रभसः
तस्य कुमारोऽपत्यं सनत्कुमारो दंत्यादिः सनन्नित्यं कुमार इति तु स्वा॰मी॥ विधातुरपत्यं वैधात्रः अण विष्णुशिव
पत्सा वे कामदेव विनायकवद्धंतु योग्यस्यास्य वैद्यसंहिताप्रणेतृत्वात्स्ववैद्यपर्यायसंनिधौ कथनमिति टी
काकाराः देवसृष्टपुत्रस्य॥ स्ववैद्याविति स्वः स्वर्गस्य वैद्यौ स्ववैद्यौ। वडवारूपिणी संज्ञारूपे योगादश्विनी तस्याः सु
तौ अश्विनीसुतौ। संज्ञा च सूर्यस्त्री उत्तरकुरौ दृता स्वरूपात पस्यायासीत् सूर्योपि तत्संगमेच्छुस्तुरंगरूपी समी
पमगात् स च तयान्यपुरुषधिया निरस्तः सन्नूतत्रासापुटद्वये रेतोऽभ्यषिंचत् ततस्तौ जातावित्याश्वयं पर्व अतो ना
सांत्यक्तवेनावित्यन्येभ्योपि दृश्यत इति डः॥ आपोः संज्ञाछंदसोर्वहुलमिति डुस्वत्वं नासत्यौ यद्वा अत एव नासा
भवत्वात् सुसाध्वसत्यौ तत्र साधुरिति यत् न सत्यौ असत्यौ पुनर्नञ्समासेन भ्राण्णपादित्यादिना नञः प्रकृ
तिभाव इति तु स्वामी॥ द्वौ वाडवेयौ नासिक्यावितिनामनिधानं॥ अश्विन्यां जातावितिनक्षत्राणेन दक्षेभ्यो वहुल
मितिलुकि लुक्तद्धितलुकीति ङीपो लुक्॥ अश्विनौ नातोङ्क्स्वादी सदाश्वारूढत्वादश्वयोगादश्विनावितितु स्वामी॥

हय

३३

राम ३२

दस्यतउत्क्षिपतोरोगानितिदस्रौसदंत्यौनसुउत्क्षेपेदसुचेत्यनःस्फाथितंचौ।तिरक्।अश्विन्याअपत्यमितिस्त्रीभ्योढक्
ति आश्विनेयौ।सर्वएवामीनित्यद्विवचनांताःअतएवाह।ताउभावितिउभावित्याविष्टद्वित्वादेकवचनाभावइतिस्वा
मीयद्यपिदेव्यांतस्यामजायेतांनासत्यौदस्रएवचेतिमार्कंडेयपुराणएतेवयंद्वैरिपुस्तथैतौनासत्यदस्रौवरुण
स्तथेतिवायुपुराणेउत्पन्निन्यांचवैवस्वतोमनुर्नामयमौचयमुनायमौ।नासत्यदस्रेरेवंताःषट्संज्ञायांरवेःसु
ताइतिव्याडिरितिभेदःतथाप्यनयोरेकात्मकत्वात्समानसर्वप्रकारत्वाच्चाभेदोपियथाभारतेउभावेतौनसे
माहौंनासत्याविितिमेमतिः।तथाचमाघेअनुसस्त्रुतस्तमथदस्रयोःसुतौवि।तियदाहिनासत्यउपचाराद्द
स्रोपिवर्ततेतदानित्यद्विवचनांततानत्वेकवृत्तिःयच्चनभ्राजपादित्याद्विसूत्रेनासत्याइत्येकस्मिन्नासत्येव
हुत्वमारोप्यतैंहुवचनंतच्चारोपितवहुत्वमेकस्मिन्नपिवहुवचनंभवतीतिज्ञापनार्थंतेनगुरुषित्याद्युपपन्नंभ
वतीतिकौमुदीयमजत्वात्तद्वित्वमित्यन्येतथाचमागुरिःनासत्यदस्रौयमजावाश्विनौयमावितिएकत्वमपि
दीप्यमानंततःस्थूलमश्वीसुविपुलंदृढमितिमारतोक्तेः।।वडश्विनीसुतयोः।।[illegible]यामितिअप्सरसइतिपूर्वमेव

व्युत्पादितं वङ्क्षुषितिवङ्क्षुत्वे प्रायेण प्रयोगदर्शनादित्युक्तं एकवचनेपि चयोर्द्वितीयाः शरिपोष्करसादेरिति वक्तव्य
मित्यत्र वामनेनाप्सरा इत्युदाहृतत्वात् स्त्रियां वङ्क्षुषप्सरसः स्यादेकत्वेऽप्सरा अपीति शब्दार्णवाच्च । सुभं याशब्दवक्षूपं
सांद्रवाणपटसंवृतमूर्तेर्दन्तिदंतशयनीयशयस्य । मानिनः कुलवधूरिव रागादप्सरा व्यथितपार्श्वमसून्यमिति
प्रयोगः । स्वः स्वर्गस्य वेश्या स्ववेश्या उरून्महतो वष्टि कामयते वशीकरोति वा वशकांतो अच् गौरादित्वात् ङीष्
पृषोदरादित्वादुकारलोपः ऊरू अश्नुते व्याप्नोतीति नारायणोरुभवत्वात् पृषोदरादित्वात् ह्रस्वत्वे इकोयणचीति
यणादेशः पूर्ववदन्यदिति स्वामी एवं ह्रस्वादिस्त्रीलिंगांत तथा च शतपथे उर्वशी ह्यप्सराः पुरूरवसमैलं च
कमे इति माघे च दधत्युरोजद्वयमुर्वशीतलं भुवो गतेव स्वयमुर्वशीतलमिति ऊरौ उषितेति वस निवासे इत्य
त्र ऊर्वसी दीर्घादिं त्याता पृषोदरादित्वात् व्युत्पादितेति वर्णदेशनात् यावहरिवंशे नारायणोरुं निर्भिद्य
संभूता वरवर्णिनीति सुखशब्देनाद्यर्थेन रंभामेनकादीनां ग्रहणं ॥ वेउर्वश्यादेः ॥ हाहेति गायन् हाइति कु
त्सितध्वनिं जहाति हाहाजहाते विंचूशासाद्यवि आकारलोपे हाहाः । हाहा हेत्यादिः हूहू इति हान्त्वाक्यतीति हू

हूः क्वेऽत्र स्यद्वीयांशद्वेच क्विपू वच्यादीनां संप्रसारणं हलः ॥ इति दीर्घः संप्रसारणाच्चेति पररूपत्वं अव्युत्पत्ति
पक्षे तु सह एन विष्णुना वर्तत इति पुंलिंग सा शब्दवत् हाहाः पुंलिंगः । कर्कू शब्दवत् हूहूः क्विवंतत्वाभावेना
[illegible]न्तत्वात् द्वितीयाबहुवचने हाहानिति रादेशे तु आतो धातोरिति योगविभागादाकारलोपे पूर्ववद्रूपं बहुत्व वच
नात् मिथुने असिरित्य सो हाहाः सं तोपि गंधर्वः पीति हाहसोरिति संसाराव तात् गंधर्वो हाहसिप्रोक्त इति र
त्नकोशाच्च हाहा हूहूरित्येवं नामेत्यन्ये केचित्तु हहा आदिकस्तोऽव्युत्पन्नो हुहुरा घंतक्ष्वापीत्याहुः तथा
च गीतमाधुर्यसंपन्नौ विख्यातौ च हहाहूहू इति व्यासः हंसो हहाहूहूश्च वैरोटषण स्वश्वंतु तुंबुरुरिति शाश्वत
वः आद्येन तुं तुंबुरु विश्वावसु चित्ररथादि ग्रहणं। गंधर्वः प्रागुक्तः गंधर्वः पृषोदरादित्वात्तदीयो दिरपि तथा
च अपि गंधर्वे गांधर्वे दिव्यगायन गानवइति शब्दार्णवः श्रृंगारप्रकाशे हाहाहूहूश्च द्वयोरव्ययत्वमप्युक्तं ।
हेदेवगायनविशेषस्य ॥ अग्निरिति अंगत्यूर्ध्वं गच्छतीत्यग्निः अगिरगिलगिगत्यर्था अंगेर्नलोपश्चेति नि
र्नलोपश्च । विश्वानरस्यापत्यं वैश्वानरः विदादित्वादञ् बहुत्वे तु कि विश्वानराः । वहति हव्यमिति वह्निः

वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो निदिति निः वीतिरशनं होत्रं हविरस्य वीतिहोत्रः वीतिर्होत्रं हवनेस्येति वा वी
गतिप्रजनकान्त्यसनखादनेषु कर्मणि क्तिन् वीतयोऽस्य होत्रं हवनमस्येत्यागमइति स्वामी धनमिच्छेद्धु
ताशनादिति धातूनामनेकार्थत्वात् धनं जयति यथेष्टं ददातीति धनंजयः मृत्युंजयवत् साधनेषु धनं जित
वानायत्तीकृतवान् ततो धनमभिलष्यत इत्यागमइति वा धनमिच्छेद्धुताशनादित्यागमात् कृपीटमुदरे
जलमितिरत्नकोषः कृपीटं जलं योनिरुत्पत्तिस्थानमस्येति कृपीटयोनिः अद्भ्योग्निर्ब्रह्मणः क्षत्रमश्म
नो लोहमुत्थितमिति मनुः कृपीटस्याम्भसो योनिर्धूमजत्वान्मेघानां अग्नेरापस्ताद्भुतिः सम्यगिति स्वते
रितिभट्टिः ज्वलतीति ज्वलनः माध्वील्येहबचं क्रम्येत्यादिना युच् जाता वेदास्त्वदर्थं चेज्जातवेदास्ततो ह्य
सीति भारते जातं वेत्तीति वा गतिकारकयोः पूर्वपदप्रकृतिस्वरत्वं चेत्यसिः जातवेदा अस्माज्जातवेदाः
इषोदरादित्वात्संत इति मुकोसुदी ततोतेरौणादिक ऊः तनूः नपादिति नभ्राणपादिति सूत्रे निपातितः
अतनूं धनं विना क्षणमपि तन्वाः शरीरस्य नपात् तनूनपात् नपातीति निपातनान्नविरक्षणमस्येति कलिंगाः त

तनूनपात्तांतः ॥ शक्रं तनूत्येके तनूनपात् तनूनपांतौ आगमशासनानित्यत्वान्नुमभावेनांत इत्यन्ये ॥ तनूं पा-
तयति देहवर्तित्वादिति स्वामी तन्वा क्षनं पाजीति तनूनपं घृतादि तदत्तीति दांत इति तु रामदासटीका देहे
नन्नोपश्चेत्तीस्त्र वर्हिः सांतः पुंलिंगः ॥ वर्हिरुक्तो वृहद्भानुर्वीतिहोत्रो धनंजय इत्यमरमाला ॥ शुक्लोडेपावा-
त्वमहस्वामीत्याह वर्हिः शुष्मेति व्यस्तसमस्तं नाम वर्हते वर्हिः यथा वर्हिर्मुखा देवाः वर्हिर्दर्भः ॥ शुष्म वल-
मस्येति यथा शुक्रो वैश्वानरो वर्हिर्वर्हिः शुष्मा तनूनपादिति माद्याणिवादिति कोमुदीकारस्तु शब्दार्णवा-
देव वर्हिः सांतः ॥ ~~वर्हिः सांतः~~ ॥ वर्हिरिदंतः शुष्मेति नांतः पृथगित्याह ॥ शोषयति जलमिति शुषेर्नि-
र्जंतादन्येभ्योपीति मनिन् संज्ञापूर्वकत्वान्न गुणः शुष्मा नांतः शुष्यत्यनेनेति तु स्वामी शुष्मणि घृण-
यनाभिसंस्कृत इति माघः अविसिविशुषिभ्यः किदिति मन् शुष्मोऽग्निरित्युणादौ वदंतोपि ॥ कृष्णो
धूमो वर्त्मास्येति कृष्णवर्त्मा नांतः ॥ शोचींषि ज्वाला अस्य केशा इवास्येति शोचिष्केशः नित्यं समासेऽनुत्तर-
पदस्थस्येति षत्वं ॥ उषः प्रभाते संध्यायामिति विश्वः उषसि संध्यायां बुध्यते प्रकाशते उषर्बुधः इगुप-

इदत्ती ॥

वत्वात्‌ कः। अहरादीनां पत्यादिषु भाषया रुर्वा रेफो वेति व्यवस्थित विभाषया नित्यं रः। आश्रयमा
धारमश्नातीत्याश्रयाशः। आशेरतेऽत्रेत्याशयः आधारस्तमश्नातीत्याशयाश इति तु स्वामी। उभयत्रा
पि कर्मण्यण्‌। वृहतेर्भानवोऽस्येति वृहद्भानुः। कृष्णातीति कृशानुः कृशतनूकरणे ञ्नत्यान्त्वनि
अग्निः अर्चिर्मदिः अति अंगि कृपुकृशिभ्यः कन्निः वृं वृञ्‌ अ किञ्च् इ षवृङ् शवृ स्य नृ इयिनृ उलि अस
आस भ्रातुं कृ इत्यानुकृ कृशो ध्यानिति वर्त्तते कृशानुरिति स्वामी कृशानुर्मध्यतालव्यः वैश्यः किं शास
दश्विकृशलं कृशानुश्वेति मध्यतालव्य ऊष्मविवेकात्‌। पुनातीति पावकः पूञ्‌ ओराद्वुलु। अनिति प्रा
णित्यस्मादानयति वा अञ्चेति धातो रंतभावितण्यर्थाद्ध्यादित्वात्‌ कल च अनल अनित्यनेनेत्यन
ल इति तु स्वामी। लोहितवर्णोऽश्वोऽस्येति रोहिताश्वः तथा च शालिहोत्रे वरुणस्त्वसितानश्वान्‌ कुवे
रः कुमुदोपमान्‌। हुताशनः किंशुकाभान्‌ वायुर्वर्णैस्तथा रुणान्‌। रोहितास्त्वगो श्वा वाहनमस्येति

श्रीधरः। वायुः सखानुचरोऽस्येति वायुसखा अनडु सोविति अनडु अनतत्पुरुषत्वाहजभावः। तत्पु

त:२

४

रुषेन्तु राजाहः सखिभ्यष्टजिति टच् विवा पुंसखोपीति कौमुदी। शिखा अस्य संतीति शिखावान् तांतः। आशोषु
मिछत्या ङ् पूर्वात् तप्यतेः सन्नंतात् ईडि प्रुषे सनश्च दसीत्युनिः भाषायां च दृश्यते आशुशुक्षणिः हिंतालवेः।
हिरण्यं रेतोस्य हिरण्यरेताः तथा चाग्नेरपत्यं प्रथमं सुवर्णमिति श्रुतिः अग्निनाहुतस्य रुद्ररेतसः शेषमुल्व
जातं तच्च सुवर्णं जातमिति हिरण्यरेताः। हुतं भुंक्ते हुतभुक् जातः। दहतीति दहनः ल्युः। देवान् हव्यं वाह
यति प्रापयतीति स्वयं वा प्राप्नोतीति हव्यवाहनः हव्ये ऽनंतः पादमिति वहेर्युट्। काली कराली मनोजवा सु
लोहिता सुधूम्रवर्णी स्फुलिंगिनी विश्वदासाख्याः सप्त वह्नेर्जिह्वाः मार्कंडेयपुराणे क्तास्ता सामर्चिः स्वभावा
ताः सप्तार्चिषोस्येति सप्तार्चिः। दमु उपशमे अस्मादेतभीवितएय थीत् दमेरुनसदाम्यतीति दमुना इति स्वामी द
मूना इति दीर्घमध्योपि दमूना दमुनाः प्राचीनवर्हि सुचि वर्हिषावित्ति नाम निधानात्। शोभयतीति शुक्रः
ऋज्रेंद्राग्राहिनानिपातितः शुक्रं रेतोस्यास्तीत्यर्शआद्यच् विशुक्र इति तु स्वामी। चित्रा विचित्रा भानवोस्ये
ति चित्रभानुः वैचित्र्यं तु जिह्वारूपार्चिषां भेदात् अत्र पूर्वपदादिति नणत्वं क्षुभ्नादेराकृतिगणत्वात्। विभाव

सेववसुधनमस्यविभावसुःविशेषेणभांतोवसवोरश्मयोस्येतितुकौमुदीशोचयतिशोधयतीतिशुचिः
शुचशोकेऽनर्भौवितएयथात्सर्वधातुभ्यइन्।अपांपित्तमिवदाहकत्वादप्पित्तंवाहुल्लकादलुगपिसौघि
पांगौरपांपित्तमिंधानःशर्वरीनयेदितिप्रयोगात् [illegible]स्त्रिशब्दामान्यग्नेः और्वस्त्विति उर्वस्यऋषेरपत्यं औ
र्वःविदाधज्ञोवङ्कत्वेतुकिउर्वीइत्यादिवरुणभयान्मात्राऊर्वोर्गोपितत्वादित्यन्यइतितुस्वामी उर्वेणकि
ल्पायोनिजपुत्रार्थिनातुरुमंथितस्तत्रज्वालामयःपुरुषोजातस्तस्यवसमुद्रआधारआसीदितिश्रुतिः
अयमेववडवामुखभवत्वात्वाडवःभवार्थेऽण्।वडवानलइत्याधाराधेयलक्षणःसंबंधः॥और्वादित्रयं
वाडवाग्नेः॥वह्नेरितिज्वलतीतिज्वालः ज्वलितिकसंतेभ्योणः॥स्त्रियांज्वाला।कीलबंधेकीलतिवध्नातिगं
त्रुंनदहातिकीलइगुपधत्वात्कःस्त्रियांकीला।अर्च्यतेऽर्चिः अर्चपूजायां अर्चिशुचिहुसृपिछादिछर्दि
भ्यइसिरितीसिः अर्चिःसोनाइनित्विदंताप्रिरजनिधमनिकाकिच्यर्चिशुंव्यःपुरंध्रिरितिऊीषुविषयेचवाच
स्यतिःस्त्रियामित्यर्चिराहिभिःसंबध्यतेस्त्रीत्वत्वर्चिषःत्राधिकेज्वालाभासोर्नपुंस्यर्चिरितिनानार्थेक्लीवत्व

कथनात्। हिनोतीति रक्षतो गाह्वतीति हेतिः हिगतौ ऊतियूतिसातिहेतिकीर्तयश्चेति निपातितः क्तिन्नन्तः शेत इति
शीङः कि हस्वश्चेति रवः शिखा अत्र केचित् इङः प्रक्रमाह इङ्गेलीभेव इङ्गेरिति नियमार्थं ज्वाला स्त्रिपंचकमग्नेर्ज्वालायां ना
न्यस्येति तदयुक्तं ज्वालाभासोनपुंस्यर्चिरिति नानार्थं द्युतिमात्रे पाठात् हेतिः स्यादायुधज्वालासूर्यतेजःसु योषिति
हेतिः सूर्यतेजसि च दर्शनात् अन्ये तु ज्वालाकीलयोर्नियमार्थमिदमित्याहुः तदयुक्तं शिखायाः अपि वर्णिर्मात्र
वृत्तेः शिखा ज्वाला बर्हिचूडा लांगलकयग्रमात्रक इति कोषदर्शनात्तु वयं तु ब्रूमः पंचैव वाचकानि अर्चिषः व
ह्नेरिति तु तेजोमात्रवाचिकात्वं विशेषेणाग्निद्युतौ वर्त्ततेधातुरिव गैरिक इत्येतत्तस्य वार्थमिति पंचाग्नि
शिखायाः॥ त्रिषु इति स्फूतास्फूत्कारेण लिंगतिगच्छति स्फूलिंगाः लिगिगत्यर्थः अत्र पृषोदरादित्वाह्रस्वो यो
ह्रस्वश्च स्फुले भावे स्फुलिंगच्छति खच् मुम् च डित्वस्फुलिंग इति त्वन्यः स्फुशब्द एव स्फुत्कारः शह्निरिति तु कलिं
गः त्रिषु इति स्फुलिंगजातावपि स्फुलिंगा अजादि पाठात् डीप् कंदरावत्। अग्नेः कणोग्निकणः हे अग्निकणि
कायाः॥ संताप इति संतापनं संतापः घञ्। संज्वरयतीति संज्वरः अत्र समो समार्थौ समलिंगो है संतापस्य।

अ॰टी॰
३८

धर्मराज इत्यादि यथापराधं दंडदानाद्धर्मोऽस्यास्तीति धर्मः स चासौ राजा चेति धर्मप्रधानो वा राजा वा धर्मराजः ट
च्‌ धर्मस्य राजेति तु स्वामी ॥ पितॄणां कव्यवालादीनां पतिः पितृपतिः ॥ शत्रुमित्रयोः समं वर्त्तितुं शीलमस्येति
समवर्त्ती णिनिः ॥ परेतास्मृतास्तेषु राजत इति सत्सूद्विषेति क्विप् परेतराट् ज्ञांतः ॥ कृतांतो विनाशोऽनेन कृ
तांतः निष्ठेति पूर्वनिपातः ॥ यमुना यानघाभ्राता यमुनाभ्राता नञ्‌दंतः ॥ शमयतीति शमेर्ण्यंतात् ल्युः ॥ यम
मृत्युप्रभृतयोऽस्य किंकराः तेषु राजत इति यमराट् पूर्ववत् यमेन संयमेन राजत इति स्वामी ॥ यमयती
ति यमः यमयोगाद्वा ॥ कलनं प्राणिनां धर्माधर्मौ वेत्ति कालः कल संख्याने इति भौवादिकात् बहुलवचना
त्कर्त्तरि घञ् कलयत्यायुरिति स्वामी ॥ कालाख्यस्य दंडस्य धरो दंडधरः ॥ श्राद्धं श्राद्धं पितृक्रिया तद्देशभागि
त्वासि तत्पतित्वाद्वा श्राद्धदेवः ॥ विवस्वतोऽपत्यं वैवस्वतः ॥ अण् ॥ अंतं करोतीति अंतकः तत्करोतीति णिजं
तात् ण्वुल् ॥ चतुर्दश यमस्य ॥ राक्षस इति भीमत्वात् रक्षंत्यस्मादिति रक्षः ॥ रक्षपालने ऽसुन् प्रज्ञाद्यणि राक्ष
सः स्वार्थिकाः प्रकृतितो लिंगवचनान्यतिवर्त्तंतेपीति पुंस्त्व ॥ कुणपः शवस्तदशनं शीलमस्येति कौणपः ॥ शी

राम
३८

त्वमित्यण् ऋकुणपमत्तीति शेषः । किंतु कौमुदी कुणपारक्षोमातातस्या अपत्यमित्यन्ये । क्रव्यमत्तीति क्रव्यात् क
व्ये चेति विट् । क्रव्याद इति मांसवाचककृत्तविकृत्तशब्द उपपदे अदेः कर्मण्यण् पृषोदरादित्वात् कृत्तविकृत्तश
ब्दस्य क्रव्यादेशः । अदोऽनन्न इति सूत्रे वासरूपविधिना प्राप्तस्याणो निवृत्त्यर्थमिति न्यासः । कौमुदीकारादयस्तु
पृषोदरादित्वात् क्रव्यभावे कृत्तविकृत्तपक्वमांसभक्षः क्रव्यादः आममांसभक्षकः क्रव्यादिति जयादित्यानां
प्रमादः । नैर्ऋतः कर्बुरः क्रव्यात् क्रव्यादोऽस्रप आशर इति शब्दार्णवसंसारावर्त्तौ शब्दविशेषणे वदन्ति च पादि
ति हद्दु चेड्डः सोयं चंडेकल्लेकोहरु चंडस्यावतिसंधानदोषात् शब्दार्णव एव रक्षःपर्यायेष्वेवैतौ पठि
त्वापि पुनः क्रव्यादध्याये सहचारादक्रव्यादो वस्यात् क्रव्यादाममांसभुक्क्रव्यादः कृत्तविकृत्तपक्वमांसभुगु
च्यत इत्युक्तेः । तस्माद्राक्षसस्य रूढिरूपेण हि एते संज्ञे सामान्येन यौगिकत्वे तु जयादित्यश्च वस्थित्या ह्युः ॥ अ
स्रं रक्तं पिबतीत्यस्रपः । स दंत्यः । न अस्रपयति क्रव्यात्वादस्रप इति प वाच्यविशतालव्यापीति गोवर्द्धनो या
णादिवृत्तिः । सुराशीधोरित्युपसंख्यानात् आस्रप इत्यत्र गणपोष्टमिति न भवति । आष्टप्णात्याशरः स्पृहिं

ती।

सायं॰तालव्यशः। आशिरइतिपाठे अश्नातेरितिकिरच्। आशिरो ह्रस्वपूर्वः शंकुः क्रव्यादोस्त्रप आशर इति संसारा

वर्त्तः। रात्रौ चरतीति रात्रिचरः। चरेष्टः। रात्रेः कृति विभाषेति पूर्वेऽमुमि रात्रिंचरः। कर्बुरो वर्णेन। कर्व हिंसायामित्य

तो मद्गुरादयश्चेति निपातनात् उरच्। कर्बुरपाठे नेत्रीतः कर्वरः। क्रव्यात् कर्बुरो यातु रक्षसी इति शाश्वतः

अत्र कैश्चिद् दृहृवचनेभ्यः ष्वरच्। निकषा रक्षसां माता तस्या आत्मजत्वात् निकषात्मजः। षमूर्द्धन्यः। यातुसंज्ञां दधाती

ति यातुधानः। तस्यादिः कर्मणि ल्युट्। निगाभायाहिभ्यश्चेति तुः। यातुरकृचौ दिरिति शबरस्वामी धाञः कृत्यल्यु

टो बहुलमिति ल्युट्। यातून् निरङ्कोसि दधाति पुष्णाति स्वजातिपोषकत्वादिति वा। यातून् नियातनाधीयं तेऽस्मि

न्निति तु कौमोदी। जातु कदाचित् रक्षा अथवा नेसन्निधानमस्येति वर्गादिरपीति पुरुषोत्तमः। भद्रं पाला

दिवद्धि रुद्भलक्षण यात्वपुण्यजनः। निर्ऋत्यादिभिर्भवो विद्यमानः शेषेऽणतद्पत्यत्वाद्वा नैर्ऋतः। यातयति व्यथ

यतीति यातुः। आरक्षः। पूर्ववत् ह्रस्वे वा। पञ्चदश राक्षसस्य॥ प्रचेता इति प्रचेतयति प्रचेताः। असुराः वरं वृणोतीति ते देवाव

रदस्त्ववराचिनो। धातुर्वैवरणेप्रोक्तस्तस्मात्तस्य वरुणः स्मृत इति शाश्वतपुराणे। वृणोतेः कृवृदारिभ्य उनन्निति उ

राम

२०

नन्नु म्रियन्त इति वरुणः ॥ नागपाशयोगात् पाशी नांतः ॥ यादसां जलजंतूनां पतिः यादसांपतिः तत्पुरुषे कृत्यलुक्
लुकि तु यादःपतिरपि । अपांपतिः अप्पतिः अलुकि अपांपतिरपि ॥ पंच वरुणस्य ॥ श्वसित्यनेन श्वसनः श्वस
प्राणने ल्युट् । स्पृशति स्पर्शनः स्पृश स्पर्शे ल्युः बहुलमन्यत्रापीन्यौणादिको युजितिसर्वानंदः । वायुः वागति
गंधनयोः कृवापाजिमीत्युण् । मातरीति सप्तम्यंत प्रतिरूपकं ब्रह्मारण्यानामनत्र श्वयति वर्द्धते मातरिश्वायं कि
ल गर्भस्थ एव शक्रेणाभयं वा शब्दागः कृतः श्वयुक्षन्नित्यादौ निपातितः नांतः ॥ सदागमनात् सदागतिः ॥ पृषन्म
गभेदः सद्वपिगलो ॥ श्वो ॥ स्य पृषदश्वः ॥ मूर्द्धन्यमध्यः ॥ वायुर्धूम्रस्तथा पृषोदित्यागमात् पृषन्मृग एवाश्वो स्य
ति स्वामी पृषंत्य बुकस्य अश्वा स्येत्यन्ये ॥ गंधस्य वहो गंधवहः अकारादनुपपदात् सोपपदे भवति विप्रतिषे
धेनेत्यस्य बाधिकत्वात् वा घञ् वह इत्यर्थे व्युत्पाद्य पश्चाद् गंधेन समासो वा ॥ गंधवाहः कर्मण्यण् ॥ अनिल
उक्त एव । आशु गच्छति अन्यत्रापीति डः आशुगः ॥ सम्यगीरति गच्छतीति समीरः ईरगतौ अच् सम्यगीरयति प्रेरय
तीति तु कौमुदी ॥ म्रियंतेऽनेन क्रुद्धेन सप्तग्रोरुदित्युत् मरुत् ॥ मारुतः प्रज्ञाद्यण् । मारुतः श्वसनः प्राणः समीरोम

रुतोजंगादितिसंसारावर्तत्वमरुतोपि अतएवजगत्प्राणोपृथगपिानत्वंघ्युतिगमिजुहोतीनांद्वेचेतिक्विपि
द्वित्वेगमःक्वाविति मलोपेतुक्विजगत्जगतोयदावर्तमानेपृषत्बृहत्महत्जगत्शतृवदित्येनत्रास्ति·
नभोस्यस्तीतिमतुप्नभस्वान्तसौमत्वर्थेइतिभसंज्ञापदत्वबाधनात्नरुत्वंसहिनभःस्वामीनयाचवायु
पुराणशब्दाकाशवलानांचवायुरीशस्तथाकृतइति।वातीतिवागत्यादौहसिमृग्रिण्वामिदमिलूपूधूर्विभ्य
स्तन्निवातःवातूलकातृवासस्तिरितिनित्यत्ययेनवाति।वायुःमरुत्वान्श्वसनःपवनोमरुतोनिलः।नभस्वा
न्क्विपराउर्वीतिःसुषिनोनघटोवहइतिसाहसोकः।पुनातिजगत्पवनःवकुलमन्यत्रापीतियुच्।पवमा
नःपूङ्यज्ञोःशानन्आनेमुक।प्रकृष्टमुच्छ्रितंभनक्तिप्रभंजनःल्युः।विंशतिर्वातस्य॥प्राणइतिहृदिप्राणो
गुदेऽपानःसमानोनाभिसंस्थितः।उदानःकंठदेशस्थोव्यानःसर्वशरीरगः॥अत्रप्रवेशनंमुखाद्युत्सर्गोऽत्रवि
पावनं।भाषणादिनिमेषादिव्यापाराःक्रमादमी।प्राद्युपसर्गात्ययाकर्मप्रसरणेनापसरणेनसमंतादू राम
र्ध्वंनव्याप्याअनित्यनेनघञिअनितेरितिणत्वंवर्जमपानादयः।देहस्यपंचवायूनांपृथक्पृथक्॥वे ३९

युधर्मत्वेनवाप्तुप्रस्तावेरंह आदीनाहरंहइत्यादिरमतेऽनेनरमेईकूचेति असुनूदुक्चागमः रंहत्यनेन
वारहिगतौ असुनूरंहः संघः सुराणामित्यत्रापिहकारएवघकारस्तु प्रामादिकइति पुरुषोत्तमगोवर्द्धनौ
रघिधातोस्त्वसुनूनेष्यतेरहिगतावित्यतोऽसुन्निसिद्धेरघेरसुत्रिरासार्थरमेस्त्वेतिसूत्रणादिनि। तरंत्यनेन
तरनेरसुनूत्तरः। रीणात्यनेनरीगतिरेषणयोः एरच्चारयः। स्यंदतेऽनेनस्यदः। स्यदोजवइति निपातितः। जवनं
जवः जुइति सौत्रधातोः नृदोरविन्यपूर्वगजः। गजवतीजवतीग्रहयाच मूरितिरयोः पंचवेगस्य॥ अथेतिरं
हआरयः सवेगगातिवचनाः शीघ्रादयस्तुधर्मवचनाएतावतापृथक्कृतिईशः अतएवशीघ्रंपचतीतिप्र
योगोभवतिननुजवंपचतीति। शिंघतिव्याप्नोतिशीघ्रादयश्चेति शिंघेरकृशीघ्रंत्वरते सत्वरितं रुष्यमत्व
रसंघुषास्वनामितिवा रइत्वले घ्यातेलघुलंघिशोषेलंघिवेर्द्धौनलोपश्चेति कुर्नलोपः। क्षिपतिक्षिपंक्षिपः
स्फाय्यं तंचीत्यादिनारक्। अरमिति अगतौ अपूर्वाडुलकातल्लीवत्वात् अनूमध्यमितिनुस्वामी। द्रुतंइ
तिद्रुगतौ भावेक्तः। सहत्वरयावर्त्तत इति सत्वरं। तुपमंदायांगतौ तुपेरव्वोपधायाइतिकलेचपलान्तणं मिति

ले

३८

त्वरत्वरेत्यादिनाऊवूरदाभ्यामितिनात्वं।विलंवतेभीवेक्तः।नञ्समासः।अविलंबितं।अशूयाशीघ्रत्वापाजिमी
त्यादिनाउण्।आशु।।एकादशशीघ्रस्य।।सदागातिप्रसंगेनसततादीनाह सततमिति।संतनोतेर्भावेक्तः।अनु
नासिकलोपः।समोवाहिततनतयोरितिविकल्पेनसमोमलोपेसततं पक्षे संततं।आङ्पूर्वाद्रमिर्विरामेवर्त्ते
तेनयासंकीर्णे।आरत्यवरतिविरतयइत्यवस्यते।अविद्यमानमारतमस्मिन्निति अनारतं।अश्रांतमितिश्र
मुतपसिखेदेचभावेक्तः।अनुनासिकस्येत्यादिनादीर्घः।नास्तिविरतमस्येत्यविरतं।निशाव्यापारशून्य
त्वमुपचारात्तन्नद्रुहितमनिशं।नास्तिनिशाप्रायोऽत्रवच्छेदकःकालोस्येत्यनिशमितितुसर्वानंदः।।नित्य
मितिनियतेभवमित्यर्थेनियतार्थान्निशब्दात्त्यप् त्यब्नेर्ध्रुवइतित्यप्।अनारतवदनवरतं।नजस्यतीत्यज
स्रंजसुहिंसायांसदेत्यः।नमिकंपीत्यादिनारः।सततमजस्रंशश्वद्वाव्ययावपिनित्यपर्यायौस्तः।शश्वदभीक्ष्णं
नित्यदासदासततमजस्रमितिसातत्येऽनव्ययप्रकरणेआपिशलिः।।नवनिरंतरक्रियाकरणस्य।।अथे
तिसततताद्यतिशययोरयंभेदः।सततंक्रियांतरैरव्यवधानेअतिशयस्तुक्रियांयांव्याहृतिःपौनःपुन्यमितिया

राम
४०

वत् अतिशेते जयत्यनेनातिशयः अतिपूर्वात्शीङः एरच् । भरः पूर्णिना भृ भर्त्सने करणे ऋदोरप् अन्योपस
र्गनिवृत्त्यर्थं निर्भरः । अतिक्रान्तं वेलां मर्यादामतिवेलं अत्यादयः क्रान्ताद्यर्थे द्वितीययेति समासः । भ्रंशु
शु अधःपतने धातूनामनेकार्थत्वात् भृशते अतिशेते इगुपधत्वात्कः भृशं शतालव्यं । अर्थो निवृत्तिविषयो
वातमतिक्रांतमत्यर्थं एवमतिमात्रा स्तोकोऽ उद्गाहते स्म उद्गाढं गाहू विलोडने क्तः ढत्वधत्वष्टुत्वढलोपदीर्घ
त्वानि । तीवति तीव्रं तीव स्थौल्ये बाहुलकात् स्फायीत्यादिना रक् कृच्छ्रेऽ ड्राये । त्यत्र बहुलवचनात्त्रिज निशा
ने अन्तोपि रन् दीर्घत्वं च जकारस्य वकार इत्युणादौ । एकोऽतो निश्चितो वेति एकान्तं नितान्तं नितराम्यतिस्म नितान्तं तम
मु कांक्षायां क्तः दीर्घः । गाढम् उद्गाढवत् वाढमिति क्षुब्धस्वान्तध्वान्तेत्यत्र निपातितं दृढं च दृढः स्थूलबलयोरिति
निपातितं यथा ॐ ओं नाम अधिकं ब्रतसत्यं वाढं इत्यभ्युपगमार्था इति श्रीभोजोऽव्ययमाह । वत्तु दश
अतिशयस्य ॥ जवादीनां शीघ्रादीनां चापरं भेदमाह क्लीबे त्यादि । शीघ्रादि दृढपर्यन्तं क्रियाविशेषणत्वा
द्रव्येव र्त्तमानं क्लीवेन पुंसकलिंगे वर्त्तते यत्तु एषां मध्ये सत्त्वगामि द्रव्यगामि तत् त्रिषु वाच्यलिंगमित्य

टी
१

र्थः यथा शीघ्रं तु होति सततेऽश्रुं क्लेऽद्यगामि त्रिषु यथा कल्पो शीघ्रा जरा शीघ्रो मृत्युः शीघ्रं वयस्तयेति अन्य
स्त्वाह अतिशयभरौ वर्जयित्वा एतयोर्नित्यमेवासत्त्ववचनत्वेपि पुंलिंगेन निर्देशात् घञजंताः पुंसी
ति वचनाच्च पुंस्त्वमेवानयोः तथा च रभसः गाढे कांतनितांतातिमात्र नतिशयो भर इति यत्त्वतिशयं पच
तीति प्रयोगस्तत् क्रियाविशेषणे क्लीबत्वाहन्तत्रसत्त्वगामिनः शीघ्रपर्याया आशुशब्दरहिताः सततप
र्याया अनिशाजस्ररहिताः अतिशयपर्याया अतिशयभररहिता इति अत्राशुशब्दवर्जनमसम्यक् त
था च कालिदासः मेरुमेत्यमरुदाशुवाहन इत्युत आशुशब्दोपि त्रिषित्यन्ये एवमनिशशब्दस्यापि त्रिलिं
गतां केपि मन्यंत इति सर्वधरः क्वचिद्भेद्यगामीति पाठस्तत्र भेद्यगामि विशेष्यगामीत्यर्थः॥ कुवेर इति
त्रिचरणोऽष्टदंष्ट्रो जातो यमनतः कुत्सितं वेरं शरीरमस्येति कुत्सितत्वेन कुत्सितदेहत्वेन कुवेर इति तु स्वा
मी कुत्सायां क्विति शब्दोयं शरीरं वेरमुच्यते कुवेरः कुशरीरत्वान्नाम्ना तेनैव सोंकित इति वायुपुराणं अथ
वा कुंबि आच्छादने कुंवेर्नलोपश्चेत्येरक् नलोपः कुवेरो धनच्छादको धनरक्षक इत्यर्थः॥ त्र्यंबकस्य सखा त्र्ये

राम
४९

वकसखः टच् यक्षराट् यमराड्वत् । गुह्यकानामीश्वरो गुह्यकेश्वरः ॥ मनुष्यस्येव धर्म आचारः अस्य स्कलत्वा
द्दिर्वास्येति मनुष्यधर्मा सप्तम्युपमानेत्यादिना समासः धर्मादनिच् केवलादित्यनिच् । धनं दयते रक्षतीति
धनदः देङ् त्रैङ् पालने कः ॥ राजानो यक्षास्तेषां राजेति राजराजः टच् यक्षेचं डे वराजास्यादिति त्रिकांडशेषः
धनानामधिपो धनाधिपः ॥ किन्नराणामीशः किन्नरेशः ॥ पुलस्त्यपुत्रो विश्रवास्तस्यापत्यं वैश्रवणः तालव्य
मध्यः शिवादिभ्योऽणित्यत्र विश्रवणरवणाविति पाठात् विश्रवणादेशो । एवं च । पुलस्तेरपत्यं गोत्रं वा पौल
स्त्यः गर्गादिभ्यो यञ् बहुत्वे लुक् पुलस्तयः ॥ रूढरत्ननरयुक्तशिविकावाहनत्वान्नरवाहनत्वान्नरवाहनः
वाहनमाहितादिति नणत्वमनाहितत्वाद्विकल्पात् नापि पूर्वपदात्संज्ञायामिति णत्वं क्षुभ्नादेराकृतिगणत्वात् ।
यक्षः पूर्वमेवोक्तः ई लक्ष्मीमक्ष्णोति व्याप्नोतीति तु स्वामी । गौरीनिरीक्षणेन तत्प्रभावाद्वामे चक्षुषि नष्टे रुडा
तुनया जातेन पिंगिमविकृतेर्व्यादत्तमस्येत्येकपिंगः अत एव भागुरिणा हर्यक्ष उक्तः ॥ इलविला पुलस्तिभार्या
त स्य पितामही स्या अपत्यं अपतनादपत्यमिति कृत्वा ण ऋष्टद्वाभ्यो नदीमानुषीभ्य इत्यण् इडविडा माता

॥ अस्येति ज्योत्स्नादित्वादणि ऐडविडः डलयोरेकत्वस्मरणाद् ऐलविलोपीति तु स्वामी। धनदवत्स्वादः। पुण्य
जनानां यक्षाणामीश्वरः पुण्यजनेश्वरः। स च दश कुवेरस्य॥ अस्येति अस्येति प्रत्येकमन्वी यूनेत्र घोत्यास्मिन्नि
न्तुघ्यानं चित्ररथेन निर्वृत्तमित्यणि चैत्ररथं एकं॥ पुत्रस्त्विति पुत्रस्तु नलः कूबरो पुंगवरोऽस्येति नलकू
वरः पुत्रस्तु नलकूवर इति शब्दार्णवादयोपि पुत्रोस्तु नलकूवराविति त्रिकांडशेषमूलं गवेष्यं एकं॥ कैला
स इति केलीनां समूहः कैलं। अण्। [illegible] तेनास्यते त्र कैलासः। आस उपवेशने हलश्चेत्यधिकरणे घञ्। यद्वा
केलिः प्रयोजनमस्य कैलः। आस्यतेऽत्रेत्यासः। कैलश्चासावासश्चेति कर्मधारयवत्त्रित्यसमासः। कं जलं मिला भू
मिः कैलयोर्जलभूम्योरास्ते के जले ला सोलसन नमस्य वा कैलासः स्फटिकः तस्यायं कैलासोऽद्रिरिति तु स्वामी ए
कं॥ अलकेति अलति भूषयत्यलका अलत्र भूषणे पूर्यादि वा रणो वुकुन् शिल्पिसंज्ञयोर पूर्वस्यापीति
वुन् नयासयोरिति योगविभागात्प्रत्ययस्थात्कादिति नेत्त्वं क्षिपकादित्वान्नेत्वमिति स्वामी वाडुलकाचेत्व
मिति तु कौमुदी एकं॥ विमानं त्विति पुष्पविकसने वुन् पुष्पकं इवे प्रतिकृतौ कन्निति तु स्वामी विमानं तु पु

यकोऽस्त्री नगरी त्वलका प्रभेति तु शब्दार्णवात् पुंस्त्वमिति एके॥ स्यादिति किंचिन्नरोऽश्वमुखत्वात् कुत्सितो नरो
वा किन्नरः किं क्षेप इति समासः। एवं किंपुरुषोपि कुत्सा च कस्यचिन्नरमुखाश्वकायत्वात् कस्यचिदश्वमुखनर
शरीरत्वादिति कौमुदी। तुरंगस्येव वदनमस्येति तुरगवदनः। मयत इति मयुः डुमिञ् प्रक्षेपणे भृमृशीङ् चरि
त्सरितनिमिमस्जिभ्य उरिति उः मीनाति मिनोति दीङां ल्यपि चेत्यात्वं बहुलवचनान्न भवतीत्युणादिवृत्तिः केचि
त्तु एथगिदं नाम चतुष्टयं मन्यंते तदयुक्तं मयुश्चापि सर्वत्र पर्यायदर्शनात् चत्वारि किंनरस्य॥ निधिरिति निय
तं धीयते निधिः धाञः किः शेवृ षेवृ गेवृ ग्लेवृ पेवृ म्लेवृ मेवृ म्लेवृ सेवने नन्दनालव्यादेर्गुरोश्च हल इत्य शेवा
धीयतेऽत्रेति किः बाहुलकात् सपोऽसत्वं शेवधिः स्मालव्यादिः शेकल्याणेऽवधिः शेवधिरिति तु राजदेवः शेफः
श्येनौ शरमः शशारु शफ श्रमी शेवधिविश्याभा इति नालव्यादौ ऊष्मविवेककर्त्ति केचित्तु शेवृ धातोः किरित्याहुः अ
त एव धातोः पचाद्यचि शेवः शेवान् दधातीति शेवधिः बाहुलकान्नुक् नेति किरिति तु सर्वानंदः शेवते शेवं स्थाप्य
धनं धीयतेऽत्रेति तु स्वामी द्वे सामान्यनिधेः॥ भेदा इति पद्मशंखादयो नव निधेर्भेदाः। उक्तं च पद्मोऽस्त्रियां महा

प्रत्य

पद्मः शंखो मकरकच्छपौ। मुकुंदकुंदनीलाश्च खर्वश्च निधयो नवेति शब्दार्णवादयः। पुराणे नराश्रयान्मार्कं
ण्डेयपुराणे तु खर्व इति हित्वा ष्टवेवोक्ताः निधिविशेषाणां पृथक्पृथक्॥ ॥स्वर्गवर्गविवरणं॥ ॥द्यौरिति
द्यौदिवौ द्वे स्त्रियौ। अभ्रति स्थैर्यं गच्छतीति नित्यइत्वात् अभ्रं न विभर्ति किंचिदित्यभ्रं मूलविभुजादित्वादिति तु
कौमुदी। आपो भ्रियंत्यस्मादित्यन्ये। भ्योपीति डः। अभ्रं बकारसंयुक्तं भ्रु मित्येकेन आज्ञाते न्ये भ्योपीति ड इति स्वा
मी। व्ययति संवृणोति शून्यत्वादिति व्योम व्योमनामनुसामनू सीमनू हेमनू व्योमनू रोमनू वेमनू वर्त्मनू पाप्म
न्नित्याहिनानि पातितं। पुष्पतीति पुष पुष्टौ पुषः कि दिति करच्च कित्वं च पुष्करं पुष्कं वारि व्यनीति स्वामी। अंब
ते शब्दायते अंबरं अविरविलविशदेश्ल छेररन्निति वाकुलकारः न्नानहवं धनेनहे दिविभ श्वेत्यसुन्न भस्वानं
देशः न विभस्ति न भाति वा नभः इति तु स्वामी। अत्यक्षिवमीत्यसंचिनभस्म मंडने वास्ति। अंतरीक्ष्यते जमदस्मिन्नि
न्त्यंतरीक्षं दर्शने घञ् वेदे तु छांदसं ऋक्षत्वमिति वर्णदेशना अंतर्ऋक्षाणि न क्षताण्यस्येति पृषोदरादित्वादि त्वं
द्यावापृथिव्योरंतरीक्षमिति वेति तु स्वामी। गच्छंत्यनेनेति गगनमेगे स्वेति नु गगन्यां तादेशः गगनं। नित्यत्वादवि

राम
८३

स्वो॰२

घमानोंऽतो विनाशोऽस्येत्यनंतं देवानभ्रमिः स्पृशोंतरी क्षणस्तेन सुरवर्त्मेनांतं । खमिति शून्यत्वात् खातमिव
खंडितं खनेर्मुक्षौदान्त इति अल् । अखास चड्डित् मुडागमस्वागमानित्यत्वान्न भवति खन्यते खमिति तु स्वा
मी । वियच्छति न विरमति वियत् विपूर्वाद्यमेरन्येभ्योपीति क्विप् क्वौ च गमादीनामत्तु नासिकलोपो भवतीति
वक्तव्यमित्यनुनासिकलोपः तुक् । विष्णोः पदमास्पदं विष्णोः पदं क्रमो वेति तु स्वामी आकाशंते स्सूर्यादयो
वेत्याकाशं काश्रु दीप्तौ हलश्चेति घञ् नकाशते वा छांदसो दीर्घ इति तु कलिंगाः काशाकाशदेशो कुशमि
तितालव्यान्ते चंद्रगोमी । विजहातीति सर्वं विहायः विपूर्वाज्जहाते वीडुलकादसुन् वा पुंस्याकाशविहाय
सौ इति संबंधः । षोडशाकाशस्य ॥ व्योमवर्गविवरणं ॥ ॥ दिशंत्यवितिदिशांतितामितिदिशन्यवकाशंद
दातीति वा ऋत्विगादिना कर्मणि क्विन् कर्तरि तु क्विप् चेत्यनेन रूपं चापि हलंतेभ्य इति दिशापि । दिक्कुत्तु वि
यां दिशा दांती ककुह्वेव ह्वः पविशितिशह्यार्णवः । कं वातं स्कुन्नाति विस्तारयति स्कुन्नु रिति सौत्रधातोः क्वि
पृष्टोदरादित्वान्मसलोपः ककुभो नाकेनादित्येन कुत्सिता निर्भानिनि दत्राणं वेति त्वन्यः ककुभापि

तिकश्चित्तकाशन्ते काष्ठाः काष्टदीप्तौ हनिकुशिनीवमिकाशिभ्यः क्थन्नु त्रस्त्वादिनाषत्वं टाप् ।। आसमन्तादश्नुते
व्याप्नोतीत्याशा ।। अशूव्याप्तौ अच् ।। हरंतिनयंत्यनया हरित्तहरतेः हृसृरुहियुषिभ्य इदितीततो हृत्यने
नस्त्रीत्वं व्यन क्ति दिशांवक्तुं लाहृ दुवचनं दिगेकाविभ्वीति ओपाधिकं तु प्राचीत्यादीति वैशेषिकाः पंचसामा
न्येन दिशः ।। प्राचीति प्रथमे प्रागंचत्युदेति रविरस्यामिति प्राची प्राथम्ये प्रशब्दो वा मध्ये ईद्रोऽस्त्वत्यस्यामके
इत्यपाची अपशब्दोयमपदिशवन्मध्यवाची अवाचीत्यपपाठएव अवपूर्वोऽञ्चतिरधोमुखीभावे वर्तते
वत्स्यति च स्यादवाङ्‌ऽथधोमुख इति अवाङ्मुखस्यापरितुष्यद्दृष्टेरितिरघुः तेन अवाचीत्यधो दिश्येव वर्तते
इति कौमुदीकारादयः अवोमध्यार्थः अवाचीत्यपि काप्यपीति स्वामी ।। प्रतिपश्चाद्दिनांते अंचत्यर्कोऽस्यामिति प्र
तीची सर्वत्र ऋत्विगादिना क्विन् अंचतेश्चोपसंख्यानमिति ङीप् ।। प्रतीचीत्यत्र अच इत्यकारलोपः ध्वाविति
दीर्घः पूर्वदक्षिणपश्चिमा इति सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः पूर्वदक्षिणपश्चिमाज्ञेया यथाक्रममेकैकं ।। उत्त
रेति उत्तरत्यनेनेति उत्तरा उत्तरकांतो दृष्टिपथमतीतः सूर्योऽत्वत्यस्यामित्युदीची उदङ् इति अचेतेरकारस्य ईद्

कारः एकमुत्तरस्या दिशः॥ दिश्यमिति दिशि भवं दिश्यं दिगादित्वाद्यत् दिगन्तवस्य वस्तुनः एकं॥ इंद्र इति अत्र विदि
शीति प्रसिद्धा दिगुच्यते। इंद्रो वह्निरित्यादीनामैंद्र्यादिपदानां इंद्रादीनां च प्राचीप्राचीपत्यादिषा च कत्वस्य च
नांयाभिधानाद्वा प्रस्तुतत्वोक्तिरिति कौमुदी इंद्रादयोऽष्टौ प्रत्येकं पूर्वादिदिशां स्वामिनः॥ ऐरावत इति ऐरावतः
पूर्वमुक्त एव। पुंडरीकवर्णयोगात् पुंडरीकः अशी आद्य वाखर्वत्वाद्वामनः॥ कौमोदत इति कुमुदः मूलविभु
जेतिकः कुमुदं रक्तोत्पलं तत्तुल्यवर्णत्वाद्वा॥ कुमुदं कैरवे रक्तपद्मेऽस्त्री निमेदिनिः॥ अंजनवर्णत्वादंजनः॥
पुष्पमिव दंतावस्य पुष्पदंतः॥ सार्वभौम इति तत्र विदित इति चेत्य एरनुशतिकादीनां चेत्युभयपद वृद्धिः॥
शोभनः प्रतीकोऽगमस्येति सुप्रतीकः दिशां धारका गजा दिग्गजा इंद्रादीनां दिशां गजानामष्टानां पूर्वक्रमेणै
कैकं॥ क्वचित्करिण्योऽभ्रमुरिति पाठे दृश्यते तद्वृत्तिरियं अभ्र आकाश एव माति महाकायत्वात् नान्यत्र उद
हादौ अभ्रमुः मामाने मितद्र्वादित्वात् कुः अथवा भ्राम्यतीति भ्रमुः पृत्पृचरीत्यादिना उः न भ्रमुरभ्रमुः मंथ
रगामिनीत्यर्थः कपिलपिंगलवर्णत्वात् कपिलापिंगले। श्रेष्ठत्वान्नास्त्युपमास्या अनुपमास्या अनुपमा।

अ॰टी॰
३५

द्वि

ताम्रौ कर्णौ यस्यास्ताम्रकर्णी पाककर्णीत्यादिनाङीष्। शुभौ शोभनौ दंतावस्याः शुभदंती नासिकोदरौष्ठ इत्या
दिनाङीष्। अंगतिगच्छति अंगना। अंजनवर्णत्वेनांजनमस्या अस्तीति मतौ चवद्रूच इत्यादिना दीर्घः अं
जनावती क्रमेणैरावतादीनां हस्तिनीनामेकैकं॥ क्लीबाव्ययमिति कर्मधारयः क्लीबेन्यव्ययीभावत्वप्रदर्शि
नपरं तत्त्वनाव्ययीभावादिनिःसूत्री कार्यप्रदर्शनार्थं तदप्यन्यतः सुखज्ञानार्थं रूपव्यक्तीनां कोषकारानभि
धेयत्वात् अव्ययानामनेकार्थत्वात् अपशब्दोपि करणप्रधानो मध्ववाची अव्ययेविभक्तीत्यत्राव्ययमिति
योगविभागात् समासः अव्ययीभावे शरत्प्रभृतिभ्य इत्यच् समासांतः अव्ययीभावश्चेति क्लीबत्वाव्ययी
भावत्वे अपदिशं दिग्भ्यां विनिर्गता विदिक् कूशान्ता प्रदिक् च तथा चामरमाला क्लीबे दिगंतरालानि प्रदिशो वि
दिशस्तथेति द्वे आग्नेय्यादिकोणस्य अभ्यंतरमिति अंतरं मध्यावकाशः अभिगतमंतरमभ्यंतरं अंतरे ला
तीत्यंतरालं कप्रत्ययः अन्येषामपीति दीर्घः द्वेमध्यमात्रस्य॥ चक्रेति चक्रेण चक्राकारेण वलते वलवह्ल
संवरणे ऽच् एषोदरादिः चक्रवालं भावे घञि वालः चक्रवालं नाये घञि वालः चक्रस्येव वालः संवरणमस्ये

राम
४५

ति वा चक्राकारेण वा डतेवेति चक्रवाडं वा इ आम्नायो अत्र कौमुदीकारादयस्तु डांतमेवात्र पठित्वा डलयोरेक
त्वस्मरणात् लांतमपीत्याहुः ॥ मंडयतीति मंडलं वृषादित्वात् कलच् मंडं भूषां लातीति वा केचिदुभयत्रैव दिशा
मित्यत्तु वर्त्तयंति तत्र प्रमाणं सामान्येनैव सर्वत्र दर्शनात् हेमं डलाकारेण परिणतस्य समूहमात्रस्य ॥ अभ्रमि
त्यादि अभ्रंति गच्छतीत्युपाध्यायसर्वस्वादिः अत एव माघे घनमदभ्रमराणीति यमकितं । अपो बिभर्तीति मूल
विभुजादित्वात् के वकारवदिति वैयाकरणाः न भ्रश्यंत्यापोऽस्मादिति पौराणिकाः तदुक्तं न भ्रश्यंतीयतस्तेभ्यो
जलान्यभ्राणि तान्यत इति । मेहति सिंचति मिह सेचने । उत्र्यन्यंकादित्वात् कुत्वं मेघः । वारि वहतीति कर्मण्य
ण् वारिवाहः । स्तनगदेव शब्दे चुरादावदंतः अतस्तनि हृषिमदिगादिभ्यो णेरित्नुच् अयामंतेत्यया देशः स्तन
यित्नुः वारिवाहको वलाहकः पृषोदरादिः वलाकाभिर्हीयत इति वा । जलस्य धारां धरतीति धाराधरः । तडित्वा
न्मतुवंतः मय इति वत्वं वारि ददातीति वारिदः कः । अंबूनि बिभर्ति अंबुभृत् । हंति संतापमिति घनः हन्यते वा
युना इति तु स्वामी मूर्तौ घन इति वा तुल्यात् कर्त्तरि हंतेरप् कुत्वं च । जीवनं जलं मूतं वद्धमनेनेति जीमूतः मूङ्

शी॰ ६

वंधनेऽष्टषोदशादिःजीवनंमुंचतिष्टषोदशादिःजीवनस्यमूत्रः पुटवंध इतितु स्वामी।मोदंतेऽनेन मोदयतिप्रजाइति
वास्तुदिरः इषिमदिमुदीन्यादिना किरच्।जलंमुंचतीति क्विप् जलमुक् चांतः धूमो योनिः कारणमस्य धूमयो
निः यद्यपि शब्दार्णवे मेघास्त्रिविधास्तत्र वह्निजा धूमयोनयः।निश्वासजास्तु जीमूतास्ते ज्ञेया जीवरूपिणः।
पक्षजास्तु घनाघोराः पुष्करावर्तकाइतितथाप्यन्यत्राभेदोपिदृश्यतइतीहापि तथा पंचदशमेघस्य॥कादंवि
नीतिकादंवाः पक्षिणोवलाकावत्मेघमनुधावंतितद्योगात् ज्योत्स्नादित्वादण् ङीपि कादंविनी कादंवस्य वि
काशः कादंवः सोस्यास्तिकार्यत्वेनेतितु स्वामी हेमेघपंक्तेः॥त्रिषितिअभ्रियंभवार्थेसमुद्राभ्राद्घः॥ छंदस
त्वमतंत्रमितिस्वामी॥एकं॥स्तनीतिस्तनगदेवशब्देक्तः स्तनितं।एवंगर्जितं।रसतेः शब्दार्थोडसितं आदिना
ध्वनितंद्वादशसाहित्यग्रहः चत्वारि मेघगर्जनस्य॥शंपेतिभीषणेयाशं कल्याणं पिवतिकप्रत्यये शंपा।शतं ह्रा
अस्याः ष्टषोदशादित्वाद्ह्रस्वत्वे शतह्रदा अचीभिविद्यंतेऽस्या इतितु स्वामी।ह्रादिनीत्यावश्यके णिनिः।इरावतो
मेघस्येयमित्यण्ऐरावतीतिस्वामी मेघानां राजा ऐरावतस्तेनेकदिकूऐरावतीत्यन्यः।क्षणंप्रभास्याः क्षण

त

६

दा॰
राम
४६

घ्नभा॥ताडयतीतितडन्नाघातेताडेर्निलुकूचेतीत्तनिलुकूचनतडित्॥श्वेतद्विपःसुदामेतित्रिकांडशेषेऐरा
वतपर्यायोतेनैकदिगित्यण्।अन्नितिप्रकृतिभावात्टिलोपाल्लोपौनभवतइतिन्यासःसौदामनीसुदा
म्नाड्रिणाएकदिगितितुस्वामीसुदाम्नीत्वशनिर्विद्युदितिसब्कोषेसौदाम्नीत्यसाधुरितिहड्डचंद्रःसौदामि
नीत्यपपाठः।तथाचहरिप्रबोधे।रेवऽश्रेंजगामकांचनसरसमसौदामनीलताधामास्त॥कुवलयमिव
हिसरजसंसरसमसौदामनीलताधामास्तमितियमकितं॥विद्योततेद्युतेर्भ्राजभासेतिक्विप्।विद्युत्
तांता॥चंचेर्घञ्निचंचःतंल्लातीतिचंचला॥तुपमंदायांगतोतुपेरश्चोपधायाइतिकलचुचपलाद्दशविं
द्युतः॥स्फूर्जथुरितिटुओस्फूर्जावज्रनिर्घोषे॥निर्घोषःसंघट्टोत्थशब्दः।अशन्याघातइत्येकेनिर्घोषश्च
स्सिंसारोपध्वनिःइहतुध्वनिरभिप्रेतः।यथाभट्टिःअस्त्राविस्फूर्जथुप्रख्यंनिनादंपरिदेविनीतिमुमे
वजन्मांतरपातकानांविपाकविस्फूर्जथुरप्रसह्यइतितुरघुरूपचारात्।अतएवविपूर्वोपिस्फूर्जथु
रवेतिकौमुदी॥द्वितोऽथुच्।हलिचेतिदीर्घःकेचित्तुदीर्घंनेच्छंतितेषांसिपिर्वेत्यनोवाग्रहणात्र्वत्वोव्यव

धातोरु

अ॰टी॰
४७

च

स्थितविभाषयाविज्ञानांभवतीतिमैत्रेयः॥पिङ्गसंवर्णेनेघञ्जनिष्पेषोह्विम्र्द्वन्यः वज्रपतनजनितस्पैकं
॥मेघेतिअन्योन्यस्यसंघट्टेनमेघान्निःसृत्यवृक्षादौज्योतिःपततिसइरंमदः इरयाजलेनमाद्यतिदी
प्यतेमेघाग्निर्जलेनदीप्यतेऽग्रेपश्चैरंमदेतिनिपातनात्इरंमदःमेघेत्सुपलक्षणंतेनवाडवोपीरंमदः
सोपिइरयाजलेनमाद्यतीतिकौमुदीमेघाग्न्यादिरिरंमदइतिशब्दार्णवः॥वज्राग्नेः॥इन्द्रेति॥इन्द्रस्यायु
धमितिषष्ठीसमासःएवंशक्रधनुरित्यपिरविकिरणैर्बहुवर्णैर्वातेनविलोडितानभसिप्रकाशंतेशक्रा
युधसंस्थानास्तेषामिन्द्रधनुरितिसाहसांकः॥द्वेइंद्रधनुषः॥तदेवेतितदिंद्रधनुरृत्यातादिनाऋजु
अवक्रंसद्रोहितं स्यात्रोहणंरोहः संजातोस्येतितारकादित्वादितच्रुरुहेःकृष्यादिभ्यइतजितीतवि
वालोहितवर्णत्वाद्रोहितंजात्यागितिपक्वतिभावः एकंऋजोरिंद्रधनुषः॥वृष्टिरिति एष्टुवृष्टुमृष्टुसेव
नेस्त्रियांक्तिन्वृष्टिः वर्षमितिअज्विधौभयादीनामुपसंख्यानंनपुंसकेभावेक्तादिनिवृत्त्यर्थमित्यचाद्वर्षेरा
वर्षणादितिभाष्यप्रयोगाद्वर्षणमपिअतएवअथवृष्टिर्वर्षमस्त्रीकेचिदिच्छंतिवर्षणमितिशब्दार्णवः॥द्वे ४८

वृष्टेः॥ तद्धीति अवग्रहो वर्षप्रतिबंध इति पक्षे घञि अवग्राहः पक्षे ग्रहवृदृ इत्यप् अवग्रहः द्वे अग्रहादिदोषे-
ण वृष्टिविघातस्य॥ धारेति धाराणां संपूय पतनमासारः आसरणतो यत्र द्वे महावृष्टेः॥ शीकर इति शीकते सिं-
चतीति शीकरः तालव्यादिः शवशीकरपांशव इति तालव्यप्रकरणे ऊष्मविवेकात् शीकृ सेचने आच्छेरत्रिति
वातूलकादरत्नवाताहतजलकणस्यैकं॥ वर्षेत्यादि क्षणेति क्षणु हिंसायां कार्यते वा क्षणादिभ्यः संज्ञायां बु-
न् क्षिपकादि पाठादित्वाभावः कमंडलौ च करक इति चकाराद्वर्षोपले पिपुंस्त्वं दर्शयिष्यति अत एव वर्षोप-
ले च करका करकोपि च दृश्यत इति व्याडिः द्वे मेघभवशिलायाः॥ मेघेति मेघच्छन्ने मेघांधकारिते ऽह्नीति अ-
हर्निशोपलक्षणं अह्नादिवत् रात्रावपि दुर्दिनं अत एव मेघांधकारमात्रे रत्नकोषः दुर्दिनं जलदध्वांतमि-
ति यत्नौषधिप्रकाशेन नक्तं दर्शितसंचराः॥ अनभिज्ञास्तमिस्राणां दुर्दिनेष्वभिसारिका इति कुमारे रात्रा-
वपि दुर्दिनप्रयोगः यन्नेत्रयोर्दुर्दिनमित्यत्र त्वसंभवं स्वार्थाविनाभूतं पयःप्रवाहं लक्षयन्नश्रुप्रवाहं ल-
क्षयतीति शृंगारप्रकाशः॥ एवं लक्षितलक्षणया अकरोत् पृथिवीरुहानपि स्कन्नशाखारसवाष्पदुर्दिना

४८

।·टी
८

निनिरघु:। वार्दलं दुर्दिनं मेघैर्निमेदिनि:। दुर्निन्दितं दिनं दुर्दिनमिति मेघांधकारिते दिनरात्र्योरेकं॥ अंत
र्धिनि अंतर्धानमंतर्धी अंतर् शब्दस्याङ् कि विधिणत्वे तु उपसर्गत्वान्न धात्वात श्रोपसर्ग इत्यङ् दाधू एवं
व्यवधापि। अंतर्धिरिति। किः ह्यत्र आच्छादने तुरादिः एयनात् ल्युटि अपवारणं। अंतरपरिग्रह इति गति
त्वे कुगतीत्यादिना समासः अपवारणं दिपंच के भावे ल्युट् तिरोधानमिति तिरोंतर्द्धौ विनिगतित्वे कुग
तीति समासः व छिभागुरिरित्यादिनाऽकारलोपे पिधानं। छदनमिति छादेर्घः इति योगविभागात् ड्र
स्वत्वं॥ अष्टावंतर्धानस्य॥ हिमांशुरिति हिमाः शीतला अंशवोऽस्य हिमांशुः। चंद्रं कर्पूरं सादृश्येन मा
ति तुलयति चंद्रमाङ्ह्लादनं माति वा माते। स्वं ड्रु मो डि श्वेत्यसुन् चंद्रमा वा कुल्लकान्त केष्य सुनि प्रत्यये माः
: अत एव माः शब्दोपीह चंद्रे च समनो वर्द्धहस्वुनामित्युत्पलिनी। कालं मिमीते परिमाति वा मा माश्वासौ
चंद्रश्च चंद्रमा इति तु स्वामी चंदत्याह्लादयति चदि आह्लादने स्फायि तंचीत्यादिना रक्। चंद्रः। अविरे
फश्न्योपि हिमांशुश्चंद्रमाश्चंद्रः शशी चंद्रो हिमद्युतिरिति शब्दार्णवात्। उंदति उंदी क्लेदने उंदेरिच्चादेरि

राम
४५

तिउः आदेश्चेकारः इंदुः कुमुदानां बांधवः कुमुदबांधवः॥ विधुः व्यापृतः यद्वा विधयंत्येनं सुरा इति विधुः सु
तिदीव्यतीत्यादिना बहुलवचनात् कुः॥ सुधा अमृतयुक्ता अंशवोऽस्येति सुधांशुः रित्युपचारादिति सर्वानं
दः एवं शुभ्रांशुः॥ ओषधीनामीशः ओषधीशः आप्यायकत्वात्॥ निशायाः पतिः निशापतिः॥ समुद्रात्मजत्वा
दप्सु जातोऽब्जः पंचम्यामजातावितिडः॥ जीवयत्याप्यायनादिना जैवातृकः जीवेरातुरित्यतृद्वौ आत
कन्वृद्धिश्चेति आतृकन्प्रत्ययः हीसूमने जायते नवो नवो भवति जायमान इति श्रुतिः सूयते यज्ञांगस्थानं वा
करोति सूतेऽमृतं वा सोम इति सुन्नू अभिषवे सू प्रेरणे वा अर्तिस्तुसुहुसृधृक्षिभायावापदियक्षिणीभ्यो
मन् सोमं नित्यादैसोमानां तोपि ग्लायति [illegible] क्षीयते ग्लौः हर्षक्षये ग्लानुदिभ्यां डौः मृगाकारा मूर्च्छा
यांके क्रोडेऽस्येति मृगांकः मृगो कश्चिदंकमस्येति वा॥ कला निधीयतेऽत्रेति कलानिधिः कर्मण्यधिकरणे चेति
किः॥ द्विजानां ब्राह्मणानां राजा द्विजराजः तथा च नक्षत्रग्रहविप्राणां वीरुधां चाप्यशेषतः॥ सोमं राज्ये ददौ ब्र
ह्मा यज्ञानां तपसामपीत्यागमः॥ मृच्छायायाः शशाकारायाः धरः शशधरः॥ अत्र्यान्नत्रत्राणमीशो नक्षत्रेशः

रा
सु५
ग्लौ४
वा२

कूपारात्रिं करोति द्योतयति धातूनामनेकार्थत्वात् कूपाकरः कृञो हेत्वित्यादिना टः॥ विंशतिश्चंद्रस्य॥ कलेति
चंद्रस्य षोडशो भागः कला कल संख्याने अत्र च षोडशो भाग इति पूरणप्रत्ययांतनिर्देशात् एकादिभागस्य
कलेति नामापि सिध्यति दृश्यते च तत्रापि कलापदनिर्देश इति साहस्र्यलक्षणाश्रीयते न यथा स्वर्वैद्यौ द्वा
वप्येकाकारत्वाद्बांसप्तौ दस्रौ चोच्येते न तथात्राप्येकाकारत्वादेकादिभागोपि कलेत्युच्यत इति मंतव्यं चं
द्रषोडशभागस्यैकं॥ बिंब इति वेति शोभते इति वीगति प्रजनादौ उल्वादयश्चेति वन्नुमागमश्च खत्वाभि
बिंबः बिंबति भातीति स्वामी॥ मंडलस्तु क्लीं स्त्रियां गौरादित्वात् ङीषि मंडली॥ द्वे बिंबं चंद्रमंडलस्य॥ भित्त
मिति भित्तं शकलमिति निपातनान्नत्वनिष्ठानत्वाभावः भित्तं शक्यते हंतुं शक्लृ शक्तौ शकिशम्योर्नित् इति
कलच् शकलं स्त्रः समर्थे शकलं च खंड इति शकारस्तालव्यः खडखडिभेदे भावे घञ् खंडं खनु अवदार
णे अतोऽन्यमंतात् ड इति डे खंडमिति वा शकलखंडाभ्यां वा पुंसीति संबंधः रूपभेदात् क्लीबत्वं। अर्द्धशब्दः
पुंलिंग एव खंडे वर्त्तते पुंस्त्वं चार्द्धशब्दस्य वा तुल्ये शब्दांतरसामानाधिकरण्ये तु तल्लिंगतापि यथार्द्धा शा

१ च्चा ४

राम
४९

टी अर्द्धं इव खण्डं एतच्चार्द्धं नपुंसकमित्यमरकोशे नोक्तं जसि अर्द्धा अर्द्धे वा। [illegible]रिखंडमात्रस्य॥ अर्द्धमिति सममा
गे अर्द्धं अर्द्धशब्दो नपुंसकमेव सम प्रविभागे वर्त्तते नान्यलिंग इति भागहृत्यादिः ऋध्नोति समुदायोऽनेनेति
अर्द्धं ऋधु वृद्धौ करणे हलश्चेति घञ् तुल्यस्य खंडद्वयस्य मध्ये एकखंडस्यैकं॥ चंद्रिकेति चंद्रोऽस्यामस्ती
ति अत इनि ठ। नाविति वनू चंद्रिका चंद्रं कायति प्रतिपादयति वा चंद्रिका चंद्रमा चष्टे णिचि रावुल्वा। चं
द्रिका चंद्रिमा चार्वीति शब्दार्णवात्। प्रियत्वेन कुमुदस्येयमिति कौमुदी नस्येदमित्यण्। ज्योतिरस्यामस्तीति
ज्योत्स्ना तमिस्रेत्यादिना निपातिता त्रयं ज्योत्स्नायाः॥ प्रसादस्त्विति षद्लृ विसरणादौ घञ् प्रसादः सदेरेव क्तौ
नात्त लिप्रसंन्नतायस्य कस्यचित् प्रसन्नतादिष्ठ यद्यपि वर्त्तते तथापि चंद्रे निर्ज्ञातत्वादत्र निवद्धा इति तु कौमु
दी॥ द्वयं नैर्मल्यस्य॥ कलंकेति कं आत्मानं रंकयति हीनं करोति कर्मण्यण् कलंकः कल्यते लक्ष्यतेऽनेने
ति कलंक इति तु स्वामी। अंक्यते लक्ष्यतेऽनेनेत्यंकः अकि लक्षणे हलश्चेति घञ्। लक्ष्म लाञ्छि लक्षणे ल्यु
ट् लांछनं। चाहयति विङ्कं वह कल्कने। लक्ष्मदर्शनांकयोः अन्येभ्योऽपि दृश्यत इति मनिन् लक्ष्म नान्तं। लक्ष्मेर

समुन्नशोसाथीविति निर्देशा त्सुरोश्च हलश्इत्यकारस्त
स्यातत्र किंशोसउनशोसे तिसं इत्ता छीसेतिदु णीनमि ४

टच्चेति नःलक्षणं निमिकारमिति सुभूतिः रभसस्कम कारम ध्यंप गतिर्ज्योतिष्मत्या चसारस्यां क्षीपंक्तुनाम
चिह्नयोःस्यात्पक्षेलक्षणः पुंसिसौमित्रैश्रीमतित्रिषितिलक्ष्म्या अच्चेति पठ्यते पामादित्वान्न ईकारस्यान्वे
लक्ष्मणं॥ षट् चिह्नस्य॥सुषमेति शोभनं समं सर्वमनयेति सुविनिर्दुर्भ्यः सुपिसूतिसमा इति षत्वं सुषमा
परमा श्रेष्ठा॥ एकमुत्तत्कृष्टशोभाया॥ शोभेति शोभंते ङनया शोभा सुंतिगुरोश्च हलइति चकारादप्रत्यय
इतित्तु वयं शोभा॥कामयतइतिकांतिः स्त्रियांक्तिन् अनुनासिकस्येत्यादिना दीर्घः॥ द्योतंते नयेति द्युतिः द्युत
दीप्तौ इगुपधत्वात् किः ङीषि द्युतीचेति कौमुदी॥ छिनत्यसारमिति छविः छोच्छेदने कविङ्ष्टिछ विकिकीदि
विरिति ङ्कस्वत्व निपातितं सा ह चर्याछ विश्चस्त्रियां चत्वारि शोभामात्रस्य॥ अवश्यायते शैत्यमापाद्यते संह
तो वा भवतीत्यवश्यायः श्यैङ् गतौ श्याद्यधेत्यादिना णः॥ निह्रियते नीहारः अध्याय न्यायेत्यत्र चकाराद्घञ् उपस
र्गस्येतिवा दीर्घः॥ तोषयतीति तुषे रेतर्भावितण्यर्थात् कमेः किदुच्चोपधाया इत्यनुवर्तत्तौ तुषारादयश्चेत्या
रन् किञ्च तुषारः॥ तोहत्यर्दयति तुहिनं तुहिर दुहिर दुहिर अर्दने वेपितुह्योर्ह्रस्वश्चेति इनन्॥ हिनोति वर्द्धते हि

राम
५०

तोतेर्मन्न् हिमं। हंती निहंते हिंस्येति मक् धातो श्चह्रा देशे वो हिमं। प्रलीयंते पदार्था अत्रेति प्रलयो हिमालयो हिमा
लयस्तस्मादागतं तत आगत इत्यण् प्रालेयं केकयेत्यादिना यादेरियः॥ मह्यते महपूजायां बाहुलकात् शिल्पिसंज्ञयो
रिति बाहुलकाद्वावादि महिका मिह सेचने मिहिकेति तु स्वामी॥ सप्त हिमस्य॥ अथेति हिमानां संहतिर्हिमानी इंद्र
वरुणेत्यादिना हिमारण्ययोर्महत्वे ङीषानुकौ द्वे हिमसमूहस्य॥ शीतमित्यादि गुणे स्पर्शविशेषे शीतमिति क्ली
वं रूपभेदात्तथा च देवदत्तस्य शीतं वर्त्तत इति प्रयोगाः तदुक्तं उपेत्यन्यज्जहात्यन्यत् दृष्टो द्रव्यांतरे षपि वा
चकः सर्वलिंगप्रतो द्रव्याद्न्यो गुणे मत इति शीतमिति श्यैङ् गतौ भावे क्तः द्रवमूर्तिस्पर्शयोः श्य इति संप्र
सारणं संप्रसारणाच्चेति परपूर्वत्वे हल इति दीर्घः श्योऽस्पर्शे इति निषेधान्न नत्वं॥ तदेति तन्द्रानुशीतं गुणवा
नर्था येषां ते तद्वर्थाः सुषीमादयः सप्तान्यलिंगकाः वाच्यलिंगा इत्यर्थः॥ यया सुषीमो वायुः सुषीमं जलं सुषी
मा भूरिति सुषीम इति सुषादिषु चेति षत्वं स्वामी तु सु सु शुश्वाय ते सुशीम इति व्युत्पत्त्या तालव्य मध्यमाह तत
दयुक्तं सुषीमस्य च सुषेण च सुसंधिः सर्षपोपि चेति दंत्यमूर्द्धन्य ऊष्म विवेकात्॥ शिशिर इति अजिरशिशिर

टी· शिथिलस्थिरस्फिरस्थविरखदिरा इति शशाङ्कुनगता वित्यतः किर चूउपधा पोइत्वं च निपात्यते शश्वद्धुशं का शि
१ शिराण्यपिष्ट्र क शिंविस्तालव्य शद्वय युताः कथिताः कियंत इति शभेदः॥ शिनोति अत्यर्थं ध्यायते वा मेने नि
शिशिर इति तु स्वामी॥ जलति घनीभवति जलधान्येऽ चूत घोगाज्जउः डलयोरेकत्वस्मरणं। शीतं गुणोस्यास्तीति सि
ध्मलादित्वाल्लच् शीतं लातीति वा शीतलः॥ शीत इति गात्यर्थे त्यादिना कर्तरि क्तः अर्श आद्यच् वा॥ सप्त शीत
लस्य स्य॥ वंद्व प्रसंगा दाग त स्तु त्का प्र कृत माह ध्रुव इत्यादि। स्थिरत्वात् ध्रुवः ध्रु गतिस्थैर्ययोः चू कुटादि
त्वात् हि· त्वं इगुपधत्वात् को वा ध्रुस्थैर्ये स्क वः क इति वा डुलकारतोऽपि केध्रुव इति तु कोऽमरदी। उत्तानपादस्या
१४ पत्यं औत्तानपादिः अपित्वाहर्ष्ये ध्रुवकेत्यणि प्राप्ते बाह्वादित्वादिञ् ध्रुवस्य॥ अगस्त्य इति अगं विंध्यं त्यस्त्वा
नित्यगस्त्यः अन्येभ्योऽपीति डः पारस्करादेराकृतिगणत्वात् सुट् विंध्याख्यमगं स्त्यायति संहतमगमस्यते
त्यगस्तिः वसेस्तिः वा कुल्यादस्यतेरपि तिः शकंध्वादिरित्याह तथा च शाब्दार्णवः अथागस्त्यः कुंभयोनिरग राम
स्तिनाध्यासित विंध्यशृंगमिति भट्टिः। कुंभः संभव उत्पत्तिस्थानमस्य कुंभसंभवः॥ मित्रावरुणौ देवर्षी दे ५१

स्तिः कलशीसुत इति अग २

स्यापत्यमित्यत इञ् यद्यपि मित्रस्योर्वशीदर्शनाद्रेतश्च्युतं तन्नेन क्रियाकुलेन निहितं तत्रायं जातोऽत एव कुम्भसंभव इ॰

वनाहं द्वेचेत्यानङ् ऋषिसमुदायस्यात्वपित्वात्तत्तति प्रसिद्धस्तथापि सहचाराभेदाध्यवसायादुभयसेजोजत्वा
च्चोभयापत्यव्यपदेशो मैत्रावरुणिः अत एव भेदविवक्षायां वारुणिरपि तथा च भारते अद्यापि दक्षिणाशां यावा
रुणिर्न निवर्त्तत इति तथा च व्याडिः मित्रावरुणयोः सूनुरौर्वशेयश्च वारुणिरिति अन्नैः पिहृश्यते और्वशेयागस्त्य
मैत्रावरुणास्त्वाग्निमारुता इति नामनिधाने त्रीण्यगस्त्यस्य॥ अस्येति अस्यैवागस्त्यस्य लोपयतीयोषितां रूपा
भियानमिति अपि चापि लोपामुद्रयति स्वष्टुः सृष्टिमिति मुद्रा ततः कर्मधारयः पतिशुश्रूषालोपेषु अमुद्रा
न मुदं रातीति लोपामुद्रा एषो दरादिरिति तु स्वामी। समानो धर्मोऽस्य स्यामिति सधर्मिणी पत्नी अन्ययोगव्यव
च्छेदकोऽत्रैवकारः एकमगस्त्यपत्न्याः॥ नक्षत्रमिति न क्षरं क्षिक्षयेन क्षरतीति न क्षत्रं क्षद गतिहिंसयोः छु
नूनभ्रानापादिति नञः प्रकृतिभावः नक्षधातोः अमिनक्षिकलिभ्यो त्रइत्य त्र प्रत्ययेन क्षत्रमित्यन्ये। ऋष
ति गच्छति ऋषीणां तौ ऋषिवृषिघृदिभ्यः कित् इति षः षष्ठ्याः कसीति कत्वे षत्वे ऋक्षो। भातीति भं पूर्ववङ्डः। तरंत्य
नया ताराभिदादिपाठात् रङ् गुणः दीर्घो निपातनात्। तारकेति कर्त्तरि ण्वुल् तारका ज्योतिषीती त्वाभावः अपि

नक्षीयते४

शब्देन तारकापि वा स्त्रियां। अस्त्रीत्वेपि रूपभेदनिश्चितः क्लीबलिंगास्यो डुशब्दस्य साहचर्यात् क्लीबत्वमेव कनीनिका
यां न क्लृप्तेन तारकं। तारकापि चेन्यून एव कोषांतरे न क्लृप्तेने त्रमध्ये च तारकं तारकापि चेति शाश्वतः। तारश्च न क्लृप्तेने
त्रमध्ये च तारा स्यात्तार इत्यपीति व्याडिः। द्वित्रैर्व्योम्नि पुराणमौक्तिकमणिच्छायैः स्थितं तारकैरिति च। अंतिकं व्र
जति तारकराज इति तार विष्वा उडूनि डीङ्·उत् पूर्वाद्बहुलवचनात् उवतेरिति डुर्वा डुह इंगताविति डुस्वा
मीईश्च्यते मृगघादयस्वेनीडेरुः। अंदे स्वोत्वंक्रस्वादिः प्रसरस्तु डुगणे सौरदर्शनी योथपा स्त इति माघप्रयोगा
त्वषट्तारकापाः॥ दाक्षायण्य इति दक्षस्यापत्यं दाक्षि। आसुतेरुपसंख्यानमित्यत्र केचि दासुरिदाक्षोरिति
दाक्षायणी ति पारायणं। उपाध्याय सर्वस्येपि तद्देवोद्भूतं नकलिंगादयस्मात्तदर्शनात्तन्नडादिभ्यः फगित्याकु
लिंगवंतः गोत्रत्वाभावान्न डादावनाकृतिगणोऽस्यापाठाच्चसर्वानं दक्षस्य प्रजापतेरपत्यानि दाक्षायण्यः
गोत्रत्वमुपचर्य गोत्रे कुंजादिभ्यश्च्फञिति जातेरस्त्रीविषयादयोपधात् ङीष् इत्याह दक्षस्यापत्यं दाक्षाय
णी अत इञ् अनंतरापत्ये पि हपायेन वत् यञिञोश्चेति फगिति तु स्वामी स्त्रियामासुरिदाक्षिभ्यां स्फञ् इत्युप

संख्यायते दाक्षायणी श्रीशिवनिर्वभासे नंदीति स्वामी दक्षमयतेन्युः प्रजापतिर्दाक्षायण्यस्ताश्च अश्विनी
भरणी कृत्तिका: षट् अत एव नित्यबहुवचनांता: रोहिणी मृगशिर आर्द्रा पुनर्वसू द्वौ पुष्य: आश्लेषा: मघा
स्त्रियां नित्यबहुवचनांता: पूर्वफल्गुन्यो उत्तरफल्गुन्यौ द्वे पाणिवर्त्तकारित्वात् हस्त: देवपथादिस्थत्वेतिके नो
लुक् ज्योतिषे तु स्त्रियामपि दृश्यते अन्यास्त्व व्यभिचारलिंगवचना दृश्यते चित्रा स्वातिस्त्व स्त्रीपुंसयो: अक
नीप्यामिती एव स्त्रीत्वे ङीष पि विशाखे द्वे अनुराधा ज्येष्ठा मूल: पूर्वाषाढा उत्तराषाढा श्रवणा धनिष्ठा शत
भिषग्ज्ञांता पूर्वभाद्रपदे द्वे उत्तरभाद्रपदे च द्वे रेवतीति अश्विन्याद्या: सप्तविंशति तारका दाक्षायण्य उच्यं
ते एतासु प्रसिद्धपर्यायास्त्यक्ता न्यात्रिवध्नाति ॥ अश्वयुगित्यादि अश्वं युनक्ति वध्नाति रूपेण अश्वयुक् जा
ता आत्विगादिना क्विन् अश्वरूपयोगादश्विनी इति ङीपु अश्वकर्मिणय अश्विन्यस्या दानीत्वहे अश्विनीन कत्तस्य
॥ राधेति राध्नोति कार्यमनया राधसाधसंसिद्धौ गुरोश्च हल इत्यकार: राधा ॥ विशाखवति व्याप्नोति विशाखा शा
खद्वयात्मेत्र चूतालच्यादि: विशाखे द्वे अत एव द्वित्वमुचितं विशाखे न इ मिलत्याचरामायणे पत्न्यो मे ध्यग

कार्यके

टी. ५२

स्तत्र सुग्रीवः प्लवगेश्वरः॥ विशाखयोर्मध्यगतः संपूर्ण इव चंद्रमा इति अत एकत्वं प्रमादादिति कौमुदी नक्षत्राभे
द विवक्षायां त्वेकवचनमिति सुभूतिः एकतारापेक्षये कवचनमिति भोजः छांदसा अपि भाषायां प्रयुज्यंत इ
ति विशाखयोस्त्वन्ये कत्वादिति सर्वानंदः मारुतोऽथ विशाखयेति वाचस्पतिः द्वे विशाखायाः॥ पुष्य इति सिध्य
न्त्यर्था अस्मिन्निति पुष्णाति साधयति कार्याणि वा पुष्यः सिध्यः पुष्यसिध्यो नक्षत्रे इति क्यपि निपातः पुष्यंत्यस्मि
न्निति ष्य इति तु पचतुष्टौ अर्धादय स्त्विति पक्षे उपधेत्वं च तिष्यः त्रीणि पुष्यस्य॥ श्रविष्ठेत्यादि श्रूयते शुभकर्म एय
तिशयेनेति श्रविष्ठा श्रूयणोते अजादेर पूमतुपु इष्ठन् विन्मतोर्लुगिति मतुपू एवं धनधान्योपचाद्यजं तान्मतुपा
दिना धनिष्ठा द्वे धनिष्ठायाः॥ स्युरित्यादि प्रोष्ठो गौः भद्रश्च गौः तत्पदमिव पदमस्या इति प्रोष्ठपदाः भद्रपदाः
अत एवायं शब्दो ह्रस्वादिरिति वर्णविवेकः ग्रहपतिरिव भद्रपदानुगत इति श्लेषः तथा च पूर्वभद्रपदे द्वे उ
त्तरभद्रपदे च द्वे इति फल्गुनीप्रोष्ठपदानां चेत्यत्रोक्तं किंच चांद्रसूत्रं जानेः प्रोष्ठपदान्तरस्य जेरिति तस्मा
द्दीर्घादिपाठः प्रमाद इति तु कौमुदी भाद्रपदा सुभगंयं सलिलोत्थमिति ज्योतिषे कुल्लेखकदोषात् पूर्वप्रोष्ठ

णि

राम ५३

पदे द्वे उत्तरभद्रपदे द्वे समुदायश्चासां चतुःसंख्य इति बहुत्ववचनं केचित्तु भद्रपदेन युक्तः काल इति प्रयोगा
त्पुंलिंगो भद्रपद इत्याहुः यत्तु कदा पूर्वे प्रोष्ठपदे इति तत्तारकयोर्द्वित्वादुपपद्यते। सुप्रातसुश्वसुदिवेत्यादौ
प्रोष्ठपदा भद्रपदाश्च निपातिताः प्रोष्ठौ गावौ पदावस्याः प्रोष्ठपदा अर्थग्रहणान्न इदपरासुप्रातेति सा द्वे फल्गुनी
प्रोष्ठपदानां चेति बहुत्वं न ईप दौ भद्रपदः भद्रपदा चेति स्वामी भद्रपदशब्देन तारकाविशेषाणां समुदाय उच्य
ते तिरोहितावयवभेदप्रक्षएकवचनं प्रोष्ठपदाशब्दस्तूद्भिन्नावयवभेदं समुदायमाचष्टे एतत्पक्षे बहुव
चनमिति मैत्रेयः द्वे पूर्वपदोत्तरभद्रपदानां॥ मृगेति आकृत्या मृगस्येव शीर्षमस्य मृगशीर्षं मृगशिर इव
शिरोस्य मृगशिरः स्वरूपभेदात् क्लीबत्वं सौम्या मृगशिरः सुमृगशिरा इन्वलाः शिरस्ताराइति स्त्रीकांडे बोपालि
ते त्वस्त्रीत्वं सौम्या मृगशिरा पिवृतीकल्याणया मृगस्त्वा। मृगशीर्षं हस्तिजातौ मृगः पशु कुरंगयोरिति व्या
डिः॥ अग्रे हायणमस्याः आग्रहायणी मार्गशीर्षादरस्य वर्षप्रवृत्तेः प्रज्ञाद्यणि पूर्ववत् पदादिति णत्वं यद्वा आग्र
हायण्यश्वत्थाट्ठगिति निर्देशात्स्वार्थेऽण् गौरादिङीष् अणंतादेत्वङीपि सिद्धे गौरादिषु पाठोऽस्य प्रवृत्ते वक्ष्य

वनिषेधार्थःतेनाग्रहायणीमार्गइतिसिध्यतित्री॥णीमृगशिरसः॥ ॥इल्वलाइतिइल्वलाःमानस्त्रिवलिसि
पणिसितंडुलांकुशचषलेल्वलविस्पशन्याइतिइलस्वप्नेवलच्प्रत्ययोगुणाभावश्चनिपात्यतेइल्वतिश्री
णयंतिमरुतोदेवताइल्वकानक्षत्रमितिश्रुतेरितिश्रुतेरितितुस्वामीएकंमृगशिरसःशिरोदेशस्थानांपं
चस्वल्पतारकाणां॥बृहस्पतिरितिबृहतांदेवानांगुरुत्वात्पतिःतद्बृहतोःकरपत्योश्चोरदेवतयोरितित
लोपसुटौबृहतांपतिरित्यषष्ठ्यलुक्॥सुराणांदेवानामाचार्यःसुराचार्यः॥गिरांपतिःगीर्पतिः॥अहरादीनां
पत्यादिषुवा॥घ्यपसंख्यानमितिरेफस्यरेफादेशःरेफाभावपक्षेविसर्जनीयोपध्मानीयौगीःपतिःगी
र्पतिःगीष्पतिरित्यसाधुःकेचित्तुकस्कादित्वात्साधुरितिचाहुः॥प्रशस्तधिषणायोगात्धिषणःअ
ष्टिषुधिषचसंज्ञायामितिक्युःधिषणइतितुस्वामी॥गृणात्युपदिशतिगुरुःगृशब्दे॥कृग्रोरुच्चेतिकुःउ
श्चांतादेशःउरणपरइतिरपरत्वं॥असुरैर्हतान्पिमंत्रादिनोजीवयतिजीवःतथाचरामायणेअनाता
नष्टसंज्ञाश्चआहतान्बृहस्पतिःदिव्याभिर्मंत्रयुक्ताभिरोषधीभिरजीवयत्॥इति॥अंगिगतोअंगिर

राम
१५

स्पृहत्यस्तुन्प्रत्ययो निपातितः॥ अपत्ये ऋष्यंधकेत्यादिना अण् अंगिरसोऽपत्यमांगिरसः बहुत्वे लुकि अंगिरसोपि
अभेदोपचारादंगिराश्च यथा भृग्वश्चांगिराश्च चरतीति ॥ भार्गवे आंगिरस साध्रुत्वमिति रंतिदेवः दिवस्पतिवत्
वाचस्पतिः ऋषयः सप्त धीमद्भिः स्मृताश्चित्रशिखंडिनः इति हारावली। अंगिरा एव चित्रशिखंडी ततो जातश्चित्र
शिखंडिजः सप्तर्षिजोपि समुदाये हि प्रवृत्ताः शब्दा अवयवेष्वपि वर्त्तंत इति कृत्वा न वृहस्पतेः॥ शुक्र इति
शोचति सदा दैत्यनाशेनेति शुचेः रक् इत्यादिना रक् शुक्रः रुद्रस्य शुक्रद्वारेण निर्गतत्वात् शुक्र इति तु स्वामी।
दैत्यानां गुरुर्दैत्यगुरुः। कविरेव काव्यः चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ्। कवेरपत्यं काव्यः कुर्वादिभ्यो ण्य इति स्वा
मी। वष्टीत्युशना वशकांतौ वशेः कनसि रिति कनसिः ग्रह्यादित्वात् संप्रसारणं ऋदुशनसित्यादिनाऽनङ् उः उश
नासंबोधने तूशनन सखिरूपं सांतं नांतं तथाप्यदंतमिति विशेषः॥ भृगोरपत्यं भार्गवः बहुत्वे लुकि भृगवः॥ कोति
ति कुशब्दे अच इः कविः कविस्तु भेदादिति स्वामी षट् शुक्रस्य॥ अंगेति अगिर्गत्यर्थः मंदारवदारन् अंगारः अं
गारइवांगारकः कन् अंगानीयर्ति पीनत्वादिति तु स्वामी। कुः पृथिवी ततो जातः कुजः। भौम इति शिवाद्यण्।

लोहितवर्णान्यंगान्यस्य लोहितांगः। मह्याः सुतो महीसुतः। पंचमंगलस्य।। रौहीति रोहिण्या अपत्यं ढक् रौहि
णेयः। बुध्यते बुधः कः। सोमः पितृत्वाद्देवतास्य सोमात्ट्यण् सौम्यः गर्गादित्वादपत्ये यञिति श्रीव[illegible]ग
र्गादावस्य पाठाभावात्तन्न त्रीणि बुधस्य।। सौरिति सूरस्यार्कस्यापत्यं सौरिः इत्यादिः सौरस्तत्स्येदमणिति स्वामी। पंगु
त्वात् शनैश्चरति अच् शनैश्चरः प्रतीकल्लङ्गणाया शनैरपि शनैश्चरे मंद इति वाचस्पतिः शनि सौरि शनैश्चरा
इति रभसात् शनिरपि हे शने।। तम इति ताम्यतीति तमसुक्तोह्या यां सर्वधातुभ्योऽसुन् तमः सांतः क्लीवे तमसा
तित्वात्तम इति स्वामी वक्ष्यति नानार्थे राहौ ध्वांते गुणे तम इति तमांसि गुणतिमिरं सैंहिकेय इति त्रिकांडशे
षः। स्वर्भानुस्तु तमो राहुरिति पुंस्कांडे रत्नकोषामरमालयोः पुंलिंगेपि। रहयति सूर्याचंद्रमसौ शौर्ये रहयति
गृहीत्वा त्यजति चंद्रार्काविति राहुः रहत्यागे रहश्चेत्युण्। स्वराकाशे भाति स्वर्भानुरिति क्षुभ्नादित्वात् पूर्वप
दादिति नणत्वं। सिंहिकाया अपत्यं सैंहिकेयः।। विधुंतुद इति विधुरुषोस्तुद इति खश मुम् पंच राहोः।। सप्तऋ
ति मरीच्यत्रिमुखाः सप्तर्षयः प्रत्येकं चित्रशिखंडिन उच्यंते सप्तर्षयः दिक्संख्ये संज्ञायामिति समासः। सु

राम

खमाद्यः प्राथम्यो मरीचिरंगिरा अत्रिः पुलस्त्यः पुलहः क्रतुः। वसिष्ठश्चेति सप्तैते ज्ञेयाश्चित्रशिखंडिनः इति चित्रा विचि
त्राः शिखंडश्चूडविशेषो येषामिति चित्रशिखंडिनः सप्तर्षीणामेकं॥ राशीतिराति फलमिति राशिः राशयोह्यहो
रात्रमध्ये द्वादशोदयं ते। लगति साध्ये निर्जलं मेष उलजी उलस्जी त्री डइतिक्तः श्वीदितो निष्ठायामिती ए निषेधः आ
दितश्चेति निष्ठानत्वं न तस्यासिद्धत्वाच्चोः कुरिति कुत्वं रोशाय एवक इत्याह॥ एकं राश्युदयस्य॥ नेत्विति नेराश
यो मेषवृषादीये षां तेन तथा॥ सूरेति सूते प्रेरयति धकारं सूत्रेरणे सुसूधाञ्गृधिभ्यः क्रन् सूरो दंत्यादिः वा
रुणी वारुणी भूत सौरभी सौरभी स्यदमितिदंडि यमकात शुद्धि चिमीनां दीर्घश्चेति क्रन् सूरस्तालव्यश्चेति
उक्तलिंगः सूरति सूरः सूर सेवति स्वाम्यपितालव्यादिः सुभटे सूरः सूर्येऽपि दंत्योपीत्यूष्मविवेकः कुमुदाक
राद्वा सौढम्सूरभासइनिवासवदन्ता स्लेषादपितालव्यत्वमायाति। सरति सुवति प्रेरयति कर्मणि लोकानि
ति तच्चोदिते लोकानां कर्मणि प्रवृत्तेरिति वा सूर्यः राजसूर्यमृषोद्येत्यादिना निपातितः॥ इयर्त्यर्यमा र्नत्वः॥
श्वयुक्षन्पूषन्प्लीहन्निति निपातितः॥ अदितेरपत्यमादित्यः॥ द्वादशमूर्त्तित्वात् द्वादशात्मा॥ दिवा दिनंक

सूय२

टी॰ रोतिदिवाकरः॥ दिवाकरादिपंचसु दिवाविभेत्यादिनाट्भास्करांतेत्यस्मादेव निर्देशात्सत्वेभास्करः अतःक
कमीत्यादिना अहस्करः भास्कराहस्करौ कस्कादित्वात्सत्वमितिस्वामी॥ तिमिरं वर्द्धतीतिवंधेर्ब्रध्नविबुधौ चे
तिन कब्रध्नो [illegible] रेफवान् रुड्भेदस्मूलयोस्तकारवान्॥ भासः संत्यस्य भास्वान् मतुप् भादुपधायाश्चेत्यादिना
वत्वं॥ विवस्ते विविधप्रकारेणाछादयति वस आछादने विपूर्वात् क्विप् विवोरश्मिस्तद्योगाद्विवस्वान् पू
र्ववन्मतुबादि॥ वौ वसिरति कमेविवासोऽस्यास्तिएषोदरादित्वात् विवस्वान् राज्याद्युतिक्रमवानित्य
र्थ इतितुकौमुदी॥ सप्ताश्वा अस्य सप्ताश्वः॥ हरितोनीला अस्य हरिदश्वः॥ उष्णारश्मयोऽस्य उष्णरश्मिः॥ अश्वाप
स्वदुहितुरिछायैविश्वकर्मणामंत्रे हत्वा विकर्तितइति विकर्त्तनः कृती छेदने विपूर्वः कृत्य ल्युटौबहु
लमिति कर्मणि ल्युट् देवैरर्च्यत इति अर्कः घञ्चजोरित्यादिना कुत्वं॥ कृदाधारार्चिकलिभ्यः के अर्कं
इतितुकौमुदी॥ अंडे द्विधाकृते चार्त्तं दृष्ट्वा पितरमब्रवीत्॥ आर्त्तस्त्वस्तवमाडेतिमार्त्तडस्तेन सस्मृत इतिराम
मृतंडस्यापत्यंमार्त्तंड इतिस्वामी वेदेतु मार्त्तंड इत्येवपावात् आर्त्तस्त्वमाभवांडेतितंमाताप्रत्युवाचहेति

व्युत्पत्त्यामार्त्तंडोदीर्घमध्यइतिश्रीनारायणसर्वज्ञत्वरणाः। अथमार्त्तंडमार्त्तंडाविति नाम निधानेगतानु
तानुगतिकत्वादित्याहुः। शब्दार्णवेपिमार्कंडोपि। मिहतिसिंचतिमेघरूपत्वान्मिहिरः। आदित्याज्जायतेवृष्टि
रितिश्रुतेः। तथाचसांबपुराणे मिहेतिसेचनेधातुर्मेहनान्मिहिरः स्मृतइतिहरुद्वंद्वस्त्वाहमहिंपविभ्वाम
हिरइतिपठन्मिहेरपारणाय तयामिहिरोऽसाधुरित्याह वयंतु त्रिकांडशेषेमहिरमिहिरगोधाः काल
हात्पपम्पापाणिरितिदर्शनात्क्षीरस्वाम्यादिभिर्मिहिरइत्येवव्युत्पादनाच्चमिहिरइत्यपीत्याचक्ष्महे। अ
रुतीत्यरुणः। अर्तेश्चेत्युनन्। अरुणोऽस्त्यस्येत्यरुणइतिस्वामी। वर्षेणलोकान्पुष्णातिपूषा। श्वन्नुक्षन्पूष
न्नित्यादिनानिपातितः। हृद्वचनादौ इन्हनिति सौ चेतिनियमाद्दीर्घाभावः॥ दिवोमणिरिवद्युमणिः। दिविम
णिरितिस्वामी। तरंत्यनेनसंसारंतरणिः। तरतेः अर्त्तिसृधृधम्यम्यश्यवितृभ्योऽनिरित्यनिः। मयतिमिमिदा
स्नेहने। असिचिमिदिशसिभ्यः क्त्रः। मित्रो हितकारः॥ चित्रभानुः कृशानादित्वाण्णत्वं। चित्रभानुर्विभावसु
अग्निपर्यायेप्युक्त्यादितो विशेषेणरोचते दीप्तो अनुदात्तेतश्चेतियुच्। विरोचनः॥ त्विषांपतिरितिदिवस्पतिवदलुक्

तेरुच

किकलिंगः वाक्यमेवप्रचुरप्रयोगित्वान्निबद्धमितिश्रीधरः। पत्युस्त्विषामिदसहोषधयः कलत्रस्थानमिति
माघः। गीष्पतिवदहर्पतिः। भातीतिभानुः दाभाभ्यांनुः। हंतितमोगच्छतिवाहंसः हन्हृवदिहनिकमीत्यादिना
सः। तपतीतितपनः ल्युः बहुलमन्यत्रापीतिसूत्रेणितुसर्वधरः। तापयतेस्तापनोपि। धातुर्हंसः सहस्रांशु
स्तपनेनोरविरितिसंसारावर्तीत। स्तेनसवितात्दजंतः। रूपतेशद्युतेस्तरूपतेरविः। अचंद्रः सप्तविंशतत्
सूर्यस्य॥ मावुर इति सूर्यः कारुणिकः अतो देवानां यथेष्टवरंमाददात्विति धिया अष्टादशचंद्रादयो वि
प्रदेवतानामंतरेणस्थापिताः तथाचागमः तत्रशक्रोवामपार्श्वे दंडाख्योदंडनायकः वह्निस्कंदक्षिणपा
र्श्वेपिंगलोनामतत्त्वसः। यमोपिदक्षिणेपार्श्वख्यातोमावरसंज्ञया। पूर्वद्वारेतुहहरौ कमात्र्वकुल्मासप
क्षिणे। राज्ञुस्वरोगजश्रोषोक्रमेणतावित्यादि अत्रप्राधान्यात्तुत्रयएवोक्ताः परिपार्श्ववर्त्तत इति परिस्रु
रवंचेतिचकारात्वक्रुकौसुदीकारोप्याह पारियार्श्विका इति बहुवचनोन्यादि बहुवचनांनागणस्यसूच
का इत्यन्येपिग्राह्याःस्तवराज्ञुः श्रोषः स्वरः पक्षीद्वारिकोजान्दकारकः। पिंगो ११ ग्रजश्चप्युरुषः श्राप्तःपातप्र

राम
५७

तापकौ॥ आश्विनेयौ तथा दंडी कुल्माषः पार्श्वगा रवेरिति मठति वसति सूर्यसमीप इति माठरः मठ मद निवास
योः अंबरवदरत्वा कुल्का हीर्घः मठरस्यापत्यमिति स्वामी पिंगलवर्णत्वात्पिंगलः दंडकारित्वात्तु दंडः दंडे
स्यास्तीति स्वामी सूर्यपार्श्वस्थानां माठरादित्रिकमेकैकं त्रयाणां॥ सूरेति सूरस्य सूतः सारथिः। अरुणवर्ण
त्वादरुणः। अविद्यमानावूरू अस्य अनूरुः। काश्यपिरिति वा बाह्वादित्वादिञ्। गरुडस्याग्रजो ह्यरुण एते पंच
सूर्यसारथेः॥ परीति परितो विष्यते व्याप्यतेऽनेनेति परिवेषः घञ् अज्वा तथा च डुलिंगः परिवेषः स्यात्प
रिधौ परिवेषण इति मूर्द्धन्यांते रुद्रः वेष्टने परिवेशः स्याद्भानोः स विषमंडल इति तालव्यांते रभसः एवं च वि
शतिवेवेष्ट्योर्घञिति कौमुदी। परितो धीयते परिधिः कर्त्तरि किरिति दुर्गसर्वानंदः। उपसूर्यकमंडले द्वे नाम्नी
तथा च मेडले परिवेशश्च परिधिश्चोपसूर्यकमिति त्रिकांडे भागुरिः परिधिर्यज्ञियतरोः शाखायामुपसूर्य
क इति नानार्थे वक्ष्यते सूर्यमुपगतमुपसूर्यकं प्रादिसमासः स्वार्थे कन्। मंडलं पूर्ववत्सं क्तेसमूर्च्छिता रवेरिंदो
श्च किरणाः पवनेन मंडलीभूतास्तत्र व्योम्नि परिवेश इति वराहः चत्वारि चंद्रसूर्ययोरुत्पातादिरश्मिमंड

५८

टी॰
५८

लस्य॥ किरेतिकीर्यन्तेसौ किरतेः कॄगॄद्दृजिमंदिनिधाञ्भ्यःकुरितिकुः किरणाः॥ वसंतिरसारागाः॥ वा अस्मिन्
स्नः वसेः स्फायीत्यादिनारक्संप्रसारणंनरपर इत्यादिनाप्रतिषेधाद्वा द्रुलकाद्वा शास्तिवसीतिनषत्वं। मापय
न्प्रमापयन् [struck through] गगने आखतिगच्छति मयूखः मामानेउखणखेवतिदंडकोगत्यर्थः अत्र पृषोदरादिः।
वस्कनस्कम्भिमितिमयूखः॥ माङ ऊखोमय चेत्यूखप्रत्ययोमयादेशश्च अमतेअंशुः अमगत्यादौ मृगया
दयश्चेतिकुः मुकुशतालव्यः अथो दुर्वै खुश्च भयं करेकरेम हौषधीनष्टकरांशुमेशुभ इतिजानकीहरण
यमकात्॥ गमनेभसतिदीप्यतेभसमर्त्सेनदीप्त्योः वसेस्तिरितिवाद्गुलकात्रिप्रत्ययः पृषोदरादित्वात्त्वग
नभागलोपगभस्तिः॥ निघर्त्तिजननमितिघृ करणदीप्त्योरित्यतोघृणिः घ्निपार्ष्णिवृर्णीभूर्णीइतिनिपा

षि२

तितः॥ घृष्नोतिप्रगल्भतेनिघृषाधातोर्दृषिम्याकिदितिनिः किच्चपृष्णि॥ दिधीतेदीप्यतेदीधीङ् दीप्तिदे
वनयोः क्तिन्स्ने पितिःतितुत्रेप्यग्रहादीनामितिइण्निषेधाभावादिड्यीवर्णयोर्दीधीवेव्योरितीकारलो
पः कौमुदीकारस्त्वाहगभस्तिः स्त्रियामपीतिजानातेवकएवपद्यपिदीधितिमेकांसुस्त्रारम्भ्यभिधानं

राम
५८

स्येवेति वररुचिस्तथापि मरीचिः स्त्रीपुंसयोरिति हवामनादयश्च । अभिनाइति स्त्रियामिति कात्यायनदी
धितिरित्यत्राथ त्वीयते एकादश चेंदुसूर्यरश्मेः ॥ स्युरिति प्रभादयः स्त्रियां स्युरिति संबंधः रूपभेदादेव स्त्रीत्व
मित्यन्ये प्रकर्षेण भात्यनया प्रभा आतश्चोपसर्गे इत्यङ् रुक् रुचित्विट् भासः संपदादिक्विंतनाः भास् सांता । स्त्री
सौधजालप्रविष्टैर्भाभिर्भानोरिति वेणीसंहारे भावस्तौहे नौतरतीयायां वैयधिकरण्येन योज्यमेवमन्यत्रा
पि योज्यं अन्यस्त्वत्र एव पुंस्त्वमेवेच्छति । रुचिरिगुपधात् किन्तु । छविघुती शोभापर्यायसाधितेद्राविरिति
क्तिन्नो वा दिभ्यो वक्तव्यमिति क्तिन्नु । रोचिरिति अर्चिशुचिरुचिपिष्वादिभ्यइ तिसिः । ओषधायारा विहार
कत्वे नपुंसकत्वे ओषधीभिरनेनपूर्ववदिसिः शोचिः एकादश सामान्येन प्रभायाः ॥ प्रकाशइति प्रकाश
घोतौ घञंतौ आतपोऽजंतः त्रीणि रौद्रस्येति कोककरः ॥ अत्र कौमुद्यां त्वयं विवेकः ॥ किरणाद्येकादश अर्क
चंद्रसूर्यरश्म्याः प्रभाद्येकादशकं सामान्येन दीप्तौ प्रकाशादित्रिकमुष्णतरूपानुष्णस्पर्शे । मरीचि किरणइत्यां
दौ तु शब्दार्णवसन्निवेशोक्तसामान्यावगतिः यद्यपि शब्दार्णवे दीधितिरालोकपर्यायस्तथापि दीधितिमेका

सुस्कारम्भ्यभिधानंतुपुंस्येवेतिवररुचिवचनान्मयूखेष्वस्तिसेहोपात्तेत्यदोषः॥किरणादयःशोचिरंतारश्माश्चि
तितुसर्वानंदादीनांप्रमादः॥इहैवनानार्थेमयूखस्त्विट्करज्वालास्वितितंत्रांतरेच॥अंशुः॥प्रभाकिरणयोरि
त्युभयोपादानानर्थक्यापत्तेः॥शब्दार्णवेचद्वयोर्मरीचिः॥किरणोभानुरुस्रःकरःपदमित्यनंतरंप्रभानुरुच्यःचि
त्विड्भास्तुविद्युतिदीप्तयइतितुशब्देनव्यवच्छेदात्॥अतएवहैमनानार्थेअभिषंगेस्पृहायांचप्रभायांचरुचिः
स्त्रियामित्यपिपाठंहित्वागाभस्तोचरुचिःस्त्रियामितिपाठांतरंकलिंगादिजनितकुवासनैःकृतमुपेक्ष
णीयंउपमानाद्वागमयितव्यं॥रुचिर्दीप्तोचशोभायामभिष्वंगाभिलाषयोरितिधरणिः॥एवंचान्यत्रा
प्यधुनातनेकोषेयत्रक्वचिद्यथाव्यवस्थापितव्युत्क्रमःसूक्ष्मेक्षिकाभावभवभ्रमविजृंभितत्वाद्धेय
एवानाकरस्यानादेयत्वात्यदाहसाहसांकः॥तस्मादाकरमादायव्यवहर्तव्यमुत्तमैः॥मार्गस्तुनस्त्यज्यच
क्षुष्मानन्धकोगच्छतिदुरध्वनेति॥केचित्तुकिरणाश्चितात्प्रभेतिपृथगुपादानमित्याहुः॥प्रभादीनामाद्ये
त्यरश्मित्वाभावात्पृथक्पाठः॥द्युतिच्छव्योरिंदुप्रभायामित्युक्तेः॥पुनरिहोपादानंसामान्यार्थदीप्त्यादयो

राम ५९

मित्यर्थे कोष्णं कवोष्णं कदुष्णं

ह्यसाधारणा अपिकविभिः साधारणीकृता यथा मुखदीप्तिः चंद्रातप इति स्वामी॥ कोष्णमित्यादि ईषदुष्ण
मिति। कुवं वोष्ण इति कोः कवकादेशः। मंदोष्णमिति कर्मधारयः एते गुणे क्लीबलिंगाः गुणवति द्रव्ये वर्तमा
नास्तल्लिंगाः चत्वारि षदुष्णस्य॥ तिग्ममिति तेजयति तिग्मं तिज निशाने धु जिरुचिति जां कुश्चेति मक्कुक
वर्गश्चांतादेशः एवं तिज्जे दीर्घश्चेति स्वक् प्रत्ययः दीर्घत्वं कुत्वं च तीक्ष्णं॥ खरमिंद्रियं राति खरं रालादाने कः॥
खडकडि भेदे इति षोदरादित्वात् डस्य रः खरमित्यन्यः॥ तद्वदिति यथा कोष्णादयो गुणे क्लीबलिंगाः तद्वत्तित्र
त्रिलिंगास्तथा तिग्मादयोपीत्यर्थः॥ त्रीण्युष्णस्य। अन्यत्र तूपचारात् तीक्ष्णोऽसिः॥ मृगो तिजलाभास
त्वात् मृगाणां तृष्णा स्त्यस्या मर्शआद्यच् मृगतृष्णा॥ मरीचिरिव मरीचिका रवेप्रतिकृतौ कन् ग्रीष्मे मरु
देशे सिकता [illegible] दावर्क रश्मयः प्रतिफलिता दूरस्थानां जलत्वेनाभासंते तेन हा चि मृगतृष्णादि द्वयं॥
दिग्वर्ग विवरणं॥ काल इति कल्यते कलसंख्याने शब्दे च कर्मणि घञ् कालः कालयति सर्वमिति एयंतात्
पचाद्यच् इति स्वामी। दिश्यते स्म दिश अतिसर्जने क्तः षत्वं ष्टुत्वादि दिष्टः॥ नाहेति नागच्छतीति नञ्र्थे हनएह

टी०

चेत्यसुन्प्रत्ययः आहनस्यानेएहादेशः तस्मान्नुडचीतिनुट् अन्नडुशनइत्यादिनासावनङ् अनेहा। सां
नः अनेहसौ अनेहस इति। समेत्यनेने: ति संपूर्वादिणएरच् समयः चत्वारि कर्मणादि कालस्य॥ अथे
ति पक्षस्य मूलं पक्षान्तिः पक्षतिः ङीषि पक्षती च· प्रतिपद्यतेऽस्यां चन्द्रस्य रूपमुदयो वेति प्रतिपत् दाना
संपदादित्वात् क्विप् प्रतिपद्यते उपक्रम्यन्ते मासादिरनयेति स्वामी द्वे प्रतिपत्तिथेः॥ तदाद्या इति अत
सातत्यगमने अतन् अतीत्यादिना अथिन् पृषोदरादित्वादकारलोपः कल्प्यते तिथिः तेनैवार्थेनेति नु सो
मनंदी॥ द्वयोरिति स्त्रीत्वात् तिथिशब्द एव। एकं सामान्येन तिथेः॥ घस्र इति घसत्यंधकारं घस्रः घस्लृ अद
ने स्फायीतिरक्। दीङ् क्षये इत्यस्मिन् जिदीङ्· ष्य विभ्योन क्षु वा दुलकान्तकिङ्स्वः दिनं द्यति तमो निव्यी
पार स्थितिं वा द्यते: किन् दिनमिति स्मृतिः न जहाति कालं न जिजहातेरिति कनिन् अह इति नकारस्य
रुत्वं अहः। दीव्यन्ति दिवादिभ्यः किदित्यसच् किच्च दिवसः वासयति वसेर्ण्यन्तात् अर्त्तिकमियमिस्त्रमिवा
सिभ्यश्चेति अर् प्रत्ययः वासरो दन्त्यमध्यः रविर्मनागदर्शितवासरः सर इति ज्ञानकीहरणे वङ्गो वासरसंज्ञा

इति भट्टिमाघसमावेशः क्वचित्तु गुणादिहतैरो वाशी निवाश्शब्दः इति पठ्यते अतो वाशरः इति तालव्यमध्यमाकृ
त्स्नं ददर्श नं पंचवासरस्य॥ प्रत्यूषइति प्रत्यूषति रुजंति रात्रिं प्रत्यूषः ऊषरुजायामित्यत इगुपधत्वात्कः दी
र्घमध्योऽदंतः प्रत्यूषस्तु टित कमलामोदमैत्रीकषायइति माघात्॥ अहर्मुखं प्रारंभः अहर्मुखं कल्यं
नि चेष्टां अघ्नाद्यस्वातिकलेर्यक् कल्यं॥ उषदाहे ओषत्यंधकारं उषः किदित्यसि उषः प्रतिरन्योपसर्गनि
वृत्त्यै उषः प्रत्युषसि सद्रूसे हेमांते॥ उषसि सयावकसव्यलक्ष्मले खेति भारविः अधिगतनरतशोभैः प्रत्यु
षस्त्रीरिति माघः॥ भातं प्रकृतं प्रभातं आदिकर्मणि क्तः प्रभूर्वा ज्ञातेर्वा ईडुलकात्तनिनितुसर्वधुरः॥ प्रत्यूष
भातस्य॥ दिनेति स्यति दिनं सायः स्यादच्छेत्यादिना णः दंतः कर्मणि घञ् सायइति कौमुदी मातायथये
त्वव्ययवर्गे वक्ष्यति अतः सायमिती ह प्रामादिकं एकं दिनानस्य॥ संध्येति सम्यक् ध्यायंति तस्यां ध्यै चिंता
यामधिकरणेऽन स्वेति अङ्। संध्या॥ पितृप्रसूरिति पितृन् प्रसूते सस्तू हिषेत्यादिना क्विप् संध्यापितृप्रसूः
संधेति शब्दार्णवे निर्यकारोपि संधोच्छलितइति वासवदत्ता द्वे संध्यामात्रस्य॥ प्रेति अहरवयवेऽहः शब्दो

टी०
१

यामोदरवद्दतिवत्प्रथमं च तदहश्चेति प्राह्णः। राजाहःसखिभ्यष्टच् अह्नोह्न इत्यह्नादेशः। रात्राह्नाहाः पुंसि
इति पुंस्त्वम ह्नः। अपरं अपराह्णः। पूर्वापरेत्येकदेशिसमासः। अह्नोऽदंतादिति द्वयोर् णत्वं। अह्नो मध्यं म
ध्याह्नः। संख्याविसयपूर्वस्येति ज्ञापकात् समासः। विशेषणसमासो वा। एतास्तिस्रः संध्याः समाहृतास्त्रि
संध्यं आवंतो वेति ङीवत्वगोस्त्रियोरिति ह्रस्वत्वं पक्षे त्रिसंध्यी एकं दिनस्याद्यंतमध्यानां॥ अथ निशृणा
ति चेष्टाः। शॄ हिंसायां कॄगॄशॄदृ च निभ्यः। षरज्ञिति षरच्। शर्वरी तालव्यादिः। पृषोदरादित्वाद्दीर्घोऽपि। श
र्वरी शर्वरीति शब्दार्णवः। निशाम्यंति निशासर्वव्यापाराणां ननु करणं नि पूर्वात् शातनूकरणे इत्यस्माद् आतश्चो
ति भावेऽङ। आतो लोपः आदर्श आयच्च। निशा तालव्या। पृषोदरादित्वाद्ह्रस्वे तापि। गुणसंधौ पुंसि निट् स्यामात्तु
गीनमीति नाम निधानं। निशीथोऽस्त्यस्यां निशीथिनी शतालव्याश्च पथ्य निशीथ ह्रशान्तु किशोरा इत्यूष्म
विवेकात्। राति सुखं रात्रा ददाति नेरा शादिभ्यां त्रिः। कृदिकारादिति ङीष्। रात्री रात्रिस्तमस्विनी तिशब्दार्णवः। आ
द्यंतयोरर्द्धयामयोश्चेष्टाकालत्वेन दिनवत्वात् दिनवद्व्यवहाराच्च त्रियामा। क्षणाम व्यापारसुखं ददाति क्ष

राम
९१

णदा क्ष

णमवसरं ददातीति स्वामी। क्षपयति चेष्टाः क्षपा। च्चाद्वञ् आच्छादने इत्यतः पचाद्यजंतात् पिप्यल्यादय स्वे
ति चकारात् ङीषु। वरी। प्रभेति वत् विभा। विभायावरी आच्छादिका विभावरी। नक्षत्रादिभिर्विशेषेण भा
तीत्यातो मनिन् क्वनिवित्यादिना क्वनिवंतात् वनोर चेति ङीपु विभावरी। तमोयोगात्तमस्विनी असमाये
त्यादिना विनिः ङीपू। रजं तिरागिणो त्र रंजयतीति न मसावा रजनी क्षादिकारादिति ङीषू अनोरज्ञ निरपि
क्षिपेः किच्चेति चकारादनिः कित्वात्र लोयः। कार्यानर्हत्वात् निंदिता यामाः संत्यस्यां निंदायामिनिः यामि
नी। ताम्यंत्यस्यां। तमनेरिनन् मिः ङीषि तमी पचाद्यचि दापात मेत्यपि तथा च विदग्धमुखमंडने हादे रामह
वरतातमानइति तमीत्यमूलं तमेत्येव यावइति तुज्ञानोकादयः तदयुक्तं सततमीतमोभिरभिगम्यता
मिति माघदर्शनात् नाममनिधाने ह्यवयोरूपादानात् पावहयमेवन्याय्यमिति कौमुदी। वयं तु क्षीरस्वामी स
र्वधरादिभिस्तु तमी तीकारांतः पाठ एव स्वीकृत इति तमीती कारांत एव मूलपाठ एव स्वीकृत इति तमी
नीकारांत एव मूलपाठ इत्याचक्ष्महे द्वादशरात्रिमात्रस्य। तमीति तमो वह्नुला रात्रिस्तमिस्रा न मांस्य

६१

दी॰त्रसंतीतिज्योत्स्नातमिस्रेत्यादिनानियातितातामसीज्योत्स्नादित्वान्मत्वर्थीयोऽणङेनाम्नीनमोवडुल
२ योःरात्र्योः॥तमिस्रानुदर्शरात्रिर्ज्योत्स्नीस्यात्पूर्णिमानिशेतिशब्दार्णवदर्शनान्नामसीरात्रिमात्रेपीति
कौमुदी॥ज्योत्स्नीतिरात्रिरितिकाकाहिन्यायेनेहाप्यवीयतेचंद्रिकयाज्योत्स्नियायुक्तारात्रिःज्योत्स्नी
पूर्ववदण्एकंज्योत्स्नायुक्तायारात्रेः॥आगेतिपूर्वपरदिनयोःपक्षयोरिवमध्येवर्त्तमानत्वात्पक्षावव
स्तःपक्षिणीअतइनिःनिशीत्युपलक्षणंतेनागामिवर्त्तमाननिशायुक्तेदिनेपिपक्षिणीअहर्युक्ता
यामितिसरेफपाठेआगामिवर्त्तमानाभ्यामहोभ्यांयुक्तयोगोस्याइतिवहुव्रीहौटजभावःनद्विगोन
त्पुरुषात्तद्धितैःसमासांतविधेरनित्यत्वाद्वाएकंदिनद्वयमध्यवर्त्तिन्यारात्रेः॥गणेतिइहगणशब्दएकव
चनांतोवहुत्वसंख्यावचनइतिवहुगणेत्यत्रेडुमित्रःरात्रीणांगणोगणरात्रंराजदंतादित्वात्परनिपा
तःवहुगणेतिसंख्यात्वेऽहःसर्वैकदेशेत्यादिनाचूक्लीवत्वमत्रप्रमादःरात्राह्नाहाःपुंसीतिपुंस्त्वप्राप्त राम ६२
मपिपुंस्त्वंलोकाश्रयत्वान्नभवतीतिसर्वानंदःतत्कुशकाशावलंवादसारं॥नभवतिनपुंसकयोगःसं

रित्येके॥प्रा॰प्र॰२

ख्यापूर्वस्य रात्रिशब्दस्येति वररुचिवचनात् गणशब्दस्य च संख्यात्वात् क्लीबत्वस्य संभवात् तथा च नपुं
सकेऽयमेव वक्ष्यति रात्रं प्राक्संख्यपान्वितमिति कोशदीक्षान्येप्याहुः गणानां रात्रीणां समाहार इति द्वि
गोः कृते समासावयवाः समासान्ता इत्युक्तान्तेत्तरपदत्वाभावादकारान्तोत्तरपदो द्विगुः स्त्रियां भाष्यत इति
स्त्रीत्वाभावेन नपुंसकमिति क्लीबत्वं प्राप्तं बाधित्वा नेन नपुंसत्वे प्राप्ते पात्रादित्वात् क्लीबत्वमित्येके ॥ प्रेति दु
ष वैकृत्ये ऽ बुधपुण्यारंभोदोषायाः प्रदोषः प्रादिसमासः प्रारंभो दोषायायत्वेत्येकविभक्तित्वे तु उपसर्जनत्वे
गोस्त्रियोरित्यादिनाह्रस्वत्वं । ननु च दोषाशब्दोयमव्ययं तथा चायमेव वक्ष्यति नक्तं दोषा च रजनाविति तत्
कथमस्त्रीत्वत्ययान्तत्वे ह्रस्वत्वं सत्यं सत्त्वेतोपि दोषाशब्दोस्ति तथा च भट्टिः ततः कथाभिः समतीत्य दोषामा
रुह्य सैन्यैः सह पुष्पकं तद् इति हे ॥ अर्ह इति अर्हं रात्रेरर्हरात्रः निशारते ऽस्मिन् शेते निशीथः गोपीथावस्था
इति थकि निशीथ इति निपातितं सिंहावलोकितन्यायेन समाविशत्युत्तत्त्वाद्वयः हेरात्रिमध्यस्य ॥ द्यावि
नियामनियामः याते मे गिनिमकुयद्धायद्व तितु परमति त्रात्रिरहस्वा नेने तियम ज परमेघन्न । प्रपूर्वा द्वरतेः

प्राङ्क्रियते दक्षादिरस्मिन् प्रहरः पुंसीति घः द्वे प्रहरस्य॥ सपेति प्रतिपत् पंचदश्योर्मध्ये पर्वसंधिः पंचदशा
नां पूरणी तस्य पूरणे डट् इति डट् पंचदशी ति द्वयोरपि पूर्णिमामावास्ययोर्ग्रहणमुक्तं। तिथिसंधिः काल
एकं॥ पक्षेति द्वे पंचदश्यौ पूर्णिमामावास्ये पक्षस्यांतौ पक्षांतौ एकं॥ पौर्णेति मीयते तिथीनां क्षयो वृद्धि
श्चानेन मानेनेरीणादिकोऽसिप्रत्ययः [illegible] स्वाङः संपूर्णो यस्यां सा पौर्णमासी तिथिः सास्मिन् पौर्णमासीति
निपातनादण्। अथवा पूर्णो माः पूर्णमास्तस्येयं तिथिः तत्रभवा वेत्यण्। यद्वा पूर्णो मासो विद्यतेऽस्यां
पूर्णमासी। पूर्णिमेति पूरी आप्यायने भावे क्तः भाववचनांतादिमनिच् वक्तव्य इतीमनिच् पूरणं पूर्णिः
त्वादिभ्यः क्तिन्निष्ठावदिति क्तिन् नत्वं च पूर्णिमिमीते पूर्णिमा आतइति कः इति स्वामी द्वे॥ कलेति सा पू
र्णिमा त्र्यत्रयकाले प्रतिपद्योगात्कलाहीने चंद्रे अनुमन्यत इति क्तिन् अनुमतिः स्यादेकं॥ पूर्णइति से
त्येव सा पौर्णमासी। पूर्णश्चंद्रो राकास्यां रातिशुभमिति रादानेकृदाधारार्चिकलिभ्यः कः पूर्वाकुलकान्तकेऽएण राम
इति नद्भस्वः एकं॥ अमेति। अमानाम रवेरश्मिस्तस्य इडलोकेतिषिता। तत्र सोमो वसत्यस्याममावास्यातत्तः ६३

स्मृतेति अमा सह वसतोऽस्यां चंद्रार्काविति अमावस्यदन्यतरस्यामिति ण्यत्यमावास्या पक्षे वृद्ध्यभावनि
पातनात् अमावस्या॥ दर्शोमाऽमावसी चेति रभसः अथमावास्यामावासी वामामास्यथमामसीति शब्दा
र्णवे चानेकरूपता॥ दृश्यते याज्ञिकैः दर्शः पुंसि घः यद्वा न दृश्यते चंद्रोऽत्र मंगलवद् दर्शः दृश्येते ग मलन्से
ते चंद्रार्कावत्रेति दर्श इत्यन्ये॥ सूर्येन्द्वोः संगमोऽत्रेति व्यधिकरणे बहुव्रीहिः चत्वारि दर्शस्य॥ सेति साऽमा
वास्या चतुर्दशीयोगात् दृष्टचंद्रा सती सिनीवाली सह एन विष्णुना वर्त्तते सा लक्ष्मीस्तद्योगात् व्रीह्यादि इ
निः सिनी चंद्रकला सा वालाल्यात्र गौरादि प्रा वात् ङीप् सिनीं वलति धारयति वा कर्मण्यण् सिनीवाली
स्त्रियाः पुंवदिति न पुंवत्वं संज्ञापूरण्योश्चेति निषेधात् सिनी सिता वाला स्त्यस्यामिति स्वामी एकं॥ सेति
उदयेऽमावास्यायोगात् नष्टचंद्रकलाऽमावास्या कुहूः कुहयति विस्मापति कुह विस्मापने चुरादिः अतः
कृकमेतमितनिधनिसर्जिखर्जिभ्यः ऊः रिति वा कुलकात् कुहेरपीति धातुवृत्तौ पः मृगाधादित्वात् कुहुः
तथा च बधे चरुः रुरुः कुहूसरयू तत्र उकारेणाव स्त्रियामिति विंध्यवासीतदं नात् पुंस्त्वे प्राप्ते तदपवादमाह ए

प्र·टी·
६४

कं॥ उपेति रंजेरुपपूर्वात्भावे घञ् घञि च भावकरणयोरिति नलोपः वृद्धिः उपरागः उपरज्यतेनेनेत्युपरा
ग इति तु स्वामी॥ ग्रहणं ग्रहः ग्रहवृदृ इत्यप् राहुचंद्रार्कग्रासस्य॥ सोपेति वोपसर्जनस्येति सभावः उपर
क्तः कर्तरि क्तः इत्येकं राहुग्रस्ते चंद्रार्कयोः॥ अग्नीति अग्नेरुत्पातो वेक्षंतं उपआसन्नमाहितमर्पितं फ
लमस्येत्युपाहितः आकाशादिषु अग्नेर्वैकृत्यस्य॥ एकयोक्त्येति एकयोक्त्या अपृथग्वचनेन नरोदसीतिव
चंद्रार्कौ पुष्पवंतावित्युच्यते एकैकाभिधाने एकवचनांतोपि पुष्पवानिति मनुवंत स्त्रायमिति केचित्तु
रविशशिनौ पुष्पवंतावाख्याविति नाममालायां प्राक्प्रत्यग्धरणीधरशिखरस्थितपुष्पदंताभ्यामित्यास्त्र
र्यमंजर्यां च्चादंतत्व दर्शनान्नित्यद्विवचनांतत्वायं मिलितयोरेवाभिधायकत्वात्तथैव सर्वत्र दर्शना
च्चेति दिवाकरनिशाकरावितिदेवताद्वंद्वे चेति नानङ् तत्रानङ् तो द्वंद्व इत्यतो द्वंद्वग्रहणेऽनुवर्तमाने पुनर्द्वं
द्वग्रहणेन वेदलोकसहचरितद्वंद्वग्रहणात् अस्य तु द्वंद्वस्यानथात्वात् अतएव रविचंद्रावपिनोपलक्षि
तावितिघटकर्परः॥ एकं॥ अष्टेति उद्देसो यावत्कालमक्षि निमेनेत्र विकाशानंतरं पक्ष्माकुंचनं जायते स

राम
६४

क्षणः३

निमेषः तेऽष्टादश काष्ठा सा च दिक्पर्याये सा धिनासमूहवाचित्वात्काष्ठेत्येकवचनं एवमन्यत्रापि बोध्यं
एकमष्टादशनिमेषावच्छिन्नकालस्य॥ ताः काष्ठास्त्रिंशत् कला कल संख्याने कलयति कालः अच् टाप्
एकं॥ ताः कलास्त्रिंशत् क्षणः णु हिंसायां अच् एकं॥ ते तु क्षणा द्वादश मुहूर्तः हुर्छा कौटिल्ये बाहुलकाद् इजि
घ्रुषी तिक्तः सुडागमस्वराह्लोपश्छकारलोपः हलि चेति दीर्घः एकं॥ ते तु मुहूर्ता त्रिंशत् अहोरात्रः अह्ना
सहिता रात्रिरिति समासः गणरात्रवदत्वम् अह्नोरुविधौ रूपरात्रिरथंतरेषु उपसंख्यानमिति रुः अहोरा
त्रः द्वंद्वे त्वहोरात्रा विमौ शुण्या विति स्वामी एवं समाहारे स्त्रीत्वमथ होरात्रवामनलिंगात्तु शासने द्वियुर
पिपात्राद्यदंत इति नपुंसकत्वेन अहोरात्रं द्विरात्रमित्युदाहृतमिति सुभूतिः एकं॥ ते पंचदशाहोरात्राः
पक्षः पंचति भूतानि पचेः हृद्ववदिह नि कमिकसिभ्यः स इति बाहुलकात्सः॥ क्षपति अच् एषो देराद्वि
त्वाद्दर्णे विपर्यये पक्ष इत्यन्यः एकं॥ पक्षौ ताविति शुक्लपक्षः पूर्वसंज्ञः कृष्णपक्षोऽपरसंज्ञः क्रमेणैकैकं॥
तौ पक्षौ मासः स्वं चंद्रस्यायं मासः एतच्चांद्रमासः एतच्चांद्रेण मानेन सौरादिमानेन स्मृतमस्यते परिमीयते नेन

य२

नासौवामसीपरिमासोहलश्चेतिघञ्पृषोदरादित्वाद्धलंतेनोथ्यंतौद्वौवर्षाशकञामोवर्षाणामाग्रहणीए
इतिनामनिधीनानएकं॥ द्वावितिद्वौद्वौमाघादिमासौऋतुःइयर्त्तिऋतेश्चेतितुःचकारेणकित्वाद्गुणाभा
वःमाघफाल्गुनौशिशिरऋतुःएवंद्वाभ्यांमपरेपंचानतुचषडमीत्यादिवक्ष्यमाणेतत्कथंद्वौद्वौमाघादिमासा
वित्युच्यतेसत्यंएतदयनद्वयप्रदर्शनार्थंयुक्तंमार्गादिमासावित्युच्यमानेहेमंतशिशिरवसंतैस्त्रिभिरय
नंस्युक्तंस्यात्तन्नचतौरयनेकिंतुशिशिरवसंतग्रीष्मैःप्रावृट्शरद्धेमंतैश्चातःप्रकृतोपयुक्तमिदमुक्तं
वास्तवंतुवक्ष्यतेमार्गादीनांयुगैरितिऋतुवादस्त्वायंनविधिरित्यतोवक्ष्यमाणेनसहनपौनरुक्त्यंएकं॥
नेत्रिभिर्ऋतुभिरेकमयनंअयनेकौनेनइणगतौल्युट्एकं॥ अयनेइतिद्वेअयनेइतिद्वेअयनेके
नेअर्कस्योत्तरागतिर्दक्षिणाचउत्तरागतिर्माघादावभ्याषाढपर्यंतमुत्तरायणंदक्षिणागतिःश्राव
णादारभ्यपौषपर्यंतंदक्षिणायनंअयनद्वयस्यैकं॥ समरात्रिंदिवमवतुरेत्यादिनासाधुसमरा
त्रिंदिवयत्रविषुसाम्येऽव्ययंतद्दिग्धेऽस्येतिमतुप्संज्ञायामितिवत्वंविषुवत्विषुवमितिवप्रकरणे

शीर्षइति २

ऽन्यत्रापीति वः विषुवान्समरात्रिवासरः काल इति पुंस्कांडे वोपालितः विषुपोथ इति लोमादिसूत्रेर ङ्क्तिः द्वे विषुवस्य॥ मार्ग इति मृगशिरसा युक्ता पौर्णमासी नक्षत्रेण युक्तः काल इत्यण् अचि शीर्षादेशः मार्गशीर्षी पौर्णमासी अस्मिन्निति सास्मिन्पौर्णमासीति संज्ञायामित्यण् मार्गशीर्षो मासः एवं पौषादिरपि मार्गपौषयोः प्राणिनां बलमुपचीयत इति वैद्यकं ततः सहो बलमुपचितमस्मिन्नस्तीति सहाः सहशब्दान्मत्वर्थे मासतन्वोरिति यत् तस्य लुगकारेकाररेफाश्च वक्तव्या इति वा लुक् अपहेतु सहस्यः पौषरूढः तत्रेग्गर्गस हः सहस हा इति शब्दार्णवाददंतोऽपि सहशब्दः तथा च सहस्य प्रथमे मासि वा हयेहोषसंचयमिति चरकः मृगशिरा एव मृगः तथा मृगशिरा मृग इति रूढकोषात् तद्युक्ता पौर्णमासी मार्गी ततः पूर्ववदणादि मार्गः आग्रहायणी योगादाग्रहायणिकः आग्रहायण्यश्वत्थाट्ठक् ज्योत्स्नादित्वादणि आग्रहायणोऽपीति पुरुषोत्तमः चत्वारि मार्गमासस्य॥ पौष इति यो षैते घो पूर्ववत् पुष्यतिष्ययोर्नक्षत्रे णीयलोपो वक्तव्य इति यलोप इति विशेषः सहस्य इति तत्र साधुरिति यत् त्रीणि पौषस्य॥ तपा इति तपते रसिः तपः पुण्यमासत्वात्तपोऽत्रास्तीति तपाः सांतः सहोवत्साधनं मार्गवन्मा

घः हेमाघस्य॥ अथेति फलेर्गुक्चेत्युनन्फल्गुन्योऽङ्कस्वादी फल्गुन्योः काले जात इति फल्गुन्यषाढाभ्यां टानौ
विति टप्रत्यये ऽर्जुनेपि ङस्वादिरिति रूपरत्नाकरः फल्गुनस्त्वर्जुने मासेन दत्ते फल्गुनीस्मृते ति गोवर्द्धनानंदः का
तं त्रोण्णरौ तु पिशुन फाल्गुनाविति हृद्धिं निपात्य फाल्गुनोऽर्जुने हृष्टः फाल्गुनस्त्वर्जुने मासे फाल्गुनी चास्य पू
र्णिमेति वरणिः फल्गुनीभिर्युक्ता पौर्णमासी फाल्गुनी विभाषा फाल्गुनीत्यादिना चैगणेण फाल्गुनिकः फाल्गुनैः
तपस्सिसाधुस्तपस्यः त्रीणि फाल्गुनस्य॥ स्यादिति चैत्रिकः फाल्गुनिकवत्तु मन्यन्ते सर्वत्र कामदेवोत्र मनक्ताने
फलिपाटिनमिमनिजनां गुक्ष्वपटिनाकिध [illegible] तस्वे तितःधस्वाता देशः मधुः यद्वामधुवसंतेऽत्रास्ती तिमत्वर्थे
मधोर्ञ्चेति ञस्य वालुकि मधुः त्रीणि चैत्रस्य॥ वैशाख इति पुष्पगतं मधु त्रास्ति मधोर्ञ्चेति ञेमाधवः रा
धयायुक्ता पौर्णमासी राधी ततः पूर्ववद्गणिराधः त्रीणि वैशाखस्य॥ ज्येष्ठ इति ज्येष्ठइत्यण ह्येन पूर्ववत्तसं
ज्ञापूर्वकत्वाद्धृद्ध्यभावे ज्येष्ठोपि ज्येष्ठामासि च वृद्धे च ज्येष्ठा च गृहगोधिकेति त्रिकांडशेषः॥ प्रणशो॥ मित्रस्य
प्रसभमजनिज्येष्ठविरह इति कुमारदासः ह्यर्थं सिद्धस्वा सुतृशोत्व नमस्त्यत्र शुकशाव्दात्तलुगकारेकाररेफाश्च

८४

रा
६

वक्तव्या इति मुकुटः ॥ द्वे ज्येष्ठस्य ॥ शुचिस्त्विति ॥ अग्नौ शुचिरुक्तः ॥ आषाढ्या नक्षत्रं ततः पूर्ववदण् द्वयेन आषाढः आयमि
ति शुचेः शुक्लत्वयोग्यत्वार्थेन कृत्रे आषाढेत्यव्युत्पन्नं मूर्द्धन्यवद्दुस्वारीति स्वविषादिसूत्रे हृदितः यद्वा हिणीयोगफलं
न दैवसुतावषाढासहिते च चंद्र इति वराहः ॥ मासे तु पृषोदरादित्वात् ह्रस्वत्वं स्यादाषाढे त्वषाढक इति शब्दार्णवः
आशादिशा ढौकत इति तालव्यवानपि ज्ञातो र्वचनममूलकं द्वे आषाढस्य ॥ श्रावण इति श्रृणोते र्वहुलमन्यत्रा
पीति ल्युक् श्रवणं पूर्ववदण् श्रावणः मध्यवकारवान् स्त्रीपुंसयोः क्रमेदे श्रवणं श्रुतिकर्णयोरिति रभसको
षात् नभसो मेघाः संत्यत्र नभाः सहोवन्नमसव्व र्धरे त्रिषु नभः क्लीवे व्योम्नि पुमान् घने । प्राणश्रावणवर्षासु विस
तं तोपनत्कूहर इति मेदिनिः नभासनं मेघछन्नत्वादस्य नभा इति तु स्वामी श्रावणिक इति विभाषा फाल्गुनीत्यादि
ना वक्तृ त्रीणि श्रावणस्य ॥ स्युरिति नभस्यवन्नमस्यः प्रोष्ठपदी पौर्णमासी ततः पूर्ववदण् भीमभामेति वैदिकदे
शेनव्यवहारात् भाद्रया युक्ता भाद्री ततः पूर्ववदण् भाद्रः एवं भाद्रपदः चत्वारि भाद्रस्य ॥ स्यादिति आश्विनः पूर्वव
त् ॥ इषगतो एषणां इ इयात्रा सास्मिन्मासे जिगीषूणामस्ति अचिर इषः मूर्द्धन्यः ध्वनि मिषे निमिषे कृणमग्रव इति

माघयमकात्‌ अश्वयुक्‌ अश्विनीनत आश्वयुजीपौर्णमासीनतो मासे पूर्ववदण्‌ आश्वयुजः इषोदशादित्वादिषो
पि आश्विनोऽश्वयुज इषेप इत्यमरमाला आश्विनादित्रीण्याश्विनस्य ॥ स्यादिति कार्त्तिकः पूर्ववत्‌ तत्वहुलाः कृत्तिकाः
पूर्ववदणि बाहुलः ॥ ऊर्जस्तु नाहमाहुरिति नाममाला तदत्र मासे जिगीषतामस्तीत्यर्त्विकऊर्जः कार्त्तिक इति श्रा
वणिकवत्‌ तत्र चत्वारि कार्त्तिकस्य ॥ हेमन्त इति हन्ति दुःखं हेमन्तः हन्तेर्झुट्‌ हि चेति झच्‌ हिं रादेशो सुडागमः
हेमापि यज्ञाघं हेमन्तस्य तलोपवचनानर्थक्यं हेमन्तः प्रकृत्यन्तरस्य सत्वादिति मार्गपौषाभ्यां हिमर्तुस्तस्मै
कः ॥ शीतिशिशिरो द्वितात्लव्यः आगुक्तः एकं माघफाल्गुनाभ्यामृतोः ॥ वसन्त इति वसन्तिकामोऽत्र वसन्तः न्हद्द
वहीत्यादिना झच्‌ ॥ सुषु रमन्तेऽस्मिन्‌ स्युक्ताभवन्तीति सुरभिः सुपूर्वात्‌ रभेः सर्वधातुभ्य इतीन्‌ द्वयं चैत्रवैशाखा
भ्यामृतोः ॥ ग्रीष्मेति गिरति मीडयति प्राणिनः घर्म सीम भीम ग्रीष्म इत्यौणादिकनिपातनसूत्रेण गिरतेर्मक्‌ प्रत्य
यो ग्रीष्मादेशो सुडागमश्च निपात्यते ग्रीष्मः ॥ ऊष्म उष्मकः उषरा हे वाहुलकान्मनिन्‌ दीर्घः यावादिपाठात्‌
कन्‌ मकि अर्दंतोपि ऊष्मा घर्मेऽक्णि तथा ज्येष्ठ ऊष्मास्त्रियामित्यपीति वोपालात्‌ नितांतं दह्यतेऽत्र निपूर्वाद्दहेः

राम
६२

हलश्चेति घञ् न्यङ्क्वादित्वात् कुत्वं निदाघः उष्मानामुपगमोत्रेत्युष्मोपगमः उषति उषदाहे इण्सिञ्जिदीङुःष्यविभ्यो
नक् उष्णः ऊषरुजायां मनिन् ऊष्मा ऊष्मानापनिदाघयोरिति नान्तो वोपालः ऊष्मागम इत्यन्योपसर्गनिदाघस्त्वर्थात
पतितपः अचिच्छदेतः तपेन वर्षा शरदा हिमागम इति माघः सप्तग्रीष्मर्त्तोः स च ज्येष्ठाषाढाभ्यां ॥ स्त्रियामिति प्रवृ
ष्टवर्षमत्र प्रावृट् वृषानाह वृषु वृषु मृषु सेचने संपदादित्वात् क्विप् महि वृत्तीत्यादिना दीर्घः वर्षणं वर्षत इति शा
य्यत्रास्ति अचिरात् पृ वर्षतीवा अच् रां पृ वर्षाः भूम्नीति वकुत्वे द्वयं वर्षाख्यर्त्तोः स च श्रावणभाद्राभ्यां ॥ अथेतिशी
र्यते स्यां पाके नौषधयः स्त्रणाति हिनस्ति तापेन वा स्रृ हृभसोऽदिः शरद्वा तो भागुरीयदापि शरदा च तथा च शा
रद्वे वत्सरदया प्रावृट् प्रावृषया सहेति विश्वः एकमाश्विनकार्त्तिकाभ्यां मतोः ॥ षडिति अमी हिमंतादयः षट्
मार्गादीनां मासानां द्वयेन द्वयेन ऋतवः पुंसि भवंति आगतो केत्वादयः इति तु न हेमंतादीनां षण्णामेव प्रत्येकमेकं
॥ संवेति संवसंत्यृतवोत्र सं पूर्वो वस इति सरन्न सस्यार्द्धधातुक इति सस्य तकारः वा पदांतस्येति पक्षे सानुना
सिको वकारः पक्षेऽनुस्वारः सवत्सरः अनुस्वारपक्षेपि वकारस्य द्वित्वे द्वित्वान्न मत्वे एवं वत्सरः संवत्सरः परिवत्स

टी॰ २

रवत्सरा इति शब्दार्णवः आयतेऽसौ आप्लृ व्याप्तौ अब्दादयश्चेति दन्त्यदूरवत्वं च। जहाति जिहीते वा हस्वत्री हि
कालयोरिति [illegible] हायनः अस्त्रीति संबंधः हायनः स्त्रीति पावे शरदित्यन्वयः प्रज्ञादित्वात् शारदोऽपि समा यो वि
ति शारद इति रन्तिकोषः समतीति समम् एमवैक्लव्ये दन्त्यादिः पचाद्यच् टाप् समासमंति समं मांति वर्त्तन्ते ऋतवो
ऽस्यां वा समा नित्यबहुवचनान्ता इत्येके तथा च वामनः समासिकता वर्षा अप्सुमनो जलौकस इति समासमा
विजायत इति निर्देशात् समायां समायामिति वृत्तिदर्शनाच्चैकत्वमपि दृश्यते अत एवायं कौशलो भूस्त्रीति न
निश्चितवान् बहुवचनेन तु बहुवचनान्तत्वं सूचयति स्म षट् वत्सरस्य॥ मासेनेति मानुषेण मासेन पितॄणां
कव्यवालादीनामहोरात्रः मानुषेण वर्षेण देवानामहोरात्रः पैत्रदैवतयोस्तस्येदमित्यण् न त्र पितॄणां कृष्ण
पक्षो दिनं शुक्लपक्षो रात्रिः उत्तरायणं देवानां दिनं दक्षिणायने रात्रिः देवानां युगसहस्रद्वयेन ब्रह्मणोऽहोरा
त्रः ब्राह्म इति पूर्ववदण् ब्राह्मोऽजाताविति टिलोपः मानुषेण चतुर्युगेन देवानामेकं युगं तैर्युगैर्युगमानेय
था पूर्वं कृतयुगं नाम ततस्त्रेताभिधीयते। द्वापरश्च कलिश्चैव युगान्येतानि विश्रुतानि। सहस्राणां शतान्या

राम
८०

संध्यश्चतुर्दशच संख्यया। चत्वारिंशत्सहस्राणि तथान्यानि कृतं युगं। तथा दशसहस्राणि वर्षाणां शतसंख्य

या। अशीतिश्च सहस्राणि कालस्त्रेतायुगस्य च। सप्तैव नियुतान्याहुर्वर्षाणां मानुषाणि च। विंशतिश्च सहस्रा

णि वर्षाणां शतसंख्यया। षष्टिश्चैव सहस्राणि कालः कलियुगस्य च। एवं चतुर्युगः कालस्तत्तु संध्यांशकात्

स्मृतः। ज्योतिषे तु वत्सरश्चिमे त्वात्मानुसंख्यमासाः वेदारसाष्टेभुजवह्निवेदाः। एतानि शून्यत्रयभाजितानि यु

गाब्दसंख्या परिकीर्तितानि। एतच्च मानुषमानेन सत्यादीनां मानं तदेकेनापि यथा सत्यस्य॥ १७२८०००॥

त्रेतायाः॥ १२९६०००॥ द्वापरस्य॥ ८६४०००॥ कलेः॥ ॥४३२०००॥ इदानीं च शकाब्दाः॥ १३५३॥ द्वा

त्रिंशदब्दाधिक पंचवर्षोत्तर चतुः सहस्रवर्षाणि कलिसंध्यायामतीतानि॥ ४५३२॥ तथा च गणितचूडामणौ म

हीतापनीयराजपंडितश्रीनिवासः कलिसंध्यायाः खसमयकरकृतवर्षाणि भूतानि॥ ४२६०॥ तच्च ब्रह्मणो

दिनं तृणां कल्पो यत्रापि स्थितिकालो भूतानां ब्रह्मणो दिनं प्रलयकालस्त्वभूतो नाम ब्रह्मणो रात्रिः तथा चैत

द्रे। चतुर्दशसहस्रो वै कल्पश्चैको हि जोत्तमाः। निश्यन्ते सृजतो लोकान् नश्यन्ते निशि जन्तवः। कोटीनां द्वे सह

टी

स्रेतु अष्टौ कोटिशतानिचद्विषष्टिश्चतथाकोट्योनियुतानिचसप्ततिः।कल्पस्यसंख्याकथिता।कल्पशेषंतु
कल्पयेत्।कल्पानांवैसहस्रेतुवर्षमेकमजस्यतु।कल्पनामष्टसाहस्रंब्राह्मणोर्ब्रह्मणोयुगमिति॥मन्वंतर
मितिदिव्यानांयुगानामेकसप्ततिर्मन्वंतरंमनोरंतरमवकाशोऽवधिर्वा इति।मन्वंतरंसुप्सुपेतिसमासः।न
डुक्तंलिंगपुराणेएवंचतुर्युगाख्यानांसाधिकाह्येकसप्ततिः।कृतत्रेतादियुक्तानांमनोरंतरमुच्यते।मन्वंतरस्य
संख्याचवर्षाग्रेणेहकीर्तिता।त्रिंशत्कोट्यस्तुवर्षाणांमानुषेणद्विजोत्तमाः।सप्तषष्टिस्तथान्यानिनियु
तान्यधिकानितु।विंशतिश्चसहस्राणिकालोयंसाधिकंविना।मन्वंतरस्यसंख्येषालिंगेस्मिन्कथिताद्विजाः
मनवःब्रह्मसुताश्चतुर्दशैवतथाचविष्णुपुराणेस्वायंभुवोमनुःस्वारोचिषस्तथा।औत्तमिस्तामसिश्चैवरै
वतश्चाक्षुषस्तथा।षडेतेमनवोतीताःसप्तमस्तुरवेःसुतः।वैवस्वतोयंयस्यैतत्सप्तमोवर्ततेयुगमिति।
एकसप्ततिरितियद्यपिगणनयासार्द्धयुगेनाधिकानांसायथाकुर्नामनिधानेसर्वज्ञश्रीनारायणचरणैः राम
देविकानांयुगानांतुसहस्रंब्रह्मणोदिनं।मन्वंतरंतथैवैकंतस्यभागश्चतुर्दश।तत्रकिंचिदधिकादिव्ययुगा

नामेकसप्ततिरितितथाप्यन्यत्वात्तदिहनोक्तं। अपरेसप्तमनवः सावर्णिर्दक्षसावर्णिर्ब्रह्मसावर्णिइत्यपिध
र्मसावर्णिरुद्रसावर्णिरौच्यभौत्यवत्एते चतुर्दशमनवः॥ संवर्त्तइति संवर्त्तन्ते उपरमते जगदत्रेति संवर्त्तः हल
श्चेति घञ् वृत्तिरत्रावसानार्थः यथा लोकेऽयमत्तिहन्तउपरत इत्यर्थः। प्रलीयतेऽत्रेति लीङ् श्लेषणे एरच् प्र
लयः कल्प्यन्ते विरुद्धलक्षणयाज्ञायंतेऽत्र पुंसि संज्ञायामिति घः कृपो रो ल इति लत्वं कल्पः पूर्ववत् घः क्षयः
कल्पस्य ब्रह्मदिनस्यान्तोऽवधिरेकः कल्पान्त इत्यर्थः अन्यस्तु ब्रह्मणो दिनार्थः कल्पः शास्त्रविधौ न्याये सं
वर्त्ते ब्रह्मणो दिन इति शाश्वतः॥ पंचप्रलयस्य॥ अंहतीति पंच्यते अनेन पचि व्यक्तीकरणे पचि विस्तारे वा अक
र्त्तरि चेति घञ् कुत्वं पंकं। पाप्मा निव्याप्नोति पाप्मा नामन् सामन्यादिसूत्रे निपातितः॥ पांत्यस्मादात्मानं पा
रक्षणे पानीविशिभ्यः पः पापं। किलतीति शितिकर्मकरोति किल श्वैत्यक्रीडनयोः। किलेर्बुक् चेति षत्वं बुगा
गमश्च किल्बिषं। कर्मसु मसं श्नुतेति निनत्त्वकरोति कल्मषं पृषोदरादिः। कलयति दुःखं हि कलिभ्य अपचू कलु
षं तीर्यते पिम्नर्द्धन्यषाणि। वृज्यते वृजेः किञ्चेति इनच् वृजिनं। एत्यधोनेन इणगतौ इणआगसीति असुन्

।०

तुट् चएनः सांतं। नहंतीति धन्यमिति अन्येभ्योपीति डः। न्यंक्वादित्वात्कुत्वं अघं। अमंतीति यांत्यनेनाघ इति अ
मगत्यादिषु अमेर्दुक् चेति असुन्न् दुगागमश्च अंहः। ऊष्मोपांतसांतः शीघ्रमंहो विधानमिति अत्र स्वारपक
रोघकार इव अस्यते इत्यक्षरभेदे थैकत्वष्टत्ते नागराञ्जुघासमासे तदुक्तं एकत्वे हृद्धिकल्प्ये च भेदे पितत्वेक
त्वेपिनि ह्नवः। जायते यत्र वर्णानामत्रुपासः अहिगनावित्यतो ऽसुनाऽहइतिसिद्धं अघिलघीत्यतो ऽसुन
धौतिनिरासार्थमपमेर्दुक् चेति सूत्रमिति भीमः। उपाध्यायसर्वस्वेतु मञ्चश्लेतेरप्यसुन्न्मतभेदादिति कौमु
दी। दुर्गममस्मात् दुरपूर्वोदिणोभावे क्तः। दुरितं दुर्निदितं कृतं करणमस्य दुष्कृतं इदुदुपधस्येत्यादिना
षत्वं। द्वादशपापस्य।। स्यादिति धरति विश्वं अर्त्तिस्तसुहुसृधृक्षीति मन् अस्त्रियां धर्मः धर्मः पुनातिपू
ञोप्युइडुस्वश्चेति यत् सुडागम ह्रस्वत्वानि पुण्यं। इस्मनयोरतिशयेमप्रशास्यईयसुनिश्चादेशः श्रेयः सा
तं सुकृतं शोभनं कृतं कर्म विशेषणसमासः। वर्षतीति इगुपधत्वात्कः वृषः पंचधर्मस्य।। मुदिति मोद
नं मुत् दांताम्नुदहर्षे क्विप्। प्रीतिः प्रीञः क्तिन् प्रीतिसाहचर्यान्मुदः स्त्रीत्वं। प्रमदसंमदौ हर्षे इति निपाति

रम
७०

तौ। प्रमोदामोदानंदा घञंताः। द्वितीयस्तु आनंदथुः। स्फूर्णात्यसुन्भं सर्वधातुभ्यो मनिन्। शर्मनांतं। सिमो
त्यसुन्भं सातं सेन क्रियेह सितृग्रिणवामिदमितूपूर्वां विष्यसन्निति वा कुलकातंत्र। अयं च दंत्याद्यःस्तथा च देवी
शनके अनुलोमप्रतिलोमयमकं सातं वर्मानं नस्था वहसि हसस्थाननर्मा वनसा इति व्युत्पत्तिः सोन्नावत्नाल व्यादीत्य
परइतितु कौमुदीस्यति डुषुं वंसातं सोऽनकर्मणीतितु स्वामी। षणुदाने क्तः। जनषणाखनामित्यात्वं सातमि
ति सोमनंदी। शोभनानि खानीन्द्रियाण्यनेन सुखं सुखनत्यसुन्भमिति वा सुखं जाति कालसुखादिभ्यो ऽनाच्छा
दनादितिस्वरसूत्रेण सुपूर्वात् खनेर्डः। ह्लादस्य प्रीतेः सत्त्वप्रीतेः शेषं तु सुखस्य प्रीतिः सुखज्ञो विकार इति
तु कौमुदी॥ श्वः इति श्व आगामि श्रेयो त्रश्वः श्रेयसं श्रेयसो वसीयः श्रेय सहत्यत्र समासांतः अदेनालव्यो
। श्यति अशुन्भं शोनतु क्त। भं दत्तेभद्रंभद्रिकल्याणेऽत्ता जेंद्रेनिर कृ निपातितः। भं दर्भ डु शिवं तत्त्वे तिन्त्रिकां
डशेषः। कल्यं नीरुजत्वमणति अणतेः कर्मण्यण कल्याणं। मंग्यते मगिर्गत्यर्थः मंगेर्हर्षादित्वात् कलच्
मंगलं। शोभनते शुन्भं रग्रंथेनिकः। भव्ये भवनशीलं षपतपदेत्तु कत्र भावुकं। भवो भद्रादित्रि सन्तयो रित्यजयः

प ले

60

भवो भद्रा श्चिरत्यास्त्रिवत् भविकं ॥ धन्ये भवति भव्यं भव्यो येति साखुः ॥ कुशेःसोत्वात् हृषादित्वात् कलच् कुश
लं नालं व्यमध्यं कुशलवर्द्धितइति विदग्धमुखमंडने कुशलवयोरूपोछ्रायइति वासवदत्ताश्लेषः कुष निष्क
र्षइत्यतो मूर्द्धन्यमध्ये षीत्यलंकारोऽमूलः ॥ क्षिणोत्यशुभं क्षिदृयेत्र सितिस्त्व कितिमन् हेममास्त्रियामितिसं
बंधः ॥ शस्यते शनुसुस्कमौ भावे क्तः शस्तं ॥ द्वादशकल्याणमात्रस्य ॥ अथेति पापपुण्यशद्वौ सुखादयश्च शस्तांना
गुणे यथोक्तलिंगाः ॥ उपचाराद्व हतिद्रव्ये विशेष्य वर्तमानास्त्रिलिंगाः तत्र स्त्रियां कल्याणी अन्ये तांवतः सुष्ठु
कृतः सुकृतः ॥ दुष्टुकृतो दुष्कृत इति क्रिया निबंधनं वाच्यलिंगत्वेन गुणनिबंधमं सकल्मषोऽयमध्यारो
प इतिन्तु शिष्टप्रयोगः ॥ ननु कथं दारिद्र्ये पिधनित्वे पि वशः परिजनः सुखमितिन्त्र च्यते अभेदोपचारे पिद्र
व्यप्रति विशेषणत्वेन सुखादि द्रव्यलिंगमिहतु स्वार्थ प्रधानं द्रव्यं प्रति विशेष्यभूतं विवक्षितमिति स्वलिंगमे
व केचित्तु पापपुण्यसुखादिवेति समस्तं पठित्वा आदिशद्वं प्रत्येकमभिसंबध्नंतीति कौमुदी ॥ मतल्लिकेति न
नु शस्तप्रशस्तयोः को भेदः ॥ येन मतल्लिकादयः शस्तपर्यायास्त्र्य उच्यंते ॥ उच्यते ॥ शस्तं मंगलं प्रशस्तमन्यर्थ श्रेष्ठं ॥ ११

राम

किंच॰शस्तवचनाःस्त्रीवादयोगुणेऽपिवर्त्ततेद्रव्येऽपिमतल्लिकादयस्त्वाविष्टलिंगाद्रव्यएववर्त्तंतेनखल्वादिव
तआविष्टलिंगास्वान्यलिंगानांसामानाधिकरण्येऽपिनिजलिंगंनजहतियथाअश्वमतल्लिकागोप्रकांडं
कु[illegible]मारीनल्लजःतथाचमाघःअरिमेधोनेऽकृतगोमतल्लिकामितिअश्वीप्रकांडोविटपेनरुस्कं
धप्रशस्तयोरितिमेदिनिकोशात्उस्त्वचततःकनि।दंडकानध्यवात्तांयौवीररक्तःप्रकांडकाविंतिभट्टिःअ
तएवमतल्लिकादीनांरूढिशब्दत्वात्प्रशंसावचनैश्चेतिनित्यसमासः।संघोद्घाविंतिनिपातनाडुद्घः।पंच
प्रशस्तस्य॥अयइतिशुभकारिदैवमयःइणगतोषचाद्यच्शुद्धपार्ष्णिरयान्वितइतिरघुः।सुलभैःसदा
नयवताऽयवतेतिकिरातःएकं।दैवमितिदेवाद्यात्मनआगतंदैवंपूर्वकर्मदिश्यतेस्मदिष्टंदिश्अति
सर्जनेक्तः॥भाग्यैकदेशयोभीगइतिरुद्रकोषः।सगएवभागधेयंस्वार्थेभागरूपनामभ्योधेयः।भागंभज
सेवायांस्महत्लोर्ण्यत्हृद्धिःचजोरित्यादिनाकुत्वंभागातरयश्चेतिभाग्यमितिस्वामी॥नियम्यतेऽनयानिय
तिः।क्तिन्।विधीयतेऽनेनेतिविधिः।षट्प्रान्तनशुभाशुभकर्मणः॥हेतुरितिहिनोतिव्याप्नोतिकार्यंहि

वेतिआदिकारणं

प.टी.
७२

गतोक्तमिमनिजनिर्गमाषाहिभ्यश्चेतित्तुन्हेतुः। करोतीतिल्युट् वेति चकारात् ल्युट् करणं। विशेषेणजा
यतेऽनेनउपसर्गे संज्ञायामिति डः। अन्येषामपीति दीर्घः। वीजं त्रीणि कारणस्य॥ निदेति निदानं वकुलम
न्यत्रापीति युच्। आदिश्च प्रथमं च तत् कारणं एतच्च वैशेषिकादिभिः समवायिकारणमुच्यते अन्ये स्वरूपा
दानकारणं वैद्यैस्तु कारणमिति। हि प्रथमकारणस्य॥ क्षेत्रेति तथा च गीता इदं शरीरं कौन्तेय क्षेत्रमित्यभि
धीयते। एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः। क्षेत्रे शरीरे जानाति क्षेत्रज्ञः ज्ञानस्य शरीरात्मसंयोगास
मवायिकारणकत्वादिति कौमुदी। अततीति संचरति अनसातत्यगमने सातिभ्यां मन्मनिनौ वितिमनिन्
आत्मा। अव्यक्तं मन इत्याहुः शरीरं परमुच्यते। अव्यक्ते पुरे शेते पुरुषस्तेन चोच्यते इति पुरुषः एषो
दरादिः पुनात्यनेन पुनातेः पुरुष इत्यन्ये। त्रीण्यात्मनः॥ प्रेति प्रधीयते ल्युट् प्रधानं। प्रारंभात् क्रिय
तेनया प्रकृतिः त्रिगुणा है सत्त्वरजस्तमसां साम्यावस्थायाः॥ विशेष इति कालकृतावस्थाधर्मविशेषो वना
दिश्च विशेषोऽवस्था अङ्। व्यवस्थायामिति निर्देशात् स्थागापापचोभावइतिन त्रीणि कालिक इति नि

राम
७२

दृन्नेऽकपूनादिभ्य इतिवकुएकं॥ गुणा इति सत्वादयस्त्रयः प्रकृतेर्गुणाः सत्वं लघुप्रकाशकं ज्ञानसुखहेतुः
रजो रागात्मकं चलं लोभजनकं दुःखहेतुः तम आवरकं प्रमादमोहजनकं गुरु इति सांख्यशास्त्रे सतो भावः
सत्वं रंजयति भ्रं रंजिभ्यां किदित्यसुन् रजः ताम्यत्यनेनासुनि तमः ष्टषादरादित्वर्द इत पुंलिंगावपी मो पुष्पे
वे शगुणे चैव रजोयं रजसा सह लेस्तुनपलिनी पुष्प इति स्त्री पुष्पे तम इत्यपि च अदंतोपि सत्यं वदंतिने कस्मा
दसत्यमी रजस्तमा इति रजकं त्रीणि स्वनाम प्रसिद्धानि पृथक् पृथग्गुणशब्दवाच्यानि॥ जतुरिति जन
नं जन्तुः जनेरुसिः॥ जन जनने भावे ल्युट् जननं मनिन् जन्म इषियुषी तिमकिजन्मो दंतोपीत्युणादौ॥ जनिघ
सिभ्यामिन् जनिः वृद्धोश्वेति वृद्ध्यभावः जनिश्च स्त्रीत्पत्तिसाहचर्यात् किमर्थं जनिना जंतो दृथा जन्म इति
वुप्रयोगात्पुंस्त्वच॥ उत्पत्तिः क्तिन्॥ उद्भवः उद्भवः अपूषट्कं जन्मनः॥ प्रेति प्राणिः शरीरिणः रत इनिः॥ चे
तनो नंघा दिः॥ जन्मी ब्रीह्यादिभ्य इतिनस्तद्धित इति टिलोपः अदंतत्वाद्धाःतइनिवनौ॥ जायते॥ जनेर्हेतु
वततुजंतुः॥ एवं यमनिमुषिदसिजनिभ्यो युच् जन्तुः षट् प्राणिनः॥ चित्तमिति चिती संज्ञाने भावे क्तः॥

जि॰

टी० ३

चेतते ऽसु नि चेतनः। ह्रियते विषयैः हृदयं। हृञः शुङ्कदुकौ चेति कयन् दुगागमश्च हृदयं। यद्यपि वाह्यविष
येषु विक्षिप्तमनाकुलं मनः स्वान्तं क्रुवस्वान्तेति निपातितं तथाप्यभेदोऽध्यस्त इतीहापि तथा। ह्रियते हरतेः कि
पृकुकौ वर्णव्यत्ययात् तकारे दकारः तथा च हृदि स्थाण इति प्रयोगः स्वान्तं प्रकृत्यन्तरमस्तीति स्वामी। मन एव मा
नसं प्रज्ञादित्वादण् मन्यत इति मनो ऽर्द्धर्चादित्वात् पुपाध्यायसर्वस्वं।। सप्त मनसः।। कालवर्गविवरणं।। बुद्धिरिति बु
ध्यते ऽनया क्तिन् बुद्धिः। ईष गतिहिंसादानेषु गुरोश्चेत्यकारः ईषा मनस ईषा मनीषा पृषोदरादित्वाद्धिलोपः
मूर्द्धन्यषा। धृष्णुवंति प्रगल्भंते ऽनयेति धृषेर्धिषच् संज्ञायामिति युचि धिषणा एकारान्तत्वान्मूर्द्धन्यषा त्र्य
याषत्वाभावाद्धिसना विषशब्दा इति तु स्वामी। ध्यायति ध्यायतेः संप्रसारणं क्विप् चेति क्विपूहलश्चेति दीर्घः धीः
प्रज्ञा ज्ञा अङ्। प्रज्ञापि प्रज्ञा श्रद्धा वराङ्गस्त्रिः। पंडा संवेदनं विदेति शब्दार्णवात्। शेत इति शे मोहः संशयः विचार्यंतं
मुष्णाति मूलविभुजादित्वात्के गौरादिङीष् शेमुषी तालव्यादिमूर्द्धन्यान्ता शमेः क्वसौ एत्वाभ्यासलोपे शेमु
षीति तु कौमुदी। मन्यते ऽनया क्तिन् मतिः। प्रकर्षेण ईक्ष्यते ज्ञायते ऽनया गुरोश्चेत्यकारे प्रेक्षा। उपल

राम ७३

ष्विः पित्वादङिः प्राप्ते वाहुलकात्तन्निन्।। चिदादिषु त्रिषु करणे संपसादित्वात् क्विपु चित्तं तेन। ज्ञपमिच्च मोरादि
त्वात् क्तिन् ति तु ज्ञतयेति मिच्च चः ज्ञप्तिः। चेतना चित्त संचेतने। चुरादिषु चूर्ण न कौमुद्यीं हीरस्वामिन्निश्चायं विवे
कः बुध्यादयश्चतुर्दश बुद्धेरिति वैशेषिकाः। सत्वप्रधानं महदाख्यमंतःकरणं बुद्धिः विषयाकारोपग्रहा यां बु
द्धौ प्रतिबिंबिता याश्चित्तक्तेर्बुद्धिवृत्त्यनुकारउपलब्धिरिति सांख्यदर्शनात् बुद्ध्यादि सप्तकं बुद्धौ। प्रेक्षादि स
प्तकः सुपलब्धावित्यपरे सांख्ये बुद्धिधर्मस्य ज्ञानस्यैते पर्याया इति भट्टोपि बुद्धेश्चतुर्दश।। धीरिति धारणाशक्ति
युक्ता धीर्मे धामेधते संगच्छतेः स्यां सर्वमिष्टं संगमे गुरोश्चेत्यकारः एकं।। संकल्प इति इदमहं कुर्यामिति मनसो
व्यापारः संकल्पः भावे घञ् एकं।। चित्तेति पूर्वस्य चित्तस्य संतानद्वारेण स्थैर्यमाभोग इति भट्टः आभोगस्तात्
पर्यमिति सर्वानंदः व्यापार इति मधुमाधव्यादौ अनागतचिंतारूप चित्ताभोगो मनस्कार इति कौमुदी· ए
कस्मिन् विषये पुनः पुनश्चित्तवृत्तिराभोग इति पंजिका। मनसः कारो निश्चय इति षष्ठीसमासेऽतः कृक
मीत्यादिना सत्वं मनसि करणं मनसिकार इत्यपि दृश्यते तत्र वाहुलकात्सप्तम्यलुक्समासः। द्वे मनसः सु

खादौ नत्वपरत्वस्य॥ चर्चेति चर्च अध्ययने चुरादिः ण्यंतात् ज्ञावे चिंतिपूजीत्यादिना ऽङ् चर्चा। संख्यानं संख्या ऽङ्।
चर अ संशये चुरादिः ण्यासेतियुच् विचारणा। नयं प्रमाणैरर्थपरीक्षा या इत्येके विमर्शमात्रस्येत्यन्ये॥ अध्या
हार इति अध्याहरणमध्याहारः न्यूनपदपूरणार्थमधिकपदोह्याकरणमिति सर्वधरः। तर्कणं तर्कः तर्क भा
षार्थ इति चुरादिर्हेङ कोत् घञ्॥ ऊह वितर्के घञि ऊहः। वितर्कस्तर्क ऊहो द्वयोरसूननं विना शंकात्वाशंकिरा
शंका भ्रमस्तस्यात्वपरिभ्रम इति शब्दार्णवः। त्रयमूहनस्य॥ विचीति उभयकोटिस्पृक् ज्ञानं विचिकित्सा ए
कत्रानारूढेः कित निवासे स्वार्थे गुप्तिज्किद्भ्यः सन् प्रत्ययः। संद्वयोर्नानार्थयोः शयितं संशयः समो नानार्थ
ताशीङ् एरच्। दिह उपचये। अपि नानार्थसंशब्द उपपदे घञि संदेहः। द्वौ पक्षौ स्थाणुर्वा पुरुषो वेत्येवं रूपोप
रावात्मीयो प्रधानभूतावंशौ वास्मिन्निति द्वापरः। सर्वनामसंख्ययोरिति संख्यायाः पूर्वनिपातः। पृषोदरादि
त्वात् पूर्वस्यात्वं चत्वारि संदेहस्य॥ अथेति निरपूर्वान्नयतेरेरच् उपसर्गादसमासेपीति णत्वं यदा तु निस
उपसर्गप्रतिरूपत्वं तदा न णत्वं निर्णयः। निश्चिनोतेः ग्रहवृदृ इत्यप् निश्चयः। स्थाणौ स्थाणुरेवायमित्यसौ

निर्णयस्य द्वयं ॥ मीतिमिथ्याचासौ दृष्टिश्चेति कर्मधारयः यथा नास्ति कृतं नास्ति स्वर्ग इत्यादिना स्तिकते तिना
स्ति परलोक इति मतिर्यस्येति अस्ति नास्ति दिष्टं मतिरिति वक्तृतो भावे तल्न् हे परलोको नास्तीत्यादि बुद्धेः ॥ व्या
पाद इति व्यापादनं व्यापादो ऽप्यंताद्य अद्रोहस्य चिंतनं द्रोह चिंतनं वा दुष्ट्वकाले ल्युट् द्वे परद्रोह चिंतायाः ॥ सेति
सिद्धांतो ऽतो निश्चयो ऽनेन सिद्धांतः एवं राद्धः सिद्धो ऽतो ऽन्ते नराद्धांतः द्वे सिद्धांतस्य ॥ भ्रांतिरिति अतस्मिंस्तदिति ज्ञा
नं भ्रांतिः भ्रमेः क्तिन् अनुनासिकस्यं ति दीर्घः ॥ अतस्मिंस्तदिति मन्यते ऽथ्यद्धित्वं च मिथ्येत्यव्ययं तथा मतिः मि
थ्यामतिः ॥ घञि भ्रमः नोदात्तोपदेशेत्यादिना वृद्धिनिषेधः ॥ त्रीणि भ्रांतेः ॥ समिति संवेदनं संवित् संपदादि
त्वात् क्विप् ॥ आगमनमागूः भ्रमेश्च ड्रूरिति ऊच कारो गमेर्डोरित्यतो गमेरित्याकर्षणार्थः यदा तु ऊच गमादी
नामिति क्विप् ऊवतदा खलु पूर्वत् ॥ संवित्साहचर्यात् स्त्रियामागूः ॥ प्रतिज्ञानं ल्युट् ॥ नियमः यमः सत्युपनिवि
षु चेत्यप् ॥ आश्रवः अप् ॥ एवं संश्रवः समाङ्पूर्वः श्रुणोतिरभ्युपगमे एवं प्रतिश्रवः ॥ अंगीकार इति अंगात् तत्प्रयु
क्तं तत्कृतो भावे घञ् द्वे दृ इत्यादिना ऽपि अभ्युपगमः ॥ किंः समाधिः ॥ दश अंगीकारस्य ॥ मोक्ष इति मोक्षो मोक्षः क्षि

ग्रह्ल

॥ षयेयज्ज्ञानं तद्धीरुच्यते। अन्यत्र ज्ञानं शिल्पशास्त्रविषये तु विज्ञानं अतिशीलकलिंगो अन्ये तु मोक्षे विषये
धीर्ज्ञानमन्यत्र मोक्षप्रतिपादकशास्त्रशिल्पादौ चित्रादौ विज्ञानमिति वदंति मोक्ष इति तु निमित्तसप्तमी मो
क्षनिमित्तं शिल्पशास्त्रयोर्धीर्ज्ञानमुच्यतेऽन्यनिमित्तमेतयोर्धीः सा विज्ञानमिति तु वयं व्याचक्ष्महे अत्र मोक्षे धी
रेवोच्यत इति एकं॥ अन्यत्र शिल्पे चित्रादौ शास्त्रे स्मृत्यादौ धीर्विज्ञानं विरूपं ज्ञानं एके शिल्पशास्त्रयोराहिरण्या विज्ञान
दुद्देः॥ मुक्तिरिति शरीरेंद्रियाभ्यामात्मनो मुक्तत्वं मुक्तिः क्तिन्। एतयोरेव विरहेणात्मनः केवलत्वं कैवल्यं।
निर्वाणमत्र निर्वाणं निर्वाणोऽवात इति निपातितं। धर्मपर्याये श्रेयः उक्तं॥ निश्चितं श्रेयो निःश्रेयसं अचतुरा
दिनाऽच्। न तु निष्ठेङ्भ्यां किश्चेति त नमृतं अविद्यमानं मृतमत्र अमृतं। मोक्ष अवसाने चुरादिः एरच् घञ्
वासुमुचिभ्यां षइति षे मोक्ष इति तु कौमुदी। अपवर्जनमपवर्गः वृजी वर्जने घञ्। अष्टौ मोक्षस्य॥ अथेति न
नमर ज्ञानं विरुद्धं वेदनमविद्या अधर्मानर्थवत् विपर्यासोऽन नञ् संज्ञायां समज इत्यादिना क्यप्॥ अहमिति निपाति राम
तोऽहंकारेण तत्प्रधाना मतिः अहंमतिः अहंशब्दोऽव्ययं सुप्सुपेति समासः॥ द्वे अविद्यायाः॥ रूपमिति त्र ७५

मीरथक्रूरथक्रत्रसिद्धाः वक्त्रादियाह्याःपंचविषया दिशद्वयेत्रैवाच्याः तत्र खष्पशिल्पशष्पवाष्परूपपर्पत
ल्पा इति दो ने रूपं निपातितं।शब्द इति शप आक्रोशे शाशपिभ्यां ददनौ इति दन्।शब्दः।गंध अर्दने अचगंधः।
रस आस्वादने चुरादिः एरच् रसः। अकर्तरि चेति घञ् स्पर्शः। विसिन्वंतिनिबध्नंतींद्रियाणि विषयाः षिञ्
बंधने अच् परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जामिति षत्वं।गाव इंद्रियाणि चरंत्येषु गोचराः
गोचरसंचरेत्यादिना निपातितं।इंद्रियैरर्थ्यंते इंद्रियार्थाः अर्थयाञ्चायां स्पर्शवत् घञ्।। हृषीकमिति हृ
ष्यंत्यनेन हृषु अलीके मूहृन्यषः अलिहृषिभ्यां किदिति करण ईकन् हृषीकं। विषयो ग्राह्यत्वेनास्या
स्तीति विषयि इनिः। इंद्रस्यात्मनो लिंगं तेन वा दृष्टं सृष्टं वा इंद्रियं इंद्रियमिंद्रलिंगमिति घच् निपात्यते।। त्री
णींद्रियस्य।। कर्मेति पाघ्रादि कर्मेन्द्रियमुच्यते कर्मसाधकमिंद्रियं पायुर्गुदं आदिनो [illegible] पस्था
दिग्रहः तथा च कामंदकीये पायूपस्थं पाणिपादौ वाक्चेतींद्रियसंग्रहः। उत्सर्गानंदनादानगत्यालापास्त
त्क्रिया इति एकं गुह्यादींद्रियस्य।। मन इति मनोनेत्रादीनि धींद्रियाणि धीर्ज्ञानं तन्निमित्तमिंद्रियं तथा

69

मनःकर्णौतथानेत्रंरसनाचत्वचासह।नासिकाचेतिषट्तानिधीन्द्रियाणिप्रचक्षतइति।एकंबुद्धीन्द्रिय
स्य॥तुवरेतितुरइतिसौत्रोधातुःर्थीरणादिकः।क्षित्वरचत्वरइत्यादिनात्वरच्।ह्रस्वादिदीर्घादिश्चतथाचान
रेऽप्यश्रुणिष्टंगाम्भीर्यरहितेगवितूवरः।कालेप्राप्तेकषायेचरासपुंस्यञ्जनेऽच्युतइत्युत्पलिनी।नापिका
षायस्तुवरइतिवोपालितात्।अत्रदीर्घत्वार्थीभंगःस्यात्।पुंसिकषायस्तुवरमितिक्लीबकाण्डेरत्नकोषात्त्व
ह्रस्वादिरेवात्रप्राप्तः।बहुपुस्तकदर्शनात्।कुत्सितोवरःकुवरोह्रस्वादिः।कवर्गादिश्चकुवरस्तुकषायोस्त्रीत्ये
केपठंतीतिसुर्वानंदादयः।कषतिकंठमितिकषायः।मूर्द्धन्यषः।द्वेकषायरसस्य॥मधुरइतिमधुमाधुर्यंन
द्योमान्ऊषसुषिमुष्कमधोरइतिरः।मधुरः॥लुनातिजाड्यंल्युःन्र्।छेदनेल्युः।लवणंत्रुंगितिनिपातनात्णत्वं
त्वं।कटत्यावृणोतिनीरणात्वेनमुखमितिकटुः।कटेवर्षावरणयोः।वटिकटिभ्यांचेत्युः॥तिजनिशाने।बाहुल
काद्गजिघृषिभ्यःक्तः।तिक्तः॥अंबतीतिलविअविरविशहेभूशाकंविभ्यःक्तः।मवलसंयोगवर्नेअम्लः॥रसाइ
तिरस्यंतइतिरसाः।गुणमात्रेवर्तमानाःपुंसिमधुरादयःपंचप्रत्येकंरसशब्दवाच्याः॥तद्वत्सुकषायादिरस

वत्सु वर्त्तमाना अमीरसारसशब्दवाच्या अर्था इति अर्थेलिंगे चार्थस्य द्रव्यसंभवात्‌ यद्रसवाचिनः शब्द

स्त्रिषु लिंगेषु वर्त्तंते इत्यर्थो लभ्यते यदिह षड्‌शब्दाः स्तदादेस्तु वरस्य त्रैलिंग्यं न स्यात्‌ तत्तु वरो विभीतकः तुव

रं जलं तुवरा हरीतकी ति कटुशब्दस्य स्त्रियां कटुः कटी वा॥ विमर्द्दोत्थ इति सुरतादि विमर्दोत्थे माल्यादि

गंधेद्रव्याणां च परिमलाः तुंभ्न ते मनोहरे परिमलो वर्त्तते मलमह्न धारणे घञ्‌ संज्ञा पूर्वकत्वाद्‌ वृद्ध्यभा

वः जनग्रहणं किमस्त्रिकादे मनोहरे मा भूत्‌ एकं॥ स परिमलोऽति निर्ह्लारी अतिदूरगामी अतिमनोहा

री वा आमोदः आसमंतान्मोदंतेऽनेनेति मुदहर्षे घञ्‌॥ ॥एकं॥ वेति आ सुगणात्‌ सुगणेसुङ्गादयः सु

सीति यावत्‌ अतः परं वाच्यलिंगा इत्यधिकारोयं॥ समेति समाकर्षत्यवश्यं आवश्यके णिनिः एवं निर्ह्ला

री ह्व दूरगामि गंधस्य॥ सुरेति सुरभिर्वसंतऽक्तः घ्राणेंद्रियं तर्पयति घ्राणतर्पणे नंद्यादिः इष्टोगंधो

ऽस्य इष्टोगंधः एवं सुगंधिः गंधस्येत्‌ पूतीत्यादिना इत्‌ समासांतः तदेकांतग्रहणं कर्त्तव्यमित्यनौपाधि

कस्यैवेति आघ्रायिवा च गंधवहः सुगंध इति भेदो न समासांत इति चत्वारि सुगंधेः इष्टगंधादि द्वयं युत

घ्राणं

टी॰
१

पत्र्यंतरेण सुरभिगंधयुक्तद्रव्यस्येति कोसुधादयः ॥ आमोदीति आमोदयुक्तः कर्पूरादिरामोदी आननमि
नं मुखं वासयतीति मुखवासनः नंद्यादिः शुभवासन इति क्वचित् पाठस्तत्र शुभं मनोहरं वासनं वासो यस्येति
बहुव्रीहिरिति सर्वधरः हे मुखवासनवटिकादेः ॥ पूतीति पूतिर्विस्रः पूते रिव गंधोस्येति पूतिगंधिः सु
गंधिवदिकारः । दुष्टो गंधोस्य दुर्गंधः गंधस्येदुत्पूतीत्यादौ दोरभावान्नेत्वं अत एव काव्यादर्शे वामनः दु
र्गंधिमदादिषु पदेषु इत्समासांतो दुर्लभः उत्पूतीत्यादिषु दुःशब्दस्यापाठादिति केचित्तु मत्वर्थीयमि
निं कृत्वा दुर्गंधीनिति नांतमाहुः तद्दर्शनात् । कर्मधारयमत्वर्थीयाभ्यां बहुव्रीहिरेव श्रेष्ठो लाघवादिति का
त्यायनोक्तेः केचित्तु लाघवमनादृत्य इष्ट्वेत्येवमत्वर्थीयं विसकिसलयच्छेदपाथेयवंत इतिवत् प्रयो
गश्चायं दुर्गंधिमदाविलं मलशतैर्यत्पूतिनाडीमयमिति शृंगारप्रकाशे हि दुर्गंधस्य ॥ विस्रमिति वि
सप्रेरणे इत्यातः वा कुलकात् स्फायी तिरक् विस उत्सर्ग इति तु भट्टः आमगंधीति आमोऽपक्वो मलस्त
स्येव गंधोस्येति उपमानाच्चेति तत्समासांतः विस्रादिद्वयमयक्कमांसादिगंधे ॥ शब्दार्णवे तु कस्तूरिकाया

दू॰

राम
८७

के२

मामोदः कर्पूरिस्तुखवासनः। वकुलेस्यात्परिमलश्चंपकेसुरभिस्तथा। गंधादिषड्रिरथेनेगुणिवृत्तौत्रि
लिंगा काइतिसुरभ्यादिभ्यः कृदिकारादक्तिन्न सर्वतोऽक्तिनर्थादित्येइतिनुस्वामीपक्षेङीषूसुरभीसुगंधी
तिनुकौमुदी॥ शुक्लेतिशोकयतिमनोस्मिन्नूशुकगतौ शुक्लः ऋजेंद्रेत्यादौनिपातितः। शोभतेशुभ्रः शुभ
शुभ्रशोभार्थेस्फायीतिरक्। शुचिरग्रावुक्तः। श्चितावर्णे अकर्तरिचेत्यादिनाकर्तरिघञ्श्वेतः शताल
व्यः श्वेतोधावतीतिक्षेषात्। विशीयतेविशदः शङ्गशातनेत्र्प्रचा। विशदाविशदामत्तसारसेसारसेजलइ
तिदृष्ठियमकात्। श्यायतेश्यैङ्गतौहश्याभ्यामितन्नश्येतः। पंडतेयातिमनोऽस्मिन्नूपांडरः पडिगतौपं
एडदीर्घश्चेतिरः। अवदायतेशोध्यतेअवदातः दैपूशोधनेक्तः। सिनोतिमनः षिञ्बंधनेअंजिष्टषिभ्यः
क्तः सितोदेत्यादिः क्तिगतोविकसितंसितमितिकीचकयमकात्। गोरतिमनोस्मिन्नुगुरीउद्यमेऋजेंद्रेनि
गौरोनिपातितः गुङ्गतावित्यस्यनिपातइतिसर्वधरः। अवदलक्तनइतिवलक्तः पूर्ववद्घञ्रू ढित्वात्रि
त्वोवष्टिभागुरीत्यकोरलोपइतिस्वाम्यादयः वलतेः क्विपूवलमक्षंत्यस्मिन्पूर्ववत्घञ्वलइतिकष

रु॰

टी॰ संयोग वा॥ अथ सवलक्षो भानां पतिरिवं कर्त्ता विवभानोलक्ष्मामिति हंदावनादिति कौस्तुभादयः॥ धा
वति मनोत्र धातु गतिशुद्ध्योः वृषादित्वात् कलच् धवलः वकुलवचनात् ह्रस्वत्वं॥ धावो ह्रस्वश्चेति क
लङ्खाविति भोजराजः॥ अर्ज्यत इति अर्जसर्ज अर्जने अर्जेर्णिलुक्चेत्युनन् अर्जुनः अत्र यद्यपि
शङ्खार्णवे भेदः श्येतरक्तसमपीतो सो रक्तेतरजवारुचिः॥ वलक्षस्तु सितः श्यावः कदलीकुसुमोपमः॥
अर्जुनरक्तसितः कृष्णलेशवान् कुमुदच्छविरिति तथापि रक्तभेदानादरणादिह पर्यायता त्रयोद
शकं शुक्लवर्णस्य॥ हरीति हरति मनो हरिणः श्यास्त्याहृत्र विभ्य इनन् च॥ पाण्डुगुणयोगात्तन्नगपां
डुपांशुभ्यां रइति रः अस्यानार्षत्वात् पांडुरोऽसाधुरिति भाषावृत्तिकृत्तो दुर्ज्ञानं न्याय्यादित्यंत्र तिवास्य
मात्रे च जनितं भाष्यविरुद्धं हि चेदं न तच्छुक्तं वृष्यंतरोक्तानामन्येषामपि प्रामाण्यात् भाष्यानुक्तानां भ
ट्टिकोक्तानामन्यथाऽप्रामाण्यापत्तेः अयं च शङ्खार्णवादिभिरपि परमशिष्टैः यथा पाण्डुररक्तपीतरक्त
भागी प्रत्यूषचंद्रवत्॥ पांडुः स्त्री पीतभागार्द्धः केतकीधूलिसन्निभः॥ पांडरः॥ पांडुरे केश्वित्पांडो प्रवे

रत्नशिख॰ २

शितइतिपांडरस्यशंभेदाविवक्षयास्त्रक्तेपिप्रयुंजतइतिशुक्लपर्यायेनिबद्धइतितुविशेषः त्रयंपांडु
वर्णस्य॥शीतेपीतसमायोगः पांडुवर्णःप्रकीर्तितः। ईषत्पाण्डुशाह्नोऽव्यक्तपरः धूनोतिचेतो धूसरः धूवि
धूनने। क्त धूमदिभ्यः सरन्वा कुलेकादेषत्वं महिषवृषभसरितः सरितस्तट इतिज्ञानम कीहरणं। धूसरस्तु
सितःपीतलेशवान्नवकुलस्य विरितिशाश्वतोर्णवः। एकं॥ कृष्ण इति कर्षति मनः कृष्णः कृषविलेखने कृषे
र्वर्णे इतिनक्। नीलवर्णे इगुपधत्वात्कः नीलः। सितविरुद्धोऽसितः। श्यायतेमनोऽस्मात्श्यामः इषुयु
धीन्धिदसिश्याधूसूभ्यो मक्। कालउक्तोयमेश्यामोऽस्यास्ति श्यामलः सिध्मादित्वात्लच्। मचति
मिश्रीभवतिवर्णान्तरेणमेचकः मचमुचिकल्कने कुत्रगमिपविमचेनामीत्वेत्वे मेचकः कृष्णनीलः स्या
द्रतसीपुष्पसन्निभ इतितुशाश्वतेभेदः॥ सप्तकृष्णवर्णस्य॥ पीत इति पीयतेवर्णान्तराणात्पानेवा कुलकादं
जिघृषिभ्यः क्तः घुमास्थागात्यादिनाईत्वे पीतः। गौरउक्तः। हरिद्राया इवाभादीप्तिरस्य हरिद्राभः। त्रयंपी
तस्य॥ पलाशइतिपत्रंपलाशं तत्तुल्यवर्णतया पलाशः पत्रं पालाशं मारकतः शाटी हरित किंशुक इति

६५

तालव्यांतेरुड्रमसौ अतोद्धखादिपुंलिंगः पालाश इति दीर्घपाठे तु शेष इत्यस्य विधित्वांगीकाराद
णीत्याडुः। त्रीणि हरितवर्णस्य॥ लोहित इति रुहजन्मनि प्रादुर्भावे रुहेरश्च लो वेति इतन् लोहितः
रक्तेरागेरक्तः त्रयं रक्तवर्णस्य॥ शोण इति। कोकनदच्छवी रक्तोत्पलाभः शोणः वर्णे शोणति पचाद्यच्
एकं॥ अव्यक्तेति [illegible] अव्यक्तरागः किंचिल्लोहितोऽरुणः यथा दरमत्तस्य चक्षूरागः अरुणः
कृष्णलोहित इत्यमरमाला॥ एकं॥ श्वेतिश्वेतरक्तो मिश्रः पाटलाकुसुमाभः पाटलः अटपटगतौ एयंतात्
वृषादिभ्यः कलच् पटेरलन्नवाडुलकादिति तु भट्टः द्वे॥ श्याव इति श्यावः श्यैङ्गतौ वाडुलकत्वात् कृ
सृष्टदृष्योवः कपिवर्णस्याख्या लोमादित्वाच्छः कपिशः तालव्यांतः तथा च कपिशितं पिशितं मदनाग्नि
नेनि माघः द्वे कृष्णपीतमिश्रवर्णस्य॥ धूम्रेति धूमं वातीति धूम्रः रादाने पृषोदरादित्वादाकारलोपः। धूम
मेवलातीति धूमलः कृष्णमिश्रो लोहितः शाकपार्थिवादिः त्रयं कृष्णलोहितमिश्रस्य॥ कडेति गडतीति
गडेः कडेत्यादेरन् कडा देशः कडारः कपिलः कपिवर्णे कवेः पश्चेति इलच् पश्वातादेशः कपिवर्णं लाति

गहुमेवन २

तिकपिल इतिसुस्वामी। पिंजति पिजि वर्णे पिंगः। पेशते पिश अवयवे किशादिभ्यः कित् इत्यंगच् पिशंगः। ताल
व्यमध्यः। तथा च माघे परिपाकपिशंगलतारजसा रोधश्चकास्ति कपिशंगलतेति। कमुत्को नो पिशंगादय
श्चेत्यनेन ऽनरुन ऽगमः टिलोपाभावश्च निपात्यते इकारस्यानादेशः कडुः। एजि वर्णे छत्वषादित्वात् क
लच् न्यंक्वादीनां चेति कुत्वं पिंगलः। पिंगलानीतिस्वामी शब्दार्णवे तु भेदः। सितपीतहरिद्रक्तः कद्रारस्तु
ण वह्निवत्। अयं तु डिक्तपीनां गकपिलो गो विभूषण॥ हरितो शेहि नोसो पिशंगः पद्मधूलिवत्। पि
शंगत्वसिनावेशात् पिंगो दीपशिखादिषु। पिंगलः रक्तपरछायः पिंगेस्तु ज्ञांगखडवदितिषट् कपि
लवर्णस्य॥ चित्रमिति चीयते चित्रं अमि चिमिगमिभ्यः क्र इति क्तः। गुणे शुक्लादयः पुंसि नित्वमिति
अतो नानार्थं पुंस्कांडे निवंधनाच्चित्रमिति पाठो। लिपिदोषस्तस्माच्चित्र। किमीरेतिसमस्तपाठ्यमि
त्येकेऽज्ञीव निर्देशस्तद्वति गुणिलिंगत्वेन कामधारादित्यन्ये प्रकांतं समासे विहाय चित्रमिति टथरू
पभेदप्रदर्शनमत्रोच्यते गुणे शुक्लादयः पुंसीत्यस्य वाधनार्थ इतित्तु वयं तथा च शब्दार्णवे ज्ञीवत्वं दृश्यते

मेदिनीकरेपिविस्पष्टमेवतिलकालेरव्ययोः क्लीवंकर्बुराद्भुतयोरपीनिएकंचेत्तत्कथंचित्रंचेदेकताक्तु
नइतिधर्मकीर्त्तिवार्त्तिकंच।नामानुशासनेत्तुपुंस्त्वमितिनविद्मः।।कीर्यतेकिर्मीरःगंभीरादयश्चेतिकि
रतेरीरन्।।प्रुडागमःकलयतिकवर्णानितिकल्माषःकल्माषःकर्बुरेकृष्णइतिमूर्द्धन्यांतेरभसः।।शपत्या
क्रोशतिवर्णानितिशपेर्वश्चेतिकलःवत्वंचशवलस्तालव्यादिःशकुनिपताकाशवलंघनवृंदंचकु
षापताकाशवलमितिहृद्दावनात्।एतिवर्णान्एतेवर्ण्यतेन्एतः।।कर्बुरउक्तोराक्षसे।।षट्नानावर्ण
स्य।।गुणइत्यादिगुणेवर्णमात्रेवर्त्तमानाःशुक्लादयःकर्बुरांताःपुंसियथापटस्यशुक्लोगुणः।।नद्वति
ड्रव्येवर्त्तमानाअभेदोपचारात्गुणिलिंगावाच्यलिंगाःततःस्त्रियांशुचिःशुचीवर्णादित्यादिनाङीउ
नाकारोवास्येतास्येनीहरिताहरिणीलोहितालोहिनीरोहितारोहिणीएताएनीङीषुगौरीत्र्यंगुनीह
रिणीधूसरीपलाशीकडारीकिर्मीरीकल्माषीशवलीखरुसंयोगोपधप्रतिषेधोवक्तव्यइतिपांडुःकद्रुः
नीलात्तेप्राण्योषध्योःनीलीवडवानीलीत्रुषधिःवासंज्ञायांनीलीनीलाकुवलयदलनीलाकोकिला

ल्लावालह्नूनर इति अपपाव इतिवामनः ज्ञानपदेत्यादिनावर्णे ङीष् शोणान्बर्ज्ञ चामितिपक्षे शोणी शोणा
। पिशंगाद्युपसंख्यानेपि शंगी श्यामरोत्कटकल्माषाः कुसुमानां सम्बृद्धय इतिटावेतदर्शनात्कल्माषे
तिटावेतमति शबले तिटावेतमसाद्धि तिवाणभट्टः अर्शआद्यचितुटापि साध्ये वरोहिणीरोहितेति पावः
क्वचिद्दृश्यतेतत्‌व्याख्यानुलिखितस्त्रीलिंगप्रयोगादेवकृतप्रायेतिनक्रियते॥ धीवर्गविवरणं॥ ब्राह्मीत्या
दिब्रह्मण इयं ब्राह्मी ब्राह्मोऽजातौ इतिटिलोपेटिड्ढाणञादिना ङीप्। भरतेन हारित्वात् भारती शोषेऽण
। भाष्यते भाषा गुरोश्चेत्यप्रत्ययः। गृणाति तां गृ शद्वे संपदादित्वात् क्विप् वोरुपधाया दीर्घः गीरेफान्ता। भा
गुरिमते गिराथि। ब्रुवणी वचनं वा वाज्जल्यितेगदितं गीरेतिशद्वार्णवः ब्रवाणीति। ब्रह्मणोवनणा इति
निरुक्तादेव वच्यभावः। वाक् वां ता। क्विब्वचीत्यादिना क्विप् दीर्घोऽसंप्रसारणं च। वाणी। अणरणवणेति
दंडकः घञि गौरादिङीष्। सरोऽस्या आश्रयत्वेनास्तिमतुपि सरस्वती इयं ब्रह्मलोके ब्रह्मसरः समाश्रित्य
शापान्नदी भूत्वा लोकमवतीर्णा। अत्र शक्तिशक्तिमतोरभेदाद्वचनमपि सरस्वतीशद्ववाच्यं। भावे घञि

टी॰

व्याहारः। वचेः क्तिन् उक्तिः। लपितं भावे क्तः। एवं भाषितमपि। वचेर्ल्युट् वचनं। असु निवचः सांतं। त्रयोदशव
चनस्य॥ अपेति शब्दानुशासनेशिष्टादितरो गावीत्यादिरपभ्रंशः। संस्कृतादपभ्रश्यत इति व्युत्पत्तेः। अपभ्रष्टः
शब्दोऽपशब्दः। अपेत्यव्ययं कुत्सायां तथा च कुत्सितस्तारोऽपचार इति परिन्योर्नीण्योरिति सूत्रे न्यासः। सं
स्कारविरहादेव कुत्सितत्वं। शास्त्रे॥ शास्त्रे व्याकरणे दैवाचकोयः स शब्द इति स्वामी। शास्त्रे यः शब्दः स वाच
क इत्यन्ये। अयमेव साधुरपि॥ तिङ्। एकार्थपदैरपसमूहो वाक्यमित्युच्यते विवक्षितार्थप्रतिपादनात्
वचेर्ण्यत् वचोऽपशब्दसंज्ञायामिति निषेधस्य पर्युदासादिह वचजोरिति कुत्वं। समूहस्यैकार्थकत्वात्
अर्थो महाविशेष्यं महद्वंद्वउपसर्जनतापेक्षं वैकवृत्तिविषयता। इदं च लक्षणं सूत्रभाष्ययोर्मते। त
च्च वाक्यं त्रिधा तिङंतचयः सुवंतचयः उभयचयश्चेति। आद्यो यथा पचति भवति। एककर्तृकावर्तमाना
पचिक्रीया भवतीत्यर्थः। क्रियाप्रधानमाख्यातमिति सिद्धांतात् क्रियायाश्च सत्वभूतत्वे पि कर्तृत्वेन गा च सं
बंधस्य सुवादिसूत्रे भाष्यकैयटादौ स्थापितत्वात् द्वितीयो यथा प्रकृतिसिद्धमिदं हि महात्मनोत्तृतीयोय

याघटमानयश्वेस्तुर्वेवल्गुरित्यादिनुनैकंवाक्यंश्रमणावलानारीनांप्रत्येकंप्राधान्यात्किंत्वाद्विप्रकारकाना
र्भाणानानावाक्यान्येवेतिदिक्।इदानींवार्त्तिकमतेलक्षणांतरमाहक्रियावेति।क्रियापदमित्यर्थः।उक्तंहि
कात्यायनेनयत्रान्यत्क्रियापदंनास्तितत्रास्तिर्भवंतीपरः।प्रयुज्यमानोप्यस्तीति।अतएवाभिहितेप्रथ
मेतिसंगच्छते।एतन्मतेद्विविधमेववाक्यंकेवलसुवंतचयानस्तुपगामात्।एतन्मतखंडनंक्षाकारेस्यषष्ठे
ग्रंथगौरवभयान्नलिख्यते।।श्रुतिरितिश्रूयतेधर्मोऽनयाश्रुतिः।श्रुयजिस्तिभ्यःकरणइतिक्तिन्।विदं
त्यनेनधर्ममितिवेदः।।आङ्पूर्वान्म्नायतिरुपदेशार्थः।आम्नायतेउपदिश्यतेधर्माधर्मावनेन।घञ्।आ
मनतिउपदिशतितौस्थाद्युधेतिकर्त्तरिणोवा।आम्नायःत्रीणिप्रत्येकंसमुदायेनत्ववेदस्य।।त्रयीति
त्रयीवक्ष्यमाणेनतयाविधिर्विधीयमानोयज्ञादिः।त्रयीधर्ममुक्तंचविधानमृग्यजुःसामत्रयीधर्मं
विदुर्बुधाइतिसमासेगुणीभूतस्यापित्रयीशब्दस्यवबुद्धिवशात्तच्छब्देनपरामर्शः।यथाअथशब्दा
नुशासनंदहस्रुग्वदिवोकसः।ततफणिमंडलोदर्विर्मणिर्धोतितविग्रहमितिरघुःएकं।।स्त्रियामिति

टी॰ २

ऋच्यंते देवा अनया ऋक् चं ता। अचस्तातो छिपु। सोऽवसाने स्यति पापं। स्यतिभ्यां मनिन्मनि नाविति मनि
न् साम। इज्यते ऽनेन यजुः। अर्त्तिपृवपियजितनिधनितपिभ्यो नित् इत्युसि वेदानां पृथगेकैकं।। इतीति इति
रतिक्रांतवाची एते वेदास्त्रयस्त्रयी शब्देनोच्यंते ऋग्यजुःसामलक्षणास्त्रयोऽवयवा यस्याः त्रिशब्दात् संख्या
या अवयवे तयप् तस्य ह्रि त्रिभ्यां तयस्यायज्वेति अयच्। टिड्ढाणञित्यादिना ङीप्। वेदत्रयसमुदितस्यैकं
।। शिक्षेत्यादि श्रुतेर्वेदस्य शिक्षेत्याद्यंगं अंग्यते ज्ञायते ऽनेनेति कृत्वा आदिना कल्पादिग्रहः तदुक्तं शिक्षा
कल्पो व्याकरणं निरुक्तं ज्योतिषां श्रुतिः। छंदसां विचितिः षष्ठैः षडंगो वेद उच्यत इति अकारादिवर्णानां
स्थानकरणप्रयत्नबोधिका अकुहविसर्जनीयाः कंठ्या इत्यादिका शिक्षा शिक्ष्यते शिक्ष विद्योपादाने गु
रोश्चेत्यकारः। यागक्रियाणामुपदेशः कल्पः। साधुशब्दान्वाख्यानं व्याकरणं वर्णागमो वर्णविपर्ययश्च
त्यादि निरुक्तिः येनोक्तं निरुक्तं ग्रहणादिगणनशास्त्रं ज्योतिः श्रुतिः। छंदसां पद्यानां शास्त्रं छंदो विचितिः
एकं वेदांगस्य।। उंकार इति यापेभ्यो ऽवति रक्षति भूतानि अवतेष्टिलोपश्चेति मन्टिलोपौ टिलोपसामर्थ्या

राम ८२

तत्प्रत्ययस्यैव अन्यथा हि डिरित्येवोच्यते ह्रस्वरादिनाऊवृगुणः ततो बाहुलकात्वर्णात्कारः ओंकारः प्रकृष्टो नवः स्तुतिः प्रणूयते वा प्रणवः णुस्तुतौ अप्रपूर्व उपसर्गादिति णत्वं द्वैतं ओंकारस्य॥ इतिहासः इतिह शब्दः पारंपर्योपदेशेऽव्ययं इतिह आस्ते अत्र हलन्तेति घञ् इतिहासः इतिएवमर्थे एवं किल स्मेति पचाद्यचि इतिहास इति तु भट्टः॥ पुराणेतो परिवर्धन प्रायत्वात् पुराणत्वं पूर्वचरितमिति तु स्वामी हेदपूर्ववृत्तप्रतिपादकस्य व्यासादिप्रणीतग्रंथस्य॥ उदेति उदात्ताद्यास्त्रयः स्वरा आदिना अनुदात्तस्वरितयोर्ग्रहणं तदुक्तं उदात्तश्चानुदात्तश्च स्वरितस्त्रयः स्वराः॥ चतुर्थः प्रचितो नोक्तोऽयतो सौछांदसः स्मृतः इति स्वरंतीति शब्द्यंते स्वशद्वोपतापयोः बाहुलकादप्स्वराः उच्चैरादीयते उच्चार्यते उदात्तः एकं॥ आन्वीतिनकैशास्त्रं न्यायवैशेषिकादि अर्यंते अधिगम्यंते आगतो उषिकुषिगार्तिभ्यस्थलिति थल् अर्थाः भूमिहिरण्यादयः तेषु प्रधानमर्थोभूमिः इतरेषां तद्योनित्वात् तन्दर्थशास्त्रं तथागम प्रतिपादितानां वस्तुतत्वानाम् उपस्थादीक्षणं परीक्षणमन्वीक्षानंदस्य प्रयोजनमिति वक्तुं आन्वीक्षिकी दीर्घादिस्तामादीनां चतुर्थ उमायोदमोदं

र्थशास्त्र३ दण्डनीतिः प्रणयो–

।। डःतत्र साधनं च प्रकृत्यादि तस्य नीतिर्दण्डनीत्यानीति प्रणयत्वं दंडनीतिर्दण्डेन व्यपदेशः प्रजादोषवाङ्कूल्ये
न प्रायशो दण्डस्य प्रणयनात् दण्डोनीयते दंड्य प्रतिपाद्यते ऽनया दण्डनीतिः यथाक्रममान्वीक्षिकी दण्डनी
तिरिति तर्कशास्त्रयोरेकैकं॥ आख्येति उपलक्षः केनाप्यर्थीयस्याः सोपलब्धार्थोभूतार्थेत्यर्थः॥ आचष्टे प्र
ति पादयति सत्यमर्थमाख्यायिका आख्यातेर्ण्वुल् तदुक्तं कन्यापहारसंगरसमागमाभ्युदयभूषितं यस्या
नायकचरितं वृत्तं नायक एवास्य वानुचरः। वक्रापरवक्रवती सोच्छ्वासैस्कृते न गद्येन। साख्यायिकेति कथि
तास्याद्वविका हर्षचरितादिः॥ एकैता नासत्यार्थीयाः कथायाः॥ पुरेति पुरा पूर्वस्मिन् भवं पुराणं पुराणान
व केवलाद् इति निर्देशान्निपातितं पुरा ऽनिति प्राणिति पुराणमिति तु स्वामी पंचलक्षणान्यस्य पंचलक्षणं।
सर्गश्च प्रतिसर्गश्च वंशो मन्वंतराणि चाहुम्यादेश्चैव संस्थानं पुराणं पंचलक्षणं। द्वैव्यासादि प्रणीतं मत्स्य
पुराणादेः॥ प्रबंधेति [illegible] प्रबंधस्य रचना बहुलता स्तोकसत्या कथा कथवाक्यप्रबंधे चौरादिकः॥ चिं राम
नि पूजिकयीत्यड् तदुक्तं पर्यायेण बहूनां यत्र प्रतियोगिनां कथाकुशलैः। क्रियते शूद्रकवधवज्जिगीषु ८३

भिः परिकथा सा तु यथांतरप्रसिद्धं यस्यामिति हृत्तमुच्यते विबुधैः मध्यादुपांततो वा सा खंडकथा यथा चापात्
मित्यादिः। यत्राश्चित्य कथांतरमंतिप्रसिद्धं निवध्यते कविभिः चरितं विचित्रमन्यत्र सोपकथा चित्रलेखादिः
लक्ष्मांकिताद्भुतार्था पिशाचभाषामयी वद्वविषया॥ नरवाहनदत्तादेश्चरितमेवद्वृहत्कथा भवति। आख्या
यिकैव संकामो भाषादिव्यगद्यपद्यमयी॥ सा दमयंती वासवदत्तादिरिहोच्यते चेद्वृरिति कोहलाचार्यस्त्वेवमा
हप्रवंधकल्पनास्तोकसत्यां संज्ञाः [illegible] कथं विदुः परंपराश्रयो यस्यां सा मताख्यायिका क्वचिदि
ति। एकं प्रवंधकल्पनायाः॥ प्रवेति प्रवह्लते प्राधान्यं भजते वह वल्ह भाषणे हिंसादानेषु कुत्र प्रवह्लि
का। प्रहेलयत्यभिप्रायं सूचयति हिल हावकरणे एवं तुल्प्रहेलिका प्रवह्लते रिन्नप्रवह्लिस्ततोऊ प्रप्र
वह्ली॥ प्रहेलिका प्रवह्लीव प्रश्नदूती विपादिकेत्युत्पलिनी एवं हिल्ने रिन्नप्रहेलिः उभयत्र स्वार्थे कन्
प्रहेलिकेति कौमुदी। व्यक्तीकृत्य कमप्यर्थं स्वरूपार्थस्य गोपनात्। यत्र वा ह्यार्थसंबद्धा कथ्यते सा प्रहे
लिका यथा तरुण्यालिंगितः कंठे नितंबस्थलमाश्रितः। गुरूणां सन्निधाने पि कः कूजति मुहुर्मुहुः।

पानीयकुंभइतिविदग्धमुखमंडनं॥ हेतुर्विज्ञानार्थस्य प्रश्नस्य॥ स्मृतीतिमहर्षिभिर्वेदार्थस्मरणं स्मृतिः॥
नद्योगात्तंत्रेथोपिस्मृतिः॥ धर्मःसंधीयतेयस्यां धर्मसंहिताधर्मशास्त्रंहेमचंद्रादिप्रणीतशास्त्रस्य॥ समे
तिसमाहरणं समाहृतिः क्तिन्। संग्रहः ग्रहदृढ्रहन्यपूतदुक्तं विस्तरेण प्रदिष्टानामर्थानां सूत्रभाष्य
योः वंधोयः समासेन संग्रहं तं विदुर्बुधाः॥ इतस्तत आकृष्ट एकत्र निवेशनं संग्रह इति च हेसंग्रहस्य
॥समेतिसमासोर्थोयस्याः वाचकः समासोर्थतेत्येषएव मूलपाठः क्वचित्तु समासार्थेत्यपिदृश्यते तद्
तितुपूर्वटीकाकाराः वयंतु समासार्थेति पाठमेव क्षीरस्वामिहड्डचंद्रकोक्तत्वादेशात्रायेण मरको
षेपिदृष्टवंतो। तस्तमेवबहुमन्यामहे है श्लोकस्यपादैनैकेनहाभ्यांत्रिभिर्वा पूरणं यत्र या सा तु मू
र्षाः किंतवाद्यापि चित्रकाननर्नगरेः स्मरनारायणं येन त्रेतायां रावणो हत इत्यादि श्लोकादौपादपूरण
रूपेण यमित्येके यथासा तेभवतु सुप्रीता किंनेदुर्भगयामेति॥ किमितिकोपिवादः किंवदंतीकिंपूर्वीहदं
ःन्तेह वहिर्वासि वदीत्यादिना न त्वगौरादित्वान्ङीषू बुधुवोन्तवूवाडुलका हृदेश्वततः किंवदंतिरितिहहृचंद्रः

राम

नतोऽङ्गीषु किंवदंतीति किंवदंती जनेभ्यः श्रुतिर्जनश्रुतिः द्वे सत्यामृतसाधारण्या लोकप्रसिद्धेः॥ वार्त्ते
ति वृत्तिर्लोकवृत्तं विद्यतेऽस्यां वार्त्ता प्रज्ञाश्रद्धेत्यादिनाणः॥ प्रमाणे वर्त्तनं प्रवृत्तिः॥ वृत्तोऽनुवर्त्तनीयोऽन्तः स
माप्तिरस्य वृत्तान्तः॥ उदन्तोऽतोऽस्य उदन्तः चतुष्कं वार्त्तायाः॥ आह्वयेति आहूयतेऽनेनाह्वयः द्वेऽस्य ह्वयांश
हे चतुं सीत्यादिना घः वाकुलकादात्वाभावः स्वामी तु वाकुलकात् प्रत्ययमाह नदाश्च शितीति निषेधादा
त्वं आख्यातं एवमाह्वा अभिधानमिति करणे ल्युट्॥ भागधेयवन्नामधेयं व्योमवत् नाम षट् नाम्नः॥ हूति
रिति ह्वेञः क्तिनि संप्रसारणं हलः इति दीर्घः॥ आकारणमाकारणा कृञो ण्यंता द्युच् आकारयति राह्वा
ने वर्त्तते तथा च माघः अहिंकोरायितुं महीभुजेति ल्युटि आह्वानं हूतिराकारणा हवः॥ हकारकत्तु पास
ने इति शाश्वतः॥ त्रयमाह्वानस्य॥ बहुभिः कृता संहूतिः अनेकैः कृतस्याह्वानस्यैकं॥ विवाद इति वि
रुद्धो वादो विवादः॥ न्यायेन व्यवहारः उभयत्र घञ्॥ विनानार्थे व संदेहे हरणे हार उच्यते नाना
संदेहहरणे व्यवहार इति स्मृत इति कात्यायनः॥ द्वे न्यायस्य॥ उपेति अप्सुक्षेपणे भावे घञ् उप
घ्न

दी॰
५

न्यासः वा वाङ्मुखमुपक्रमः वाङ्मुखं हे वचनोपक्रमस्य॥ उपेति उपसमीपे उद्धृत्यैतत् इति उपोद्घातः यदा
हुः प्राचीनाचार्याः॥ चिंतां प्रकृतसिद्ध्यर्थामुपोद्घातं विदुर्बुधा इति उद्धृत्या द्वियते उदाहारः उभयत्रापि
यत्र हे प्रकृतोपपादकस्य दृष्टान्तादेः॥ शापेपि शाप आक्रोशे ल्युडित्यस्मादेव॥ शाड॰ शपि रुगमिं विजी
वप्राणिभ्यो ऽथ वृ शपथः हे शापथस्य॥ पूजेति पूजया चेत्यादिना भावे प्रच्छेर्नङ्॰ छ्वोः शूडित्यादिना
छस्य शे प्रश्नः प्रश्ने चासन्नकाल इति निर्देशात् ग्रहिज्यादिना न संप्रसारणं॥ अनुयोजनमनुयोगः प्र
श्नः पृच्छाभिरादिश्वा दरु॰ नीणि पृच्छायाः॥ प्रतीति पृष्टस्य प्रतिवचनं प्रतिवाक्यं प्रादिसमासः उत्तरस्य
नेन उत्तरं अप्रा वाडुले कात् क्लीवत्वं हे उत्तरस्य॥ मीति शतं मे धारयसीत्यादिरभियोगः मिथ्यावा
सौ अभियोगश्चेति मिथ्याभियोगः॥ अभ्याख्यानमिति भावे ल्युट्। अध्यपनत्वराभियोगः स एव दंते
प्रयुक्तो ऽभ्याख्यानमिति सूत्रिवचनमनागमं वाक्यप्रक्रमनिवंधात्। हे मिथ्याविवादस्य॥ अथेति
भिशंसनमभिशापः यत्र हे सुवर्णस्तेयादिवाच्यत्वस्य॥ प्रणेति प्रीतिजनिता सुखकं गादिशब्दः प्रणादः

हन्य ~
राम
८५

प्रीतिजं शीत्कृतं प्रणादः अनुरागात्कृते शब्दे प्रणादः शीत्कृतं तृणमिति शब्दार्णवादिति कौमुदी नदेर्घञ् उ
पसर्गादित्यादिना णत्वं एकं॥ यश इति ईल स्त्री मस्तुते व्याप्नोति अस्तुन्। अशेर्देवने युट् चेति असुनि युडा
चयश इति कल्लिंगः याति यशोः एघोस्रादिरिति तु मद्दः। कृतसंशब्द नेह्नतियूति निपातनात् कीर्तिः अज
गत्यादौ संज्ञायां समजेत्यादिना क्यप् प्रतिषेधः इत्यजेर्ज्जीभावः समज्या कीर्तिरिति मेत्रेयः समैः सर्वै
र्ज्ञायते घञर्थे कः समज्ञेति तु पुरुषोत्तमः समाङ्पूर्वे ज्ञानातिः ख्यातौ अतएव ख्यातो विश्रुतः समा
ज्ञात इति रत्नकोषः ततोऽङ् समाज्ञेति तु कौमुदी त्रीणि कीर्तेः॥ स्तव इति स्तोतेः करणेऽप् स्तवः दाम्नीत्या
दिना ष्टुनि स्तोत्रं णु स्तवने वा कुल कात्करणे क्तिनि तु नुतिः। अजि पिजि स्तभ्यः करणे क्तिन् स्तुतिः चतुष्क
स्तुते॥ आम्रेडितमिति द्वौ वारौ त्रीन्वारान्वा उक्तं द्विस्त्रिरुक्तं द्वि त्रि चतुर्भ्यः सुच् तत्स आम्रेडितं यथा अहिर
रित्यादिमे इम्रेइम्रे इउमा दे क्तः एकं॥ उच्चैरिति घुषिर विशब्दने भावे क्तः घुषिरविशब्दन इतीड्भावः॥ घोष
णे निन्यासेतियुच्च हेतु च्चैः शब्दनस्य॥ काकुरिति निध्वनेः शब्दस्य शोकभीत्यादिना यो विकारो विकृतिः स काकुः

आदिशब्देन कामक्रोधादीनां ग्रहणं कानंकाः शब्दः कक्यत इति कक्कुलौल्यो पतापयोः स्वादय इत्युपघ्रत्य
ये दीर्घे च काकुरित्यन्ये कुत्सितो यत्रासौ काकुः एकं ॥ अवेति यथाऽवर्णादयो निंदायां वर्त्तते तथाऽपक्रो
शादयोपीति वर्तेरर्थः उक्तीति वाच्ये त्रोटित्वादन्यतोक्तिरिति भट्टः वर्णः स्तुतिस्तद्विरुद्धोऽवर्णः आक्षेपा
दयः पंच घञंताः निर्वादपरीवादापवादाः परीवादे इत्यत्रोपसर्गस्य घञीति वा दीर्घः ॥ जुगुप्सा गुपगोपन
कुत्सनयोः गुप्तिज् किद्भ्य इति निंदायां सन् अ प्रत्ययादित्यकारः एवं कुत्स आक्षेपणे निंदे कुत्सायामतो निर्दे
शात् । गर्हगल्ह कुत्सायां ल्युट् गर्हणं द्वे निंदायाः ॥ पारुष्यमिति अप्रियं वचः परुषं तद्भावः पारुष्यं ॥ भा
वे घञ् अभिवादः द्वे अप्रियवचसः ॥ भर्त्सेति चौरोसि त्वां घातयिष्यामीत्यपकारार्थं वचनं भर्त्सनं भर्त्सत
र्जे संतर्जने करणे ल्युट् द्वे ॥ य इति उपालंभो द्विविधः शुण्णविष्कारणपूर्वको निंदापूर्वकश्च आद्यं यथा महा
कुलजस्य भवतः किमुचितमिदं ॥ द्वितीयं यथा ॥ वंचकोसि तस्य भवत उचितमेवयः सनिंद उपालंभः तत्र
परिभाषणं भावे ल्युट् तथा च भागुरिः निंदापूर्वक उपालंभः परिभाषणमुच्यत इति एकं ॥ तेति द्वौ निमि

तंपुंनिमित्तं वा मैथुनं प्रतियः आक्रोश उद्घोषणात्तत्रा क्रारणा क्रूरसंचलनेप्रयोजकएयंतात् ल्युट् क्रारणा
पि [illegible] क्रारणा क्रारणा क्रोशाः साभिशापा अभि मैथुना इति क्रारणमिति क्लीवमपि नीच मा क्रारणं य
आक्रोशो मैथुनं प्रतिशप्तार्णवातनीच मिति पुं विहीनस्य संज्ञा एकं परस्त्रीनिमित्तं पुंसः परपुरुषनिमित्तं
स्त्रिया आक्रोशस्य॥ आभाषणमिति भावे ल्युट् आलापादयोपलापांताः परिदेवनरहिताघजंताः द्वे संभाष
णस्य॥ प्रयोजनशून्यमुन्मत्तादिवचनं प्रलापः निरर्थकोक्तेरेकं॥ मुहुरसंभ्रमेण पुनः पुनर्भाषणमनुला
पः द्वे॥ परिदेवनमिति दिवु परिदेवने चुरादिः द्वे अनुशोचनोक्तेः॥ विरुद्धः प्रलापो विप्रलापः द्वे अन्यो
न्यविवादवचनस्य तत्रायं विरोधवचनस्येति तु कौमुदी॥ मिथोऽन्योन्यं प्रीतिभाषणं संलाप इति तु कौ
मुदी यत्त्वालापः स एकेनापि क्रियते इदं तु परस्परभाषणमेवेति भेदः॥ सुष्ठु इति सु अतिशयेन प्रकृष्टो
लापः सुप्रलापः सुवचनं ल्युट् द्वे शोभनोक्तेः॥ अपेति निह्नवः ह्नुङ् अपनयने असदारोपः द्वे धार्यमा
णोपि न धारयामीत्यादिकोक्तेः॥ संदिश्य [illegible] ते संदेशः कर्मणि घञ् उक्तस्य वाक्यया संदिष्टोर्थं उच्यते सासं

देशवाक्वाचिकमितिवाचोव्याहृतार्थायाइतिवक्ते संदेशवाक्यस्य॥ हृ हृन्तन्तरेवक्ष्यमाणान्तुषत्यादयः
सम्यग्गतावाप्विशेषास्त्रिषुयथाउषतीवाक्उषद्व्याहारःउषद्वचः॥ उषेति अकल्याणीनिंदार्थावाक्उ
षतीयथाब्राह्मणेहंतव्यइतिउषदाहेशत्राउषतीत्यागमशासनमनित्यमितिशपुम्यमोर्नित्यमितिश
तुर्ड्मभावःरुशतीतिनुस्वामीनदारुशहिंसायांतालव्यांतेतौदादिकत्वात्शवेनात्घञिरूपंआह्वानद्योरि
तिविकल्पान्नुमोभावःरुशतीहिंस्त्रेत्यर्थः उषत्यादेःस्त्रीलिंगत्वादेवकामचारात्स्त्रीत्वमितिभद्दःस्त्रीनि
र्देशःस्त्रियांप्रायःप्रयोगदर्शनात्शब्देनतत्वप्रदर्शनार्थंवेतिकौमुदीएकं॥ स्वभात्मिकाशुभस्वभावावाकु
कल्यायथोदिप्रत्यूषेकल्यमव्यक्तंसापिकल्याद्व॥ अत्ययर्थमतिशयेनमधुरंवाक्यंसांत्वसांत्वसामप्रयो
गेमधुरादिःपचाद्यच्॥ दिष्यारमसेसामनिपूरमेवच सांत्वंसुजनोहिवदतिमित्रंपरमेवचसांत्वमितिशि
वभद्रेदंत्यादियमकात्दंत्यादिताएकं॥ सगोमेःक र्त्वरिक्तःसंगतंप्रयुक्त्यामिलितंहृदयंगमंगमश्चेति
खचूद्वेशोभनवचनस्य॥ निष्ठुरमितिनितिष्ठतेर्मद्गुरादयश्चेतिकुरच्चुकित्वादाकारलोपःउपसर्गाद्वि

राम
दं

त्यादिना षत्वं निष्ठुरं। पृ पालनपूरणयोः। बृंहि निष्टकनि वहित्र पिपूरि ष्यन्तु षत्वं परुषं मृदु इत्यर्थः। द्वे कर्कश
वाक्यस्य॥ हालिकशाकटिकप्राधानिकत्वात् ग्रामस्य ग्रामेऽनेवं ग्राम्यं या माद्यत् घञ् विति यत्। श्रीः शो
भा। स्यात्सिसिध्मादिवा कृतिगणत्वात् लत्। श्लीलं सुंदरं न श्लीलं कपिलिकादीनामुपसंख्यानमिति ल
त्वं द्वे भंडादिवचनस्य॥ इंद्रो भवानिति प्रियं न सत्यं काणो भवानिति सत्यं न प्रियं। यत्तु प्रियं च सत्यं
च तत् सूनृतं सुष्ठु नृत्यंत्यनेन मूलविभुजादित्वात् के अन्ये षामपीति दीर्घत्वे इत्य सादिकं सुष्ठुत्रा
तं सूनृतं पृषोदरादीत्यन्यः॥ अपि तेस खि वल्लभः असूनृतं वद पिसूनृतभाषी तिवासवदत्ताविरु
द्धालंकारदंत्यश्लेषात् असूनृतप्राणान् नृतं सत्यं वदपीत्यर्थः। एकं॥ संकुलं कुलसंस्त्याने कः। फलि
संकुलतालयुह मित्यादि भट्टिभाषासमावेशाः॥ क्लिष्टं यस्य विभाषेतीडभावः द्वे या वज्जीव महं मौनी
त्यादिवाक्यस्य परस्परविरुद्धस्य॥ लुप्तेति अशक्या [illegible] लुप्तवर्णपदं पद्यवचः असंपूर्ण
मितियावत् नग्रस्तं लुप्तोच्चारितो वर्णः पदं वा यत्र वाक्ये न ग्रस्तमिति तु कौमुदीयत्सु ग्लसु अदने क्तः एकं॥

त्वरितोदितं वाक्यं निरस्तं अस्तु क्षेपणोक्तः हृष्टशीघ्रोच्चारितवचसः ॥ सनिष्ठेवं श्लेष्म कणादिनिर्गमसहितं अं
बुशब्दउपचारादंबुयुक्तं ततः ष्ठीवेति दीर्घः ष्ठीवोदरादिदीर्घलेसनिष्ठीवमित्यपि केचित्तु सर्वानंदः सनिष्ठी
वमित्यपपाठः ल्युट् चेत्यनंतरं ष्ठिवुसिव्योर्दीर्घश्चेति सूत्रत्वात् ल्युट् चेति दीर्घात् । त्रिकांडामरमालयोस्तु
दीर्घपाठोपदिनल्लिपिदोषस्तदा घञपि वा दीर्घो वा ड्कुल्लकात् समर्थनीय इति तु कौमुदी श्लेष्म कणनि
र्गमसहितस्य वचसः एकं ॥ अनर्थकं समुदायार्थस्य वचनम् अवद्धं यथा जरद्गवः कंवलपादुकाभ्यां द्वा
रिस्थितो गायति मंगलानि । तं ब्राह्मणी पृच्छति पुत्रकामा राजन् रुमायां लशुनस्य कोऽर्घः इति अत्र समु
दाये नेकार्थो नास्ति अवद्धं वद्धं वधं वंधनेक्तः नञ्समासः अविद्यमानः समुदायो[illegible]त्यनर्थकं नञोऽस्य
र्थानामिति समासः अर्थान्नञ इति उत्वं प्रभृतिपाठात् त्यंकप् समासांतः । अवध्यम् अवधार्हस्यादनर्थक
वचस्य पीति कोषदर्शनाद् अवध्यमिति तु कौमुदीह्व समुदायार्थशून्यवचसः ॥ अनेति निंदितान्यक्षराणि यत्र
अनक्षरं निपातनस्यानेकार्थत्वान् नञो निंदार्थता एवमवाच्यं वचभाषणे एयत् वचोऽशब्दसंज्ञायामिति न

राम
८८

या २

कुत्सं हेडुर्वचसः॥ गुणक्षेपदोषाविष्कारिवाक्यस्येति कौमुदी। अन्यथाभूतार्थं खपुष्पादिपदमाहतं
हंतेर्भावे क्तः। एकं॥ म्लिष्टमिति म्लेच्छ अव्यक्ते शब्दे क्तः। क्षुब्धस्वांतेत्यादिना निपातितं द्वे अव्यक्तवचनस्य॥ न
ऋतमनृतं न वचो वितथं विगतं तथा सत्यं यत्र तद्वितथं द्वे असत्यवचसः॥ सत्यमिति सति साधु सत्यं दिगा
दित्वात् यत्। तथा शब्दोयमृतपर्यायस्तत्र साधु तथ्यं तत्र साधुरिति यत्। ऋतमिति ऋ गतौ क्तः॥ अर्थेन स
ह सम्यंचति संगच्छते सम्यक् अंचु गतिपूजनयोः ऋत्विगादिना क्विन् समः समीति समः सम्यादेशः स
म्यक् पुंसि तु सम्यङ् सम्यंचौ समासाद्यविभक्ते अच इत्यकारलोपे च वा विति दीर्घत्वे समीचः इत्यादि स्त्रियामं
चते श्वोपसंख्यानमिति ङीपि समीची चत्वारि सत्यवचसः॥ अमूनि सत्यादीनि उपचारात् तद्वति वर्तमाना
नि त्रिषु यथा सत्यो ब्राह्मणः सत्या नारी सत्यं जलं वाग्भेदास्त्रिषूत्तर इत्यनेन तु वाग्विशेषणानां त्रिलिंगत्वं
यथा सत्या वागित्यादि एतेन च वाग्भेदास्त्रिषूत्तर इत्यस्यावधिर्दर्शितः॥ ॥शब्द इति निनादनिनदेण द अव्य
क्ते शब्दे नौ गदनदपठस्वन इत्यप् पक्षे घञ् स्वन ध्वन शब्दे स्वनिकंप्यञ्ज सिवसिवनिर्ग्रंथीत्यादिना इः ध्व

निःस्वनिध्वानः शैतेरपूरवः स्वनस्वानोऽस्वन हसो वेत्यपृथ्यैघष घुष्टो निर्घोषः ह्राद अव्यक्ते शब्दे निर्ह्रादः घञ्
पौ निस्वाननिस्वमौ नादः मिनादवत् निग्रहणमुपसर्गनियमार्थं आरवारावयोः विभाषाङि रुप्लुवोरित्य
पृथग्ज्ञौ संरावविरावयोः उपसर्गे रुवइति घञ् चांड्रैस्तु वाकुलकाघञ् रावोपि अतएवनिनादितं भीषण
रावगाह्वरमिति सप्तकुमारिकाशब्दादिसप्तदशकं शब्दस्य ॥ अथेति वस्त्रपर्णयोध्वनौ मर्मरः मृङ् प्राण
त्यागे हृदयश्वेत्यरन् सुगागमो मर्मरत्वं राति मर्मर इति तु कौमुदी वस्त्रस्य पर्णस्य ध्वनेरेकं ॥ भूषणानां
तु भूषणानां ध्वनौ शिंजितं शिजि अव्यक्ते शब्दे तालव्यादिः भावे क्तः गुरोश्च हलइत्यकारे शिंजापीति तु स्वामी
एकं ॥ निक्वाण निक्वणयोः नौ गदनदेत्यतोनावित्यत्र वर्तमाने क्वणो वीणायां चेत्युपपदे घञ् क्वाण क्वण
योः व्यधजपोरनुपसर्गे इत्यत्र वर्तमाने क्वणो वीणायां चेत्यनेन घञ् पोल्लुटि क्वणने पंचवीणाया अन्य
स्यापि किन्नरादेः क्वणनस्य वीणायाः क्वणिते प्रादेरप्युपसर्गादुत्तरस्य क्वणो धातोः प्रक्वाण प्रक्वणादयः प्र
योगा भवंति तथाहि क्वणो वीणायां चेत्यपि विकल्पः तत्र वीणाग्रहणस्यैतदेव प्रयोजनं वीणादिविषये अन्यो

पसर्गाद्यथास्यात् आदिनोपक्वाणादयः ॥ कुलसंख्याने कोलनं कोल इति एकीभावस्तमाहलयतीति हल
विलेखने अच् कोलाहलः ॥ कलशब्दसंख्यानयोः शोचरेत्यादिना चकारस्यानुक्तसमुच्चयात् घविषये नित्यवी
प्सयोरिति द्वित्वं कलकलः हेव ढुभिः क्वातस्य कलकलध्वनेः ॥ तिरश्चां पक्षिखगादीनां रुतं वाशितं वाश्रृशब्दे ता
त्वर्थाः तः सहोपशल्याशनवाशिताश्च्वि नैरिति तालव्यमध्ये ष्म विवेकात् रोतेः क्तः रुतं एकं ॥ स्वीतिसंपदा
दित्वात् क्विपू प्रति श्रुतप्रतिध्वानः पूर्ववत् द्वे प्रतिशब्दस्य ॥ गीतं गानमितिगायतेः क्तल्युटौ द्वे गीतस्य ॥ शब्द
वर्गविवरणं ॥ अमी निषादादयः सप्त स्वराः तंत्रीतः कंठाच्चोच्चरंतीति तथा च नारदः प्रजानीति मयूरस्तु एव वोन
दति चर्षभं । अजाविकौ च गांधारं क्रौंचो नदति मध्यमं ॥ पुष्पसाधारणे काले कोकिलो रौति पंचमं । अश्वस्तु
धैवतं रौति निषादं रौति कुंजरः इति एते च समराः पंचमं गायंतितथा च विशाखिनः अश्वस्तु धैवतं सोपिम
तः पंचमसंज्ञितं । निषादस्तु गजो गर्जेत्तु न्मदो सोतु पंचममिति निषीदंति स्वरा अस्मिन् निषादः स्तेन हेतुना ।
अशेषसंधि विषयं सहित्या प्या वतिष्ठते । सदेरकर्तरि चेति घञ् सदिरप्रतेरिति षत्वं । वायुः समुद्गतो नाभेः कं

ठशीर्षसमाहतः। नदत्यृषभवद्यस्मात्तेनैष ऋषभः स्मृतः। ऋषिगतौ कृषिभ्यां किदिति अभच्। वायुः समुद्गतो
नाभेः कंठशीर्षसमाहतः। नानागंधवहः पुण्यो गांधारस्तेन हेतुना। गंधमियर्त्ति ऋगतौ कर्मण्यण्। गांधारः पृ
षोदरादित्वाद्दीर्घः। गांधारः यद्वा गांधारोऽभिजनोस्याः सिंधुतक्षशिलादिभ्योऽण्। कंगदुत्तिष्ठते व्यक्तः षड्जः ष
ड्भ्यस्तु जायते। कंठोरस्तालुनासाभ्यो जिह्वाया दशनादपि। पूर्ववज्जनेर्डः। तद्वद्देवोत्थितो वायुरुरः कंठसमाह
तः। नासिकाप्तो महानादो मध्यस्थस्तेन मध्यमः। अभिसंधीयते यस्मात्स्वरास्तेनैष धैवतः। सत्तु नारप्रधान
त्वाल्ललाटे व्यवतिष्ठते। धीमद्भिर्धीयते इत्यस्मिन्नर्थेऽण्। पृषोदरादिः। वायुः समुद्गतो नाभेरुरोहृत्कंठमूर्द्धसु
। विचरन् पंचमस्थानप्राप्त्या पंचम उच्यते। पंचन्शब्दान्नांतात्संख्यादेर्मट् प्रत्ययः। तंत्रीसमुत्थितानां कंठो
त्थितानां च स्वराणां पृथक्पृथगेकैकं॥ काकेति मधुरास्फुटो ध्वनिः कलः। तस्मिन् कलेसूक्ष्मे काकली ईष
तु कलस्य का काकली ईषदर्थे चेति कोः कादेशः। गौरादिङीषित्तु स्वामी कलेरिन् कलिः शब्द ईषदत्रेति काक
लिः कृदिकारादिति ङीषि काकली उपाधिपद्धतिपक्षांतिपद्धि वर्त्तनि वासि वितर्द्दि स्थुरंध्रि अंगुलिकाकलि

राम
९०

दिध्वि

शारिशारारित्तुं दितु विषुध्विंतिवर्त्तिरिति शबरस्वामी साधू दितंकाकलिभिः कुलीना इत्यभिनंदः तस्मात्काकली
तिगौरादिरिति स्वामिकलिंगादीनांप्रमाद इतितु कौमुदीएकं॥ मधुरेष्क्रनिसुखेऽस्फुटेऽव्यक्ताक्षरेध्वनौ कलःक
डमदेगोचरेत्यादिना चकारस्यानुक्तसमुच्चयार्थत्वात् घः डलयोरेकत्वस्मरणं॥ एकं॥ गंभीरे मेघादिध्वनौ मंद्रः
मदिस्तौति मोदमदस्वप्नगतिषु स्फायीतिर कुशक्रवत्रमद्रोपीतितु स्वामीएकं॥ अत्युच्चे कोस्यादिध्वनौ तारः
तारयतिबोधयतिअच्एकं॥ त्रयः कलादयस्त्रिषु यथा कलोध्वनिः कलंरुतं कलावाणीत्यादि॥ समेनिसम्य
गविनः लयो नृत्यगीतवाद्यानां साम्यं यत्र स एकतालः सम्यक्रियाशास्त्रं वं धितलयो मध्यमलयः स एकतालः
समतालइतियस्याख्यातौर्यत्रिकमेकताल इति केचित् एकं॥ वीतिजायते स्वरोऽस्यां रासा सा स्त्रा स्त्रुणवीणा
इत्यनेन वीगतिप्रजनकांत्यसनस्वादनेषु इत्यस्य यण् त्वे गुणाभावे वीणा। बलवल्लसंवरणे कुन् शिल्पि संज्ञया
रपूर्वा स्यापीति कुन् गौरादिः वल्लकी॥ विपंचयति विस्तारयतिशद्वं पचिविस्तारे रच नेण्यंतादेवुविपंचीगौरादिः
त्रीणिवीणायाः॥ सा तु वीणैव सप्तभिस्तंत्रीभिर्लक्षिता परिवादिनी स वरासिन्या इति प्रसिद्धा परि नौ वादः परिवा

नोनक्षत्य२

दः तद्योगादत्र ध्वनिवनावितिद्वौ ङीपू ए कं ॥ ततमिति वाद्यं वादनीयं ततं तनेततनिमृड्भ्यां किचेति ततं तन्त्रीतननात्
वाद्यमपि ततं ए कं ॥ मुरजादिकं वादनीयमानद्धं मुखे चर्मणा वद्धमानद्धं नहबंधने भावे क्तः आदिना पटहादिग्रहः
ए कं ॥ वंशी वेणुस्तदादिकं वादनीयं शुषिरं शुषिः छिद्रं तद्योगान्मधुरत्वत्तरः । आदिना शंखकाहलादिग्रहः शुषी
रं शुषिरं शिष्यं श्रीषैतालव्यादय इति समेदः ए कं ॥ कांस्यतालादिकं वादनीयं निबिडत्वात् घनं मेघसाधितं । आ
दिना घंटादिग्रहः ए कं ॥ चेति इदं ततादि चतुर्विधं चतुःप्रकारकं वाद्यादित्रिकनामकं । वादयंति ध्वनयंतिनद्वा
द्यं कर्मण्य वो यत् भ्रवादिग्रहभ्यो णिचान्नि निणिचन्नूवादित्रं समंतात्तुद्यतेनातोद्यं तेतुदव्यथने कर्मणि ण्यत् आ
तोद्यमिति स्वामिसर्वानंदौ । वादित्रादि द्विनामकं वाद्यमित्युसमस्तं प्रथमांतं विशेष्यमिति कलिंगकौमुदी
कोक्ता स्व प्रभृतयः । मृत्स्नागमस्य मृदंगः पद्यामृद्यते कर्मण्येत्यर्थे मृदरङ्गो दे । बिडादिभ्यः किदित्यंगच् किं त्वा
हुणाभावः । मुरात् संवेष्टनाज्जातो मुरजः व्यक्तौ वहुवचनं हे मृदंगस्य ॥ मुरजस्यांक्यादयस्त्रयो भेदाः तदुक्तं सा राम
हृतालत्रयायामश्चतुर्दशांगुलाननः । हरीतक्याकृतिर्यः स्यादंक्यो केस हि वाद्यते । चतुरंगुलहीनोंक्यान्मुरेके ९२

कांगुलेनयः॥ यवाकृतिः स आलिंग्य आलिंग्यसहिवाद्यते ऊर्द्धको गोपुच्छवत्सवितानोलोः ष्टांगुलोमुखोद्धत्वो
र्द्धवाद्यते ऽन्येषांवादनादूर्द्धकंनतेशब्दार्णवः॥ अंकेउत्संगेवाद्यत इत्यंक्यः तत्रसाधुरितियाद्वाद्यमानआलि
ग्यत इति आलिंग्यः आङ्पूर्वोल्लिगिगत्यर्थ इत्युतः कर्मणिण्यत् किंत्वाभावे घञ्नानादालिंगशब्दात्पूर्ववाद्ध
दनार्थमूर्द्धः कायतिशब्दायतेइत्यूर्द्धकः ऊर्द्धशब्दोऽयंनिर्विकारः तदुक्तंवर्णदेशनायांउज्झिहीनेउद्गच्छतीत्यु
र्द्धः उत्पूर्वादादेरुरोहातेर्डप्रत्ययः उदुपसर्गस्यादिवर्णस्याराद्देशेनैरुक्ते वकाररहिते ऊर्द्धः॥ यस्तुपरिपर्या
य आश्रयपरतंत्रः समकारोऽव्ययंवकारवांश्चात तथाच भववभूतिः ऊर्द्धधुनोनिवायुरितिउपरिध्वन्यते इत्यू
र्द्धं तंत्रांनरे ऊर्द्धसमानार्थऊर्द्धशब्दोऽथनव्ययमदंतोऽस्ति ऊर्द्धदेहेभवमोर्द्धदेहिकमित्यदंतः पूर्वपदाद्व
त्रिजयादित्यः॥ कुर्वतीरुपल्लेस्कंगे अर्द्धवनंनीचमूर्द्धजैः॥ तस्याऽवनालीरचैतिचित्रानागचमूर्द्धजेरिति
कीचकंतत्ववकारवत्तमूर्द्धशब्दस्य॥ मुरजविशेषस्यपृथक्पृथक् स्यादितिनायशोर्थः पटहोयशः पटहः
शाकपार्थिवादिः ढगितिकायति ढक्का आन इति कः ढेढक्कया॥ विष्यन्त्यस्यारवान्विभेनेरिंडुवत्त्रक्कगो

वधेयमका २

रादित्वान्ङीष् ॥ भेरी स्त्री भीभये एवं वृन्यादयश्चेति भेरिः ॥ खः प्रमङ्गाह तभे रिसंभवः प्रकाशयामास स समं ननतस्त
नइति कुमारदासः ॥ आनिन्यनेन वादितेन साक्षिकोयोध्यः आङ्पूर्वादनितेः कृञादिभ्यः संज्ञायां वुन् आ
नकः ॥ दुंदुशब्देन उभिः पूर्णं यत्र स दुंदुभिः उभ उन्दूपूरणे औणादिक इनिः शकंध्वादिः दुंदुइत्यव्यक्तशब्दे
न भातीति औणादिक इत्ति रित्नु कौमुदी स्याङ्गीर्यौ दुंदुभिः पुंसीति नानार्थे लिंगवदुर्वशीतिः स्वामी तु भेरी स्त्री दुं
दुभिः पुमानिति पाठ तिएकै भेर्याः ॥ आनकः उक्तः पटहो ह्वेज हातीति पटहः पृषोदरादित्वात्तकारलोपः प
टहेति पटह इत्यन्ये पटहोस्त्रीति संबंधः पुंनपुंसकाधिकारे चं डङ्गोमीउपवासं स्थ हदे हेल्लो हं पटहमित्य
पीति द्वे पटहस्य ॥ वीणादिवाद्यते येन धनुराद्याकृतिना स कोणः कुण शब्दोपकरणयोः हलश्चेति घञ् द्व
योरुक्तं कोणो वीणादेर्वादनं सारिका च सेति शब्दार्णवः एकं ॥ वीणेत्यादि वीणादण्डः प्रवालः प्रवल वल्ह संवे
वरणे कर्मणि घञ् द्वे वीणादंडस्य ॥ कं वातं खुभ्राति खुभेः सौत्रान्मूलविभुजादित्वात्कः पृषोदरादित्वा
त्सलोपः ककुभः प्रसेवकः उक्तः इति रत्नकोषः सेवृ सेवने दंत्यादिः कुन् संज्ञायाम पूर्वस्यापीति

राम
८१

प्रसेवकः द्वे वीणांदंडाधःस्थितं शब्दगंभीर्याय दारुमयं भांडं यच्चर्मणाच्छाद्यते तस्य वीणाग्रांते वक्रकाष्ठकृतेक कुभप्रसेवकौ वर्तेते इत्यन्ये॥ अस्या वीणायाः कायोऽलाबुदंडककुभसमुदायस्तंत्रीहीनः कोलंबकः क्रोडलंबमानः पृषोदरादिः एकं॥ न ह बंधने हलश्चेति करणे घञ् निबंधनमिति ल्पुट् द्वे यत्र तंत्री निबध्यते तस्योर्ध्वभागस्य॥ वाद्येत्यादि डमरुप्रभृतयः षट् वाद्यानां प्रभेदाः कापालिकयोगिवाद्यं डमरुः प्रसिद्धः डमरुरेव महान्मड्डुः॥ तुबुकइति यस्य प्रसिद्धिः डमिति शब्दमियर्त्ति मृगय्वादित्वादर्त्तेः कुः गणपाठे दैवगुणः डमरुः डुमरु जोसुह्रो मूल्मशीहृ चरिसे वितनि धनिमिमस्त्रिभ्य उः पृषोदरादित्वाज्जकारस्य डकारः मड्डुः॥ डिंडीति शब्दमिनोति अन्येषामपीति डः डिंडिमः डेंडुरितिस्य प्रसिद्धिः॥ झर्झ शब्दं राति आतइति कः झर्झरः झर्झ शब्दे अरन्नकरडक इति हड्डचंद्दः मृगादित्रियोगे तु रादिः वृषादित्वात् कलचूवाकुलकाद्गुणः मर्द्दलानीति मर्द्दल इति वा॥ पणु वैति स्तुतिं कुर्वत्यनेन पणवः॥ गायन पटहडच्यते णुस्तनो पृसीति घः पृषोदरादित्वाड्डफलो पेणत्वे च केचित्पणव इति वर्णयंती निभ द्रस्वामि सर्वधरादयः कौमुदीकाराद

रमिच्छेति। त्र्यश्रशङ्खेनापरगोमुखकुडुक्कादयः वाद्यविशेषाणां पृथक्पृथक्। नृत्यति शिल्पिनि षुन्। षित्वात् ङीषि नर्तकी॥ ल १

८ यस्त्वपणावइत्येवं यसश्लेषणक्रीडनयोः राधुल् नृतिखनिरञ्जिभ्य इति परिगणितत्वात् नृतेः षुन् लासिकास
मेइत्यनेनस्त्रीलिंगत्वं दर्शितं नर्तकोलासकः समाविति न्याय्यः पाठः अनयोः क्रियायोगोपाधिकतया वाच्य
लिंगत्वात् अथवा वाच्यलिंगत्वेपि कामचारात् स्त्रीनिर्देशः शिल्पिनि षुनि स्त्रीत्वे षित्वात् ङीषु प्रदर्शना
र्थमिति तु कौमुदीहृन्नर्तकर्यः॥ वीनि विलंबंते करचरणादयः प्रत्येकं गतिविशेषप्रदर्शनायात्र विलंबितं भा
वे क्तः। द्रवंति गच्छंति समुदायगतिप्रदर्शनार्थं करादयोत्र द्रुतं द्रुगतौ पूर्ववत् क्तः॥ विलंबितद्रुतयोर्मध्य
भवत्वात् मध्यं अ सांप्रतिक इत्यकारप्रत्ययः। एषु यथाक्रमं तत्वादित्रयं तत्वेकस्वरणादीनां तननं ततं
संपदादित्वात् क्विप् तद्योगादन्येषामपीति वः। ओघ इति उच समवाये घञ् पृषोदरादित्वात् घत्वं वा घनः
प्रागुक्तः विलंबितद्रुतमध्यानां नृत्यगीतवाद्यानां क्रमे ऐकैकं तत्वादिनामत्रये॥ अयं स्वर इयत्कालं गेय
इयत्कालं विलंबितमियत्कालं मध्यमिति बोधयितुमीदृशैर्हस्तैरंगुल्याकुंचनप्रसारणादिक्रियाभिर्न राम
र्मितत्वं गात तच्चं चेति कालक्रियायाः प्रमाणं तालः स्वच्छंपरादिः तल प्रतिष्ठाकरणयोः चुरादि घञ् एकं॥ गीत एउ

वाद्यपादसदिन्यासानां क्रिया [illegible] कालयोः साम्यं लयः लयनं तौ एरच् ३ अभिनयानामपीति कश्चित् एकं
॥ तांडेति तांडुना मुनिना प्रोक्तं कलापिवैशंपायनांतेवासिभ्यश्चेति णिनिः ऋ अपत्यस्य च तद्धितेऽनातीति य
लोपः तांडिन् नृत्यशास्त्रं तदस्यास्तीति अन्येभ्योपि दृश्यत इति वः एषां दसादित्वादिकारस्याकारः तांडवं तंडु
नां प्रोक्तं तांडवमिति तु स्वामी। तंडिना तोक्तं तांडवमिति तु कौमुदी। तांडवमस्त्रियामिति संबंधः। नट अवस्कं
दने ल्युट् नटनं। लस श्लेषणक्रीडनयोः भावे ण्यत् लास्यं। नृती गात्रविक्षेपे ऋदुपधाच्चेति क्यप् नृत्यं। नृ
त्तमिति पाठे भावे क्तः ल्युट् निर्वर्तनं। षट् नृत्यस्य॥ नृत्यादिकं तौर्यत्रिकमुच्यते नाद्यं वततं तुरीत्वरायां त्र
ह्लोर्णयं तुर हल्नि चेति दीर्घत्वं च तूर्यं मुरजादि तत्र भवं तौर्यं शब्दरूपं त्रयोऽशा अस्य त्रिकं संख्याया अति
शदंतायाः कन् तौर्येण त्रिकं तथा तृतीयेति योगविभागात् समासः तौर्यं च तत् त्रिकं चेति कर्मधारय इति
पंजिका। नटस्येदं नाट्यं छंदोगोक्थिकयाज्ञिकबह्वृचनटात् ञ्यः। द्वे नृत्यगीतवाद्यानां समुदितानां॥ भ्रे
ति पटघटेति दंडकात् तस्य कुसि धातोर्भाषणार्थस्य एर विश्वोः कुंसो भाषणमस्य बहुव्रीहौ भ्रकुंसादी

नामकारो वक्तव्य इति । अंशहृस्याकारः अकुंसः अनुवो कुंसनि कर्मण्यणि तु कौमुदी । हकोऽङ्खो । ह्यो गालव
स्येति वाङ्कस्य त्वेऽनुकुंसः अ॰ कुंसो । आकारो वेत्यन्ये तेन भृकुंसः भ्रूकुंसः भ्रकुंस भ्रूभृकुंस वदिति शब्दार्ण
वः ॥ स्त्र न हिंस्त्र अकुंसा इति सभेदा इत्यवंतः स्त्रीवेशधारी यः पुरुषो नृत्यति तत्र भ्रकुंसादित्रयं ॥ नाघोक्ता
वित्यधिकारः प्रागंगहारात् ॥ गणिका वेश्या नाघोक्तावज्जुका अर्जसर्जने वा कुलकामिक से
तु कन्निति उकन्नूरलो पश्च ॥ नाघोक्तो भगिन्याः पतिरावुत्तः ॥ विद्वान्पंडितो भाव इति वनेश्वा पसंख्यान
मिनिए ॥ जनकः पिता आवुकः अवरक्षणे वा कुलकात् ष्टक्षणि व्यासुको कण्णावित्युकण् अतउप
धाया वृद्धिः ॥ युवराजस्तु कुमारः भर्तृदारकस्य पुत्रो भर्तृदारकः द्वे युवराजस्य ॥ राजा भट्टारको देवस्त्राव
ट्भट्टपरिभाषणे क्विप् भट्टवासौ तारकश्चेति पृषोदरादित्वात् इत्वे द्वे ॥ तस्य राज्ञः सुता भर्तृदारिका एकं ॥
कृताभिषेकायां वद्धपट्टायां देवी श्रीमहादेव्यावासवदत्तादेरेकं ॥ इतरास्तु अकृताभिषेकास्तु राज्ञी मध्यादेके राम
कासु भट्टिनी पद्मावत्यादेरेकं ॥ शब्दार्णवे त्वयं विशेषः ॥ गणिकादुचरे रज्जुकेति नामरूपेण सा ॥ युवरा ९४

जस्तु सर्वेण कुमारो भर्तृदारकः। भट्टारको वा देवो वा वोध्यो भृत्यजनेन सः। ब्राह्मणेन तु नाम्नैव राजन्नित्यृषि
भिः स च। वयस्य राजन्निति वा वाच्यो विदूषकेण सः॥ अभिषिक्ता तु राज्ञा तु देवीत्यन्यास्तु भोगिनी। भट्टिनीत्य
परैरन्या नीचैर्गोस्वामिनीति सेति। अन्यस्य भट्टिनी भोष्ठेति तु रत्नकोषः॥ अत्रेति वधं नार्हन्त्युक्तो अब्रह्म
एयं वर्तनेब्रह्माण मर्हन्त्यर्थे दंडादिभ्यो यः तत्र साधुरिति वा यत्तनतो नञ् समासः। अवध्यायाज्ञार्थमिदमित्ये
के। एकं वधं नार्हतीति वचनः॥ राज्ञः श्यालो राष्ट्रियः राष्ट्रेधिकृतो। राष्ट्रावारपारान्तघ खाविति घः एकं॥ मा
ता ऽम्ब्येति शप्यते बाले रित्यं वा नत्तु कथं नातेनां वविहीनोस्मि वालभावे हमेव येत्यादावनाद्योक्ता वय्यं वा
दि प्रयोगाः तत्र जातो कादय आहुः नाद्योक्ता वज्जुकादयः एव प्रयुज्यंते नगणिका मात्रादयः इत्ययं निय
मः तत्र मातः किमसदृशं करणं वचस्त इति वेणीसंहारादौ मात्रादीनामपि प्रयोगात् तस्मादेवादीनां ना
घे प्रायशः प्रयोगाद्विधिरयं अज्जुकादीनां त्वन्यत्राप्रयोगान्नियमं फलतीति। एतदेवाह शद्वाणि वकारः
अथैषां रूपकाराण्युक्तौ विद्याम्यशेषतः। कासुचिन्नियमस्तत्र विधिरेव च कासुचिदिति॥ अथेति वाला

८४

श्री

कुमारीवासूः वास्यते प्रीत्या वासूः वसने ण्यंतात्। वासूरित्याप एके॥ आरात् पापेभ्यो यात आर्य्यः ष्टषोदरादिः
आरणीयो वा गम्यो वा मर्षणात् सहनात् मारिषः मूर्द्धन्यषः मारिषः शाकभिद्यार्य्यनाद्यो क्तो द्रुमिभाषि
तइति मूर्द्धन्यांतेरभसात्। मार्षस्त्व। आर्य्ये मारिष मार्षकाविति शब्दार्णवात् एके मान्यस्य साधोरिति या
वत्॥ ज्येष्ठा भगिनी अत्तिका अत्तामाता सेव। अत्ति के ति द्वितकारपाठ इति सर्वधरः। अंतिके निकटे
नाद्यस्यो त्वया ज्येष्ठस्वसर्य्यपीति नानार्थकोषदर्शनात् द्वितकारपाठः प्रामादिकः इति कलिंगद्वयः।
वयं तु अत्तिका चांतिकात् थैति द्विरूपकोषात् द्वितकारपाठोपीत्यावस्महे एके॥ नियतं स्थाने निष्ठा
निःशेषेण वहनं निर्वहणं। मुखं प्रति मुखं चैव गर्वो विमर्श एव च। तथा निर्वहणं चेति नाटके पंच संध
यः निर्वहणमित्यत्र रेफरहित हकारो वकार एव सरेफः। यांति निर्वहणमस्य संसृतिक्लेश नाटक विडं
बना विधेरिति माघच्छंदोभंगात्। समो समार्थे द्वापं च संधिसमाप्तेः प्रस्तुतकथासमाप्तेरिति यावत्। य
थैतदत्तुद्वैतो शब्दार्णवः निर्वहणं तु निष्ठा स्त्री संहारस्त्व समापनइति अत एव निर्वहणं रसस्यास्खलन

मितिकेषांचिद्दर्षामर्षः॥ हंडेतिनाट्योक्तौनीचंप्रत्याह्वानंहंडेचेटींप्रत्याह्वानंहंजेसखींप्रत्याह्वानेहलात्रय
मेवाय्यंयथाहलाशकुंतलाइत्यादिसखीपर्यायोहलाशब्दस्तावंतःवालावासःसखीहलेतिस्त्रीकोडे
वोपाततः॥ अथमाढासीसखीनामाह्वानस्यक्रमेणकेकं॥ अंगेति अंगस्यस्थानात्स्थानांतरनयनमंगहा
रः वृश्चिकभ्रमरादिद्वात्रिंशत्प्रकारोंगुल्यादिविन्यासरूपोंऽगहारइतितुकौमुदी अंगहारस्त्वंगहारिर्द्विआ
दिमांविकांविकातिशाद्वार्णवःहे॥ व्यंजकीतिव्यंजकः आभिमुख्यंनीयतेऽर्थोऽनेनेत्यभिनयःवाचिकांगि
काहार्यसात्विकभेदाच्चतुर्विधः॥ देहकृतक्रोधादिभावाभिव्यंजकस्य॥ अंगेननिर्वृत्तमांगिकं॥ विक्षेपा
दिसत्वेननिर्वृत्तंसात्त्विकमध्यात्मादित्वाट्ठञ्निर्वृत्तेऽक्षद्यूतादिभ्यइतियोगविभागाद्वा॥ सत्त्वंमनोगुण
आशयोवातेननिर्वृत्तःसात्विकः॥ यदाहसत्त्वोत्कटेमनसियेप्रभवंतिभावास्तेसात्विकाइति॥ स्तंभःस्वे
दोयरोमांचःस्वरभंगोथवेपथुः॥ वैवर्ण्यमश्रुप्रलयइत्यष्टौसात्विकागुणाः॥ प्रलयोमूर्छा॥ अंगनिष्पा
दितम्॥ विक्षेपादिभावनिष्पादितरोमांचादिकयोःपृथक्पृथक्॥ अंगेतिरत्यादयोभावाअनुक्रियमा

णाः सामाजिकैरस्यंत इति रसाः यदाह विभावैरनुभावैश्च युक्तो वा व्यभिचारिभिः। आस्वाद्यत्वात्प्रधान
त्वात्स्थाय्येव तु रसो भवेदिति। यद्यपि बीभत्सल्यं शांतं चेति रसा दशेति नाम निधानं तथापि धर्मार्थकामानां
श्रृंगारभेदत्वाद्वात्सल्यशांतयोश्च तच्छरीरत्वात्तद्ग्रहणेनैव ग्रहणमिति न पृथक्निबंधनमिति कौमुदी
[illegible] वत्सलः पुत्रादिस्नेहत्वान्नातिरिच्यत एव। शांतस्त्वलौकिकत्वान्नोक्तः च शब्दसंगृहीतस्त्विति स
र्वधरादयः बीभत्सरौद्रौ चेति पुंलिंगा पाव इह युक्तः श्रृंगारवीरबीभत्सहास्यरौद्रभयानकाः इति शब्दार्ण
वादौ दर्शनात् त्रयोक्तौ लोऽद्भुत इति हेतुर्भावः श्रृंगारः। दानधर्मयुद्धेषु जीवानपेक्षोत्साहकारी रसो वीरः।
असंभावितमन्यैर्नारिकागमनादिजो विस्मयः। क्रोधाड्डाकिसादिभयजन्यो भयानकः। घृणाकरपूयव
सादिजो बीभत्सः। सर्वाभिभाविनो रौद्रः यथा रावणचरितादि। करुणहास्यौ तु सुप्रसिद्धौ। श्रृंगारादीनां प्र
त्येकं रस इति नामैकं॥ श्रृंगस्तूत्तममिथुनं श्रृंगं काममारातीति वा श्रृंगारः। उज्ज्वलो वेशेनौचित्येन वलक्ष्य
मेतन्न त्वेतौ श्रृंगारपर्यायाविति तु भट्टादयः श्रृंगारस्यैव नामत्रयमिति तु कौमुदी तथा च नानार्थे श्रृं

राम
५६

दीप्ताग्निशृंगार आषाढे शुद्धमंत्रिणि। उद्दालो दीप्तिशृंगार विशदेषु विकासिनीति। उदित उत्साहो वीरस्य स्थायी
भावः स्फीततयैव आद्य इत्यनेन सर्वरसलक्षणं कटाक्षितं। इति वीररसस्य॥ शोकस्थायिभावः करुणो रसो धर्मि
द्वारेण कः कष्टदारिद्र्यपरनष्टः करुणः रसान्नि प्रायेषु मानुभावे स्त्रीके सुखं लक्षणं द्विमूलविशुद्धादित्वात् के
दृषोदरादिरित्यन्यः। यदा कल्पणयोगात् धर्मिदृष्टिस्तदा कारुण्यं ब्राह्मणादेराकृतिगणत्वात् घ्रियं नेऽनया
घृसेचनेवाकुलकान्त्रकः। घृणा। कृपेः कृपाभिदा घृडिः कृपेः संप्रसारणं दयतेऽनया दयरक्षणेभिदाघ
ङ्। अनुकंपतेऽनया अनुकंपा गुरोश्चेत्यकारः। अनुक्रोशं तिसमडः स्वामिवत्यनेन अनुक्रोशः घञ् सप्तक
रुणस्य॥ हसो हासो हास्यं च स्थाय्येव तु रसो भवेदिति भावरसयोः पर्यायत्वे न घुनति स्वन हसो वेत्य पृषघञ्
ण्यन्तः ध्यात्वर्थनिर्देशो राबुलपितत्रं हं सो हसो हास्यं घर्घरं हासिका स्त्रियामिति शब्दार्णवः। त्रीणि॥ बीभत्सं
विकृतमिदं हृद्यं विष्णु। वधेर्निन्हायां सन् बीभत्सा सास्य च अर्शआद्यच् बीभत्सं जुगुप्सा प्रभवत्वात् विकृतं
पदाङ्कुः निष्ठा कामजउद्वेगी क्षोभणो रुधिरादिजः। बीभत्सो द्विविध इति तद्वति त्रिलिंगं प्रज्ञादित्वाद्वैकृतो

पिविकृतो वैकृतोथाय हायएयामय्य हायणमिति शब्दार्णवात् हृयमिनयोः पर्यायतामाह। हे वीभत्सस्य।
वीति प्रागुक्तभावरसयोः पर्यायत्वं अद्भुतस्य विस्मयस्थायिभावात्मकत्वात् विपूर्वः स्मिङ अद्भुतार्थः विस्म
योदंत्यमध्यः सात्पदाद्योरिति षत्वप्रतिषेधात्। अत्र आश्चर्यार्थेऽव्ययं तस्य भवनमद्भुतं अदिभुवोडुतच् आ
वरणीयमाश्चर्यं। आश्चर्यमनित्य इति साधु। वित्रंपूर्वसुक्तं चत्वार्यद्भुतस्य।। भैरवं भीरोरिदं भैरवं दारयति वित्र
स्तद्वइति उरनन् दारुणं। भीषयति भीषणं। विभ्यत्यस्माद्भीष्मः। भियः सुग्वेति मक्सुकौ। तथा भीमदयोऽपादान
इति भीष्मभीमौ साधू इति सर्वधरः। घुरभ्रमणे घुरेर्डीरः। घोरं। घुरभीमार्थेऽचिवा घोरं। हंते घूरच्चेति अच् घु
रजादेशः घोरमिति कौमुदी। विभेत्यस्मादिति भयानकं। आनकः शीभियः। भयं करोति भयंकरं। मेघर्त्तिभये
षुखञ्च इति खच्। प्रतिगतं भयेन प्रतिभयं प्रादिसमासः। नव भयंकरस्य।। रुद्रो देवतास्य रौद्रं शृंगारो विष्णुदेवः
स्याद्धासः प्रमथदैवतः। करुणो यमदैवस्तु स्याद्रौद्रो रुद्रदैवत इति भरतः। उग्रमुक्तं शिवे। हेमहतः क्रोधस्य।। अ
मी अद्भुताद्या उग्रांतास्त्वत्तुर्दश रसे पुंलिंगाः ततः स्त्रियां रौद्रीएवं भैरवीत्यपि।। दरेत्ति दीर्य्यत्यस्माद्दरः हृभये अप् घञि

सीम

राम एः

त्रासः। भीतिः। त्रिचेतनात्साहचर्यात्स्त्रीः स्त्रीसंपदादिः। साध्वसस्य तिसाध्वसं अचतुअज्विभौभयादीनामुपसंख्या
नेन नपुंसकत्वादिति द्वन्द्वार्थमित्यन्ये भयं भिदा घञ्ङिड्ड्यङि भियापि। स्याद्दर्त्तनमृतीया च गर्हा चाथ भयं भिया।
त्रासोत्र सौ दरो भीतिरातंको भीस्त्वसाध्वसमितिशब्दार्णवात्॥ षड्ङूयस्य॥ मनोविकारो रत्यादिर्भावः भावयति
करोति रसानुभावः। तथा च भरतः नानाभिनयसंबंधाज्ञावयंति रसानिमान्। यस्मात्तस्मादमी भावा विज्ञेया ना
ट्ययोक्तृभिः। भावाश्च द्विविधाश्चैव स्थायिनो व्यभिचारिणः। तत्र स्थायिनः। रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं
तथा। जुगुप्साविस्मयश्चेति स्थायिभावाः प्रकीर्तिताः। व्यभिचारिणस्तु। निर्वेदग्लानिशंकाख्यास्तथासूयाम
दश्रमाः। आलस्यं चैव दैन्यं च चिंता मोहो धृतिः स्मृतिः। व्रीडा चपलता हर्ष आवेगो जडता तथा। गर्वो विषाद औ
त्सुक्यं निद्रापस्मार एव च। सुप्तं विरोधोऽमर्षश्चाप्यवहित्थमथोग्रता। मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव
च। त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः। त्रयस्त्रिंशदमी भावाः प्रयांति रससंस्थितिमिति॥ एकं मनोविका
रस्य॥ भावस्य सूचको गुणक्रियादिरनुभावः भावाननुभावयत्यनुभावो मुःखरागादिः तदुक्तं अनुभावस्त्वभि

नयः पश्चादनुप्रकाशनादिति व्यभिचार्यादीन्याहुः द्वे भावप्रतिपादकस्य रोमांचादेः॥ गर्व इति गिरति गर्वः स्पृ
स्पृहृभ्यो वः गर्वमाने घञि गर्वः। अभिसर्वतो मानोऽभिमानः। अहं प्रधानं कारोऽहंकारः त्रीणि गर्वस्य॥ मत्समो
नास्तीति मननं मानः। चित्तस्य समुन्नतिः चित्तसमुन्नतिः। द्वे प्रणतियोग्यमपि प्रतिचित्तोत्कर्षप्रत्ययस्य॥ अना
दर इत्यपू नञनादरः। परीभव इत्यपूर्घञोः परिभवपरिभावौ तिरोंतर्द्धौ परिभवेप्युपचारात् अतो नतिरोंत
र्धौ वि॰ तिग तित्वाभावात्तिरसोन्यतरस्यामिति पक्षे सत्वं नास्तीत्येके। अन्येत्वाहुः योयेनाभि[illegible]स तस्मात्
काय वाग्मनसामन्यतमेन व्यवधीयत एवेत्यन्वार्थं तर्धिर्गम्यत इति सत्वं वा स्यादेवेति। भा[illegible] त्रिकृत्वत्र
गत्योरिति नानुवर्त्तयत्येवेति। विकृत्यनादिरेहणं रीढा रिहेः क्तेः टत्वं ष्टुत्वं ढलोपदीर्घत्वानीति स्त्रीत्वं लोकाश्र
यत्वात्। अवमाननावर्त्ते स्तु गामे। अवहेलनमवहेलं हेडृ अनादरे घञ थैकः डलयोरेकत्वस्मरणं हेलाव
हेले च नसुष्ठु ऊहणमिति लक्षणया वज्ञा गम्यते यद्वा धात्वनामनेकार्थत्वेन असूनामुक्षणं तापोयं च तद राम
स्तूक्षणं दंत्यसं दीर्घमध्यं न विद्यते शोभनः क्षणो यस्मात्तत् असुक्षणं ह्रस्वमध्यमपीति पंजिका। सूक्षीश्च ९८

नादरेऽक्षोकारात्परोऽत्र रेफः सो दंत्यः ततः संपूर्वान्ल्युट् । संपुर्क्षणमनादरे इति त्रिकांडशेषे निधानुप्रदीपः
एवं चाकारादित्वमिह प्रमाद इत्याहुः तत्रारीढावज्ञा योषित्यसूर्क्षणं मा एक्के तिरस्कार इति रत्नकोषादावपि
दर्शनात् । हज्ज चंड स्वरसस्य अकारादित्व एवेति । एवं चेह पूपापूपवन्नजः प्रकृत्यर्थे नेति तु कौमुदी वस्त
नस्कस्ऋक्षे आदर इति पाठः । नर्तेस्ऋक्षेदिति प्रयोगात् तत्त्वसृक्षीमिति तैत्तिरीयब्राह्मणे च्च स्यष्टं वेदं माघ
वर्षेथेनव परिभवस्य ॥ मंदेति मंदमकुमत्र मंदाक्षं । ह्रीलज्जायां संपदादित्वात् क्विप् ह्री ॥ त्रपूष लज्जायां षि
त्वादङ् त्रपा एवं गुरोश्चेत्यकारे व्रीडा व्रीड ज्जाद्यमभजन्मधुपासेति माघः ॥ गंडूषगर्जभुजजागरहारकीलुब
लाकुटोरभसवर्त्तकगर्द्दभशृंगाः ॥ व्रीडादयश्च वरटश्च वराटकश्च उल्लेखवाणकरेकाश्च समामयावेति स्त्री पुं
लिंगाकथनेरत्नमाला व्रीडो ह्रीवेत्रपालज्जेति ह्रीपर्याये च तन्नैवोक्तत्वात् अलजी अलस्त्री व्रीडेलज्जा
व्रीडावत् पेचलज्जायां ॥ सालज्जाश्च न्यतः परस्माघ दिस्यात्तदा पत्रपा । ह्रीर्लज्जा यत्रपा व्रीडेति रत्नकोषा
तड्ढी मात्रेयपत्रपोक्ता । एकं पित्रादेः पुरतो जानलज्जायाः ॥ कम्बूषः षित्वे पिवाकुलकान्त्वि त्रिदर्शातिः वस्त

९८

टी.
९

नस्क दिवादेरपि स्वात्क्षाति:॥ खादेस्कपित्वात्क्षमा तिजे गुप्तिज्किद्भ्यो निंदाक्षमाव्याधिप्रतीकारेष्विति सन्‌तिति
क्षा। द्वे क्षमायाः॥ अभिवारे ऽभिध्यानमभिध्याकर्मण्यङ्। आभिध्या वा। परस्वे विषयेण चौर्यादिना स्पृहेत्युच्ये
दोषचिंतापूर्वकं परस्वे लिप्सेत्यर्थः॥ विषयप्रार्थनाभिध्येति स्वामी परस्वविषयितया स्पृहा विषयिस्पृहाभिध्यो
च्यते। विषयस्पृहेति पाठे विषयेण चौर्यादिना स्पृहेत्यर्थः। जिघृक्षामात्रेऽप्यभिध्येति कश्चिदिति तु कौमुदी॥ अहे
ति परासुदयासहिष्णुता ऽक्षांतिः। ईर्ष्यधातोरीर्ष्यायां नादीर्घादिः द्वे॥ वैरेणार्थदानादिभिर्गुणेष्वपि दंभकृत्वादिति
रूपदोषारोपणमसूया। असूया त्वभ्यसूया चेति शब्दार्णवः। अस्त्यन्तुकं ड्वादिः। एकं॥ वीरस्य कर्म वैरं मैथुनिकयो
रिति निर्देशाद्गुण इत्यमीर्ष्यासूयाद्वेषाणां भेदात्तु द्वेषो नास्यादसूयेर्ष्येति मालाकारो भ्रांतः॥ त्रीणि वैरस्य॥ मन्य
ते मन्युः निङ्नि दसिभ्यो युः। मन्युः दैन्यार्थः। घञि शोकः। शुच शोके। संपरादित्वात् क्विप् शुक् चांता। त्रीणि शोकस्य॥
पेति। घञ्। पश्चात्तापएवमनुतापः। उपसर्गस्य घञीति वा दीर्घः। विप्रतीसारः पक्षे ह्रस्वोपि ज्ञापि चेतसि सविप्र
तिसार इति माघः। त्रीणि किंचित्कृत्वा पश्चात्तापस्य॥ कोपः भावे घञ् एवं क्रोधः। क्रोधनोऽमर्षणः कोपीति विश्व

वैर
राम
९९

कोपनं

ष्यनिग्रेवक्ष्यमाणत्वात्।मृषतीति क्षायां घञि नञि अमर्षोऽक्षमादिः।रोषः किमथ्यमर्षोऽस्तु येभ्यः शायन इति भारविः।
वधूरमर्षीदिति माघः।अन्येषामपीति दीर्घत्वे दीर्घादिरप्पीति हङ्कचेङ्ग।।निरुद्योगं निरामर्षं निर्वीर्य्यमरिनंद
नमिति विशाखः।प्रतिहन्यतेऽनेन प्रतिघः।परोघ इति वाङ्कल्पादप्युघत्वं च प्रतिहन्तीत्यन्यत्रापीति डे प्रतिघो
न्यक्कादिरिति तु कौमुदी।रुषक्रुधौ।क्विपि टापि कोपो भामः।क्रुधा रुषेति शाह्वार्णवः।सन्तकोपस्य।।शुचावितिशु
चौशुद्धे इत्यर्थः।भाषितत्तुस्कंदुं वदिति शुस्त्वात्तु मू चरित्रमात्रे पिशीलं शीलं स्वभावे सद्वृत्त इति दर्शनात्।शी
डोश्चकुल झ्वल ज्वाल नन्वालत्र।।शीलमर्हं वादिः।शीलसमाधाने इत्युपधेति केवा शीलउपधारणे एयंता
देरा विवा।केवलमपि चरितं सुशीले।निष्ठा च शीलं चारित्रं चरित्रं चरितं तथेति रत्नकोषात्।अर्तिलूधूइती
त्रेचूचरेर्तिस्त्रेतीत्र विचारित्रे एकं।। घञ्युन्मादः।चित्तविभ्रमश्चित्तानवस्थितिर्भूताद्यावेशात्कृद्धे उन्मादस्य।।
प्रियस्य भावः प्रेमा इमनिचि प्रियस्थिरेति प्रादेशः नाशुमात्र।हार्द हृदयस्य कर्म युवादित्वादण् हृदयस्य हृ
ल्लेखेत्यादिना हृदादेशः।प्रेति प्रेम।प्रीङो मनिच् प्रेमेति भट्टः।प्रेमपश्यति भयान्यपदे पीति भारविः।स्निहे र्घ

न्तु स्नेहः पंचस्नेहस्य॥ अथे निदोहं पूरणं ददा निदोहदमिदं त्विच्छामात्रे विशेषेण तु गर्भिण्या जेन्न मेच्छायां प्रयु
ज्यते। इषरिछेत्यनेन निपानादिच्छा। कांक्षा गुरोश्चेत्यकारः आकांक्षापि भिदादेराकृतिगणत्वान्न स्पृहा कांक्षे
ति वत्त दीर्घोता। तर्षणं तद्दृजित्तृष पिपासायां क्तिपूत्तद्दृषोता। नवपीत्येके तेन तृषापि न कस्वेति प्रयोगः॥ वां
छा कांक्षेतिवत्त लिप्सा अप्रत्ययादित्यकारः। मन एव रथो दूरगाम्यत्र मनोरथः कामोऽभिलाषस्तर्ष इति घञ्
सोः द्वादश इच्छायाः॥ सतर्षो महानुलालसा ललई प्सायामोणादिकोऽसप्र। दंत्या। लालसस्त्र स्त्री निर्दे श
आवेदनतावसूचनार्थः॥ एकं॥ उपाधिरिति समीप आधानुपपन्न आधिर्वेति उपाधिः॥ धर्मस्य चिंतो हि वे धर्मादि
मे चिंतायाः॥ मानसी व्यथा आधिः आधीयते चिंताऽनेनाधिः एकं मनःपीडायाः॥ चिंता चिंति पूजीत्यादि ना
ऽङ्। अत्रत्यये कार्ये चिंति पूजीत्यङ् विधाने गुणभावार्थं तत्सामर्थ्यान्निलोपाभावोपीति चिंतियाइत्यप
तिस्मृतिः क्तिन् चेता ध्यै चिंतायाम् ल्युट् आध्यानं त्रीणि स्मरणस्य॥ कविशेषे उत्पूर्वात्कुरोश्चेत्यकारः उत्कं गाः क राम
लेः क्तान्तादिभ्यो वुन् उत्कलिका स्त्रीत्वेनापि साम्यं उत्कं गदि हृदयं कामादिजस्मने॥ चिंता तु स्मृतिराध्यानं स्मरणं १००

सस्पृहे पुनः। उत्कं गोत्कलिकेमस्मिन्नभिध्यानं स्मयोरपीति शब्दार्णवः। आध्यानमप्युत्कं गयामित्येतत्तथा। का

शिकायामाध्यानमुत्कं वा पूर्वकं स्मरणमिति द्वे॥ उत्साह इति उत्साहाध्यवसायो घञन्तो द्वे उत्साहस्य॥ स

उत्साहः प्रकृष्टशक्तिभाकु वीर्य्यं वीरे साधुस्तत्र साध्वितियत् अतिशयशक्तिवीर्याद्रितित्वमरमालायां ख्या

तं एकमतिशायिताध्यवसायस्य॥ केमूर्द्ध्रिपट इवा[illegible] दकः कपटः कं ब्रह्माणमपि पटति गच्छतीति व्याख्या

ति। विशेषेण जंति क्षिपंत्यनेन अजगतिक्षेपणयोः हलश्चेति घञ् जियाजः। एवं दम्भ्यतेऽनेन दंभः उपधीय

ते आरोप्यते स्फटिके जवारागइवानेन उपसर्गे घोः किः उपधिः छाद्यते नेन रूपं छद्म। नांत। कूदेर्मनि

वृरस्मनन्नवन्रुक्त्रिपृसुचेति ऊस्वः। कितवस्य कर्म कैतवं युवादित्वादण्। कुत्सिता सृतिः गतिः हिंसार्थी

कुसृतिः। निकृष्टा कृतिर्निकृतिः पराभीष्टं निकृंतनीति। कृते र्निश्चीवान्तरङ् कृकृष्यादिभ्य इतीक्। शठ कै

तवेऽच् तस्य कर्म शाठ्यं नवच्छ्मनः। कसृत्यादित्रिकं तु वित्तकौटिल्यस्येत्यन्ये। कपटादिषट्कं वंच

नाफले तु कसृत्यादित्रिकं तु हिंसार्थमिति तु सर्वानंदः पंजिकाकारश्चापेति प्रमादो भावे घञ्। अनव

100

धानेतिबहुव्रीहेस्तल्॥ अतोऽनवधानं च वाचकं द्वे अविमृष्टकृत्यस्य॥ काविति कुत्सितं तनूलयतीत्य
त्कृष्टषोदरादित्वाद्वर्णागमो हकारः कुतूहलं प्रज्ञाद्यणि कौतूहलं॥ तुज हिंसायां कुं तुजति मूलवि
भुजेतिकः न्यंक्वादित्वात् कुतं कुतुकं प्रज्ञाद्यणि कौतुकं च त्वार्यपूर्वं वस्तुदिदृक्षाद्युतिशयइतिसु
मृतिःफलनिरपेक्षा विकीर्षितस्येति केचित्॥ स्त्रीणामिति शृंगारभावो रतिः तज्ज्ञाः स्त्रीणां चेष्टाविला
सादिका हावशब्देनोच्यंते हूयंते रागिणोऽनेन ह्वहू हवने वाकुलकादधिकरणे घञ्यद्वाहभरतः अलंका
राश्चनाद्यास्सैंवेर्याभावरसाश्रयाः॥ यौवनेऽभ्यधिकाः स्त्रीणां विकारा वक्त्रगात्रजाः॥ देहात्मकं भवेत्सत्त्वं
सत्वाद्भावः समुत्थितः॥ भावात्समुत्थितो हावो हावाद्धेला समुत्थिता॥ तथा॥ हावश्शृंगारभावाप्तो व्यासे
सोत्कस्मितवीक्षितं। शृंगारशोधिमा हेला   ॥ विभूवो ह्वसेर्घञ् विलासः तत्र प्रियसमीपगमने यः
स्थानासनगमनविलोकितेषु विकारोऽकस्माच्च क्रोधस्मितचमत्कारमुखविज्ञावनं स विलासः
वागनो विवानं विभुः गतिविशेषः अपष्ठ्वादयहतिकुः उच्यते समवैत्यचहल स्वेतिघञ् विवोराकः स्थो

नं विब्बोकः अभिमतवस्तुप्राप्तावपि गर्वादनादरः सापराधस्य च स्रक्चंदनादिना संज्वसनं ताडनं च विब्बोकः विस्रांति
घन्न्मदरागहर्षजनितो विपर्यासो विभ्रमः यथा निमित्तमासनादुत्थायान्यत्र गमनं प्रियारब्धकथा
मा छिथ सख्यासहालापनं मुग्धेव हसितं क्रोधौ तुष्पादीनां याज्ञास हसैव तत्परित्यागः वस्त्राभरणमा
ल्यानामकारणतः खंडनं मनं नं वेतियोषितां यौवनजो विकारो विभ्रम इत्येके ललई स्यायो ललविला
सेवाभावेत्तः डलयोरेकत्वं ललितं सुकुमारविधानेन भ्रूनेत्रादिक्रियासविवकरचरणांगन्यासो ल
लितं तथा चरणनिपातरणन्नरणन्नूपुरमसृणसंचरणं रेखाविशेषस्थितत्रिवलिभंगसंस्थानसमु
ल्लसितभुजस्तुरः स्थलप्रसारणान्त द्विगुणाष्टशुक्कतं स्तनस्तवकं स्कंधासक्तैककुंडलसमुल्लसितभ्रूसा
वीक्षितविलोकितमिति प्रियं प्रतिभावाविष्कृतं ललितमित्यन्ये। हिलहावकरणो अचूटापूहेलासुर
ते प्रौढेच्छा हेला। लयो लीला। ली [illegible] ला। लीङ् श्लेषणे ष्टषो दरादिः अलब्ध प्रियसमागमयास्ववित्नवि
नोदार्थं प्रियस्य यावेशगतिदृष्टिहसितभणितैरनुकृतिः क्रियते सा लीला। अमी इति शब्दः प्रकारे ते

द्योः

नएवंप्रकाराः विच्छित्त्यौगृह्यंतेनाट्ये क्तानाटकरत्नकोषे। लीलाविलासोविच्छित्तिर्विभ्रमःकिलकिंचितं।
मोट्टायितंकुट्टिमितंविव्वोकोललितंतथा। विहृतंचेतिविज्ञेयाः स्त्रीणांचेष्टाःस्वभावजाः॥ आभरणवि
लेपनादीनांकुतश्चित्प्रियापराधादीर्ष्यया ऽनादरेणन्यक्तानांसखीनांप्रयत्नाद्धारणं विच्छित्तिः प्रियेण
दत्तंप्रीतिनिबंधनेस्वल्पमपिभूषणं विच्छित्तिरित्यन्ये विच्छित्तिश्चविशिष्टाछित्तिर्भंगिरित्यर्थः किलेति
व्याजेनकिंनामनासंज्ञितमत्रेति किलकिंचितं एषोदरादिः इष्टजनदर्शनहर्षवशात् शुष्करुदितहसि
तत्रसितक्रोधश्रमाभिलापानांसंकरकरणं किलकिंचितं। मोट्टनंमोट्टः घञ् लोहितादित्वात्प्यषंतात्भावे
क्तः मोट्टायितं प्रियकथासुसागान्(?)गाङ्गभणंकर्णकंडूयनेचमोट्टायनंकुट्टनंकुट्टः घञ् तेननिर्वृत्तंभा
वप्रत्ययांतादिमल् कुट्टिमंततोण्यंताज्ञावेक्तः कुट्टिमितं एषोदरादिः॥ सुरतेषुगाढपरिपीडनेकेशस्तना
दिग्रहणे चहर्षात्सुखेपिदुःखाविष्क्रियादुःखेपिसुखाविष्क्रियाकुट्टिमितं। शेषोभरतशास्त्राद्बोद्धव्य
इहतुग्रंथगौरवभयान्नलिखितः॥ द्रवेतिद्रवतिहृदयमनेनद्रवः अपू। किलन्त्यनेनकेलिः किलक्रीडा

यांकेल्टचलने । खाः सर्वधातुभ्य इन्निति नूकेली । ति स्त्रियामपि केली श्रुतज्ञानगुणान्निपीयेजिनै सधात्वपरिह
संत्यनेन हलश्चेति घञ् उपसर्गस्येति वा दीर्घः परीहासः । क्रीडनं क्रीडेति गुरोश्चेत्यकारे टापि । लीला प्रा
गुक्ता । इन नये सर्वधातुभ्यो मनिन्निति मः । षड्परिहासस्य क्रीडामात्रस्येत्यन्ये ॥ व्येनिव्याज उक्तः व्याजोऽन्नस्व
रूपाच्छादनं यथा ध्यानव्याजमुपेत्य चिंतयसि कामिनीं ति । अपदिश्यते अपदेशः अतः ङूपस्य ताडूप्यं
क्रीडाद्यर्थं वंचनयेत्यनः पूर्वोक्तव्याजः परद्रोहफलः तथा च पंजिकाकपुंदार्थो व्याजः परद्रोहफ
लः अपदेशार्थस्त्वन्यद्धृदिस्थान्यार्थमनुष्ठानं यथा ज्वलनक्रीडामपदिश्यार्थयातीति । तद्विवलज्ञ
नेलल्यैयदंतं । निर्यकारं वे । संख्यायां च न नालदं क्लीवं व्याजशरव्ययोरिति मूर्द्धन्यांते ष्णुरभसः । छ
लछ्नमनिभादयो ष्यत्रोपचारात् त्रीणि ॥ क्रीडेति क्रीडा व नखेला कुर्द क्रीडायां ल्युट् वोरुपधाया इति
दीर्घः कूर्दी दीनां न भवति स्फुर्जेति ल्विगादि ति धर्मदासः स्फूर्जे निदीर्घो त्वचारणाह्वानेर्वोरिति विधेर
नित्यत्वमिति पूर्णचंद्रः । अपरे तु दीर्घमिच्छंतीति सुभूतिः । कुर्दनमित्येके दीर्घाभावस्तु चिंत्य इति स्वा

मी।त्रीणि वालानां कंदुकादिखेलायाः॥ घर्म इति घरत्यंगमनेनेति घृ क्षरणदीप्त्योरित्यतः घर्मग्रीष्मा
वमा इति निपातितः॥ निदह्यतेनेन घञि निदाघः न्यंक्वादिः। स्विद्यत्यनेनांगं घञि स्वेदः। प्रस्वेदोपयत्र
त्रीण्यंगजलस्य॥ प्रलय इति यइति प्रलीयतेऽनेनेति एरच् प्रलयः सात्विको भावो मूर्छेत्यर्थः हर्षशोका
दिभिश्चेष्टानाश इत्यर्थः॥ अवेति अंगविकृतस्य रोमांचादेराच्छादनाद्बहिः स्थितत्वमवहित्था। स्त्री
डीऽऽव पूर्वान्नाम्यादयइति यञ्छहिरादेशश्चेति सुभूतिः अवहित्थमप्याप्यतेति भारतात् क्लीवमपि
द्वे आकारवंचनस्य॥ संमाविति। भयादिना सम्यग्विजंते चलंत्यनेन घञि संवेगः एवं संभ्रमोपि द्वे आ
त्वर्यपरचक्रादिदर्शनात्संत्वरतायाः॥ स्मादिति कंई प्रकर्षेणासनंगमनमुत्प्रासः आधिक्यं प्रस
गतिदीप्त्यादानेषु तत्त्वसहितः सोत्प्रासः ऽषिको महान् हासः आच्छुरितकं छुरच्छेदने भावे क्तः स्वार्थेकः आ
समंतादविछिन्नमित्यर्थः उपहासादिप्रयुक्तस्य सशब्दहास्यस्यैकं॥ सहासो मनागल्पः सन् स्मितं स्या
नूई षद्विकसितैर्दंतैः कटाक्षैः सौष्ठवान्वितं। अलक्षितद्विजद्वारमुत्तमानां स्मितं भवेत्॥ एकं॥ मध्य

मद्दतिस एव हासो मध्यमो नात्युच्चैर्नातिनीचैः सन्नु विहसितं स्यात्॥ आकुंचितकपोलाद्यं सस्वनं निस्वनं
तथा। प्रस्तावोत्थं सानुरागमाहुर्विहसितं बुधाः॥ एकं॥ रोमांचमंचनं रोमांचः घञ्। न क्वादेरिति योगविभागात्
चजोरिति न कुत्वमिति माधववृत्तिः। रोमाणि हृष्यंत्यनेनेति रोमहर्षणं पुलककंटकरोमविक्रियारोमोद्गमाश्च
त्रैवृद्धे रोमोद्गमस्य॥ क्रंदितमिति भावे क्तांतं त्रीणि रोदनस्य॥ जृंभो मुखादिविकासः घञ् त्रीणीति अप्रत्यये
तु जृंभा स्त्री जृंभं तु अज्विधौ भयादिपाठात्। जृंभणं ल्युट् द्वे हांवीतिख्यातायाः॥ वीति विशेषेण प्रलंभनं वि
प्रलंभः घञ्। एवं विसंवादोपि। द्वे मिथ्याख्यानं वंचनस्येति यावत्। अंगीकृतासंपादनस्येति तु सर्वानंदः॥
रिगि लिगि दंडकात् ल्युटि रिंगणं एवं स्खलनं स्खल संचलने द्वे धर्मादेः स्खलनस्येति सर्वानंदः। बालानां ह
स्तपदाभ्यां चलनं रिंगणं स्खलनं तु पिच्छिलादौ पतनमिति यद्यपि भेदस्तथाप्यभेदोपचारेण समेद्गुक्त
मिति पंजिका॥ स्यादिति नियतं द्राती द्रियाण्यस्यां द्रा कुत्सायां गतौ ति यत आतश्चोपसर्ग इत्यङ् निद्रा
शीङो भावे ल्युटि शयनं। स्वपे घञि स्वापः। स्वपनं स्वप्नः स्वपो नन्। संविशंतीन्द्रियाण्यत्र संवेशः। सुप्तिरित्यत्रकरी

तिसुप्तिर्जनदर्शनात्ति थिमिति नेत्रयोः पंच निद्रायाः निद्रागतं श्रांतं चरितं स्यापि॥ तंद्रीति इंद्रियाणां तननं तंद्रात्य
स्यां॥ तंद्रु धातोः सौत्रान्मूर्छार्थात् तंद्रेरिडी तो इति द्रुस्वकारप्रत्यये तंद्रिः ततो ङीषि॥ विभज्यने क्तं दिवमस्तं तंद्रिणे
तिभार विः दीर्घकारप्रत्यये लक्ष्मी शब्दवत् तंद्रीः॥ या मे कतरस्तव विभर्ति गुरुर्वितंडी रितिर घुदर्शनात् स्पष्टा हि ट
हि पत्ति दर्थे निद्रांतं द्राश्रद्राभ्य आलु चूपाणिनि दर्शनात् तंद्रत्यपि। एवं तंद्रिस्तंद्री तंस्तंद्रीति रूपचतुष्कं॥ प्रमी
ले तींद्रियाण्यस्यां गुरो श्चेत्यकारे चापि प्रमीला॥ द्वे अत्यंत श्रमादिना स वेंद्रियाप्रभुत्वस्य। आलस्यस्येत्यन्ये॥ कु
टकौटिल्ये इगुपधात् किन्॥ भ्रुवो कुटिरित्येवं भ्रूकुंसवत्त्वे रूपं एषा इरादित्वाद्धकारे भ्रूकुटीत्यपि एवं रूप
चतुष्कं केचित्वेतद्दृष्टिः स्यादित्यनेन संबध्नंति तथा च भ्रूकुटिर्दृग॥ सोम्या स्यादिति। त्रीणि क्रोधादिना ललाट
संकोचनस्य॥ अदृष्टिरिति विरुद्धा दृष्टिरदृष्टिः असौम्य इति सोमदेवताकत्वात् सौम्यं सुंदरं असौम्यं क्रूरं ए
कं क्रूराया दृष्टेः॥ द्वे इति हृयोः स्वीत्वाख्या नायोसौ जीवत्व निरासस्तरूपभेदा देवस्वं स्वरूपं स्वो भावः स्व
भावः निसर्गः॥ पंच स्वभावस्य॥ अथेति टुवेपृ कंपने॥ गुत्र कंपः भावे घञ् अद्वे कंपस्य॥ अथेति इत्यते तिदुःखमि

द्री

राम
१०

तिकृणु हिंसायां प चाद्यच् ऊ हर्षयतीत्यण् जंतः उद्गतो हर्षो यत्रेति वा उद्धर्षः महोते पूज्यते नेनेति पुसीति घः म
हो ऽदंतः महमसावितिवंधुतयो रितेरिति मि घात् । संतनत्वं च महस्तु उत्सवत्ते जन्मोरित्यनेनानेकार्थं वक्ष्यति । उद्गतो
तिदुःखमित्युद्धवः उत्स्रते सुखमित्युत्सवः पचाद्यजंतो पवोत्सवस्य ॥ स्वर्गो वर्ग इति स्वर्गो प्रधानो वर्गः स्वर्गवर्गः ।
एवं सर्वत्र वर्गसमासो वोद्धव्य इति ॥ नाद्यवर्गविवरणं ॥ अधो भुवनेति अधस्तनं भुवनं चेति अधो भुवनं अ
धोऽव्ययं स्यात् पातालइति त्रिकांडशेषात् अधोपि । पतंत्यत्र पापादिनि पतिति च डिभ्यामालजिपाताल वलेः सद्म
गृहं वलिसद्म रसायाः पृथ्व्यास्तलमधः रसातलं । नागानां लोको भुवनं नागलोकः ॥ अधो लोकफणि भुव
नादयोप्यत्र पंच पातालस्य ॥ अथेति कुं महीं हरतीति हतिरते रज् उद्यमने ऽच् कु हरं कुहविस्मापने इगुपधत्वा
त् कुहः तं राति ग्रहणं करोति आतोऽनुपसर्ग इति के वा । शुष्यत्यनेन शुषेरिषिमदीत्यादिना वाहुलकात्
किरच् तालव्यादि सूर्द्धन्यम ध्यं शुषिरं शुषेरिगुपधः किः शुषिः ऊष शुषीतिर इति वा । वाच्यलिंगं । विवृणोति
विवरं विगतो वरो वारणमत इति वा । विलति भिनत्ति विदारयति विल भेदने इगुपधात्कः विलं ॥ छिद्र भेद

नेऽत्र तश्चौरादिकादेरचिच्छिद्रं॥ छिद्यते शुभ्रवद्धकीतिवा॥ निश्चयेन ग्रथनं भयं यत्रेति व्यथ भयचलनयोः
अधिकरणे ल्युट्। निर्व्यथनं निश्चलमाकाशमत्रेति निर्व्यथनमिति तु कलिंगः॥ रोचते प्रकाशते घः। कुत्वं रो
कमिति लोकाश्रयत्वाल्लिंगस्येति क्लीवत्वमिति सुभूतिः। विरोकं च नासाविरोकपवनाकुलितेतनीय इति
माघः॥ रंधयति हिंसयति रध हिंसासंराद्ध्योः॥ स्फायी तं चेत्यादिना वा डुलकाड् किरंध्रेरणति रंध्रमिति
स्वामी एषोदरादिः रमंतेऽत्र शुभोदय इति रकुधुर्वा वागम इति सर्वधरः॥ शोभनमभ्रमाकाशमत्रेति श्वभ्रं
शोभनवाची शुशब्दस्तालव्यादिपि तथा चोणादिसूत्रे ऽन्येष्वपि दृश्यत इत्यतोऽचा साधयंति श्वानं विभर्ति
मूलविभुजादित्वात्कप्रत्यये श्वभ्रमित्यन्ये श्वभ्रं कम्भीरशिल्यमित्यूष्मविवेकात्तालव्यादि। सुषुञ्च
श्रेदंत्याद्यपीति पंजिका॥ उप्यतेऽत्रा वपेर्भिदादिपाठादङ्। वपा॥ शुष्यत्यनया शुषेरिगुपधात्कित्। सु
षिः वपासाहचर्यात् सुषिः स्त्री कृदिकारात्ङी। सुषुषी दंत्यादिरप्ययं शब्दः। विवराभिधायिनि सुषिरा
दौ शास्वेषु दंत्यतालव्यावित्यूष्मविवेकात्॥ एकादश विवरमात्रस्य॥ गां त्रैनि गिरति पतत्त्वड् वृयं गिर

राम
२०

तेहसिम्भृ इत्यादिना तनि गर्त्तः। गर्त्ता स्त्रियां दावंतापि। शटकुसखर्त्तं कगर्त्तश्रृंगा इति स्त्रीपुंसप्रकरणे
रभसात्। अवंत्यस्मा दवरक्षणे शकादिभ्योऽटन्। अवटोऽस्त्रादिः। अवटिनिर्दंतोपि दर्भेपि पवित्रमवदिरवटे
पीति हलायुधः। भुवि श्वभ्रे यत्सुवभ्रं छिद्रं ततवर्त्तते हेमूरं भुस्य॥ सरंध्रे वंशादौ वस्तुनि सुषिरं ऋष सुषि
सुषेर्क्त्यादिना रः। त्रिषुएकं॥ अंधकार इति अंध दृष्ट्युपघाते चुरादिः। अंधनमंधस्तं करोतीति कर्मण्यण्। अं
धकारः अस्त्रियां। चौरादिनिवारणाय प्रहरिकाणां ध्वननमत्र ध्वांतं क्षुब्धस्वांतेत्यादिना निपातितं। तमो मो
होऽस्त्यत्र धर्मग्राधान्यात् तमस्त्वमेव तमः तद्योगात् तमिस्रं ज्योत्स्ना तमिस्रेत्यादिना निपातितं स्त्रे लिं
गवचनमतंत्रमिति ज्ञीवत्वं। तिम्यतीति तिमिरं शुषिरवत् ताम्यत्यत्र तमुग्लानौ उपधायारत्वे तिकि
रचीत्वे च तिमिरमित्यन्यः। ताम्यत्यनेन अस्मुन् तमः सांतं तमसं तु निशाद्यमर्तित्रिकांडशेषात् तमसम
दंतमपि पंचांधकारस्य॥ ध्वांत इति गाढे तिशायितांधकारे अंधयतीत्यंधं नीयाद्वृत्तिरिति नंदिशावरस्वा
मिनौ। एकं महांधकारस्य॥ क्षीणे तु ध्वांतेऽवहीनं विरलं तमोऽवतमसं पूर्ववद्च् एकं॥ वीतिविष्वक्सर्व
धं। अंधं च तत् तमश्चेति। अवसंमधेल्यस्तमसइत्यचि अंधतमसं अन्येषामपीतिदीर्घत्वे अंधातमसमपि शाकटाय२

तोविसारितमः संतमसं पूर्ववदं चूर्णकं व्यापकतमसः ॥ नागा इत्यादिना गोगिरौ चंदनादितरो वा भवाविद्यमा
नाः शेषेऽण ॥ नागच्छंतीति नागाः न अगा नागाः निषेधवाचिना नञ्शब्देन सुप्सुपेति समासः अनञ्त्वान्न नलो
प इति वा ॥ ऊडं तात्कुडूशह्रात्कश्यपस्त्रीवचन्मदपत्यार्थे सु आदिढकि टेलोपोऽकद्रुह इति टिलोपा
भावेन आर्गुणे काद्रुवेयोः ॥ नराकारस्य फणालांगुलवतो नागस्य ह्वे ॥ कल्यांतेविशिनष्टि अवतिष्ठते भि
ष्लु विशेषणे पचाद्यच् शेषः ॥ देवैरप्यस्यांतो नोपलभ्य इत्यनेनतः ह्वे नागराजस्य ॥ वसुरत्नं के मस्तकेऽस्य व
सुकः अपत्ये ञिवासुकिः ॥ सर्पराजः टच् ॥ अन्ये च तक्षककर्कोटकशंखकुलिकपद्ममहापद्म इत्यादयो
नागराजाः स्युः इह यद्यपि शेषवासुक्योर्भेदस्तथापि गतानुगतिकतया कवयोऽभेदेन प्रयुंजते यथा स्व
मि व भुजंगविशेषं व्युपधाय स्वपितीति यो भुजंगविशेषमिति वृंदावनं वलयायितशेषशायिनः सखिता
मादित्त पीतवाससः इति नैषधे ह्वे वासुकेः ॥ अथेति गोरिव नासिकास्य अ ज्ञासिकाया इत्यादिना अचु
नसादेशः श्च गोनासः श्च ॥ गोनासगोनसाविति त्रिकांडशेषः गोनासाय नियोजिताग्रहराजाइति ज्ञशेखरः ॥

त्रि०

तिलनं तिलिः। इकृष्यादिभ्य इतीक्। तिलिं गलतिं स्यतीति कः। पृषोदरादिः। तिलतिग्वो भवति स्निग्धमूर्तिष्ठत्वात् तिलस्नेहनेति तिल इक् तु क्वेति सप्रत्ययः इटुगागमश्च। तिलित्सः दंत्यांतः द्वे वोड इति विशेषस्य॥ गोनसी मंडली वोड इति तु विक्रमादित्यः॥ अजं छागम पिगिरति पचाद्यचि अजगरः। हृत्नोगनार्थत्वादपि शप्तां प्रयोगः सदाशोत इति। भृमृशीहृवरित्सरीत्यादिना उः शयुः। वहति विषहरामिति वहि धुभ्यां णिदित्यस चूणित्वाद् वृद्धिः वाहसः दंत्यांतः वाहं गतिं स्यतीति स्वामी वीएय जगरस्य॥ अलेति नभ्रूमोलगतिन जिक्किप् अलकू अद्देमस्य फणाधारणे पूर्वार्धस्य भ्रमेरुत्थितत्वात् अलगर्द्धः अलं गृध्यतीति वा पचाद्यचि पृषोदरादित्वान्मलोपः गृध्यति गर्द्धः अचू अरः शीघ्रश्वासो गर्द्धश्चेति रलयोरेकत्वस्मरणादिति तु भद्रः। अलीवगर्द्दतीति तु स्वामी। जलस्थत्वात् जलव्याल द्वे अलाध इति ख्यातस्य॥ राजीरेखा पृष्ठेस्या स्तीति सिध्मादित्वाह्लचि राजिलः। राजते सलिके इत्यनीति वा इलकारोतो पीलचि राजिल इति वा। डुडिनु डिनिमज्जने घञि डुंडुः मज्जनं तेन भातीति आतोऽनुपसर्गे कः कर्तृकरणे कृतेति समासः पृषोदरादित्वात्

डुंडुभशब्दस्याकारस्योकारे डुंडुभ इति । तवर्गान्ततीयादिस्थ । अत एव दोडो दोलश्चेति शाब्दिकनरसिंहः । द्वेबो
डु इति ख्यातस्य ॥ मेति वेरश्चल इति वा कुलकान्म्रियतेरयुण्मावेमरणं मालुः । न हूयति धे इत्यपाने नं
घादित्वात्ल्युः मालुधानः मालेर्धीयते पुष्यते पृषोदरादित्वादुकार इत्यन्यः मालुरोषधिस्तत्र धानम
स्येति तु स्वामी । मातुलनामा हिर्मातुलाहिः । मालुधानश्चित्रसर्पं महापद्मं च दृश्यत इत्युत्पलिनी हे
मालुआ इति ख्यातस्य ॥ कंचुकोऽर्थात्तेन निःशेषेण मुक्तो देहत्वक् निर्मोकः । मुचेः कर्मकर्तृविषय
त्वात्कर्तरि क्तो निर्मुक्तः । मुक्तः कंचुकोऽनेन । इत्यन्त्वचः सर्पस्य ॥ सर्पं इति सर्पं इति सर्पः स्वपेरचू
न्नमिस्पृशनादेहेन सर्पणं गमनं सर्पः । तद्योगात्तु सर्प इति तु कलिंगाः । स्त्रियां जातित्वात्ङीषु सर्पी ।
पर्दते कुत्सितं शब्दं करोतीति पर्दकुत्सिते शब्दे पर्देर्नित् संप्रसारणमल्लोपश्चेति काकुप्रत्यये पृदाकु
रिति सर्वानंदः ॥ पिपर्त्ति स्वपवनेन पिपर्तेर्दीकुईत्वश्चेति दाकुद्भवयोः पृदाकुरिति पंजिका । भुजो
कौटिल्ये भुजंति इगुपधत्वात्कः भुजः कुटिलः सन्गच्छति भुजंगः कुटिलीभवन्गच्छतीवा पृषोदरा

राम
१०७

दित्वात्तलोपे भुजगः डप्रकरणेऽन्यत्रापि दृश्यत इति डः। एवं गमेः खचुक्तव्य इति खचि डित्वाट्टिलोपे भुजंगः।
आहंतीति अहिः आङि हन्तेः आङि श्रिहनिभ्यां ह्रस्वश्चेति नृम च आकारह्रस्वः। गमश्चेति खचि भुजंगमः। ए
वं भुजगो भुजंगो भुजंगम इति त्रैरूप्ये। आशीः सर्पदंष्ट्रा तालव्यमध्या। तत्र विषमस्यां पृषोदरादित्वाद्दीर्घ
सलोपयोः आशीविषः। ईकारान्तेन आशीशब्देन वा समासः। आशीमिव कुलामिंदोरिति राजशेखरः। आ
शीतास्मु गता दंष्ट्रा तया दष्टो न जीवतीति च। विषं धरति शक्तिधरवत् विषधरः। शिरसि चक्रयोगाच्चक्री
नान्तः। विशेषेण लाति ला आदाने आतश्चेति कः डलयोरेकत्वस्मरणात् विशेषेण समन्ताद्डति अउ
द्यमे डचि वा व्याडः। लो नोपि। कुटिलं सर्पति सृपेर्घञ् तादर्थ्ये यञ्जुकिसरीसृपो हिंदंत्यः संसार सारसरी
सृपमस्य सास्ना इति हिंदंत्ये ऊष्मविवेकात्। आसीनस्य कुंडलमिव वपुरस्यास्ति कुंडलीति पूर्ववयं तु कुं
डलमनुकरोतीति कुंडलशब्दात्तत्करोति प्रातिपदिकाद्धात्वर्थे णिजं तात्तु घञ् र्थेके कुंडले कुंडलने कुंडलानु
करणं तद्योगादिनि कुंडलीति ब्रूमहे। गूढाश्चलन्त्याः पादाश्चास्य पृषोदरादित्वादाकारलोपे गूढपात् दृतः पा

दस्य लोप इतीह नास्ति न ञोपमानादित्यनुवृत्तेः शसादावन्वादेशोपदादेशो नामूट पर इत्यादिरूपं प्रथमैकवचने
पि मूढ पद इत्यपीति कौमुदी। सर्पविषये। पृदाना मपि विज्ञेये हृशने हृचविंशती इत्यागमात् संपादत्वं। चक्षुरे
व श्रवः कर्णो ऽस्य चक्षुःश्रवाः सांतः अत एव गोकर्णोपि। काकोदरमिवोदरमस्य ईषदकति कुटिलं गच्छति अके अ
ग कुटिलायां गतौ अचूं ईषदर्थे चेति कादेशे काकं काकमीषत् कुटिलगतिमदुदरमस्य वा। अतिशयिता फणा
स्यास्ति ब्रीह्यादित्वादिनिः फणी। दर्व्याकारत्वात् [illegible]व फणो वहक् इकारादत्त्रिविड़ीषि दर्वी तां करोति जनय
ति दर्वीकरः कृञो हेत्वित्यादिना टः। आ पुच्छायतत्वात् दीर्घं पृष्ठमस्य दीर्घपृष्ठः। दंशे लुप सदेत्यादिय ङ्. ता द्य
ञंजपेत्युकः। पस्य हल इति यलोपे कुत्सितं दशनशीलो दंदशूकः। विले शेते अधिकरणे शेतेरित्यधि शय
वासेत्यादिना ऽलुकि विलेशयः। उरसा गच्छति उ प्रत्ययस लोपो उरगः। खच्चू उरभावो वक्तव्य इति उरंगम इति
पारायणं। पन्नः पतितो गच्छति पन्नं यथा स्यात् तथा गच्छति वा सर्वत्र पन्नयोरुपसंख्यानमिति डः पद्भ्यां न गच्छति पन्न
गः पृषोदरादिरिति कौमुदी। भोगः फणा कायश्च तद्योगाद् भोगी। जिह्मं कुटिलं गच्छति जिह्मगाः भुजगावत्त्पव

नमस्यतीति नंद्यादित्वात् ल्युः पवनाशनः॥ दृष्टिविषकुंभीनसावयत्रापि च विंशतिः सर्पस्य॥ विषमिति अहेर्विषास्थ्या
दि अहेयं त्रिषु अहौ भवमित्यर्थे दृतिकुक्ष्यीत्यादिना ढञ् स्त्रियामाहेयी विषास्थ्यादिना कं चुकादि ग्रहः एकं॥
स्फुटं विकसने चौरादिकात् पचाद्यच् विस्फटाफ युक्तसादिः छषोदरादित्वात् सलोपे फकारादिरपीति स्वामी॥
फटेत्यपि क्वचित् पाठ इति भट्टः॥ फणेति फणा फणगतौ हयोरित्यनेन स्फटाया अपि संबंध इति स्वामी हे फणा
याः॥ समाविति कंचुते कंचिदीप्ति बंधनयोः शमिकमीत्यादिना वाहुल्यादतोप्युकन् कंचुकः॥ निश्चयेन मुच्य
ते कर्मणि घञ् निर्मोकः हे सर्पत्वच॥ क्ष्विडमिति प्राणान्मुंचत्यनेन ञि क्ष्विदा स्नेहन मोचनयोः पुंसि तिघः छषो
दरादित्वा ह्रस्वः क्ष्वेडः॥ गिरतीति गृ निगरणे छषोदरादित्वात् कलच् वा हुलकात् गुणे गरलं वे वेष्टि व्याप्नोति वा विष्लृ
पयोपगते कायं विष्णुव्याप्तौ विषप्रयोगे वा इगुपधज्ञेति के विषम् इन्यातं गरलं विषमं भसि च स्त्रियामति वि
षाया मित्सूक्ष्म विवेकात् पुंसि क्लीवे चेति विषस्त्रि षाव्युक्तौ विषमपि पुंसि क्लीवे चेति भट्टः पंजिका च त्रीणि
विषस्य॥ पुंसीति कार्के लोडाए का कस्त्रहत् कुञ्ज्व वर्णत्वात् काको ईषत् कोलतीति संख्यायतीति ईषदर्थे चेति का

टी.
ए

देशे काकोल इति वा॥ कालं यममपि कूटयतीति कूट परिदाहे चुरादिः कर्मण्यण् कालकूटः कालस्य मृत्योः
कूटो राशिरिव कालकूटमिति तु पंजिका॥ हलमिव आसमंतात् हलति आङ्पूर्वो हल विलेखने पचाद्यचु ह
ला हलः केवलाद्धलधातोर्हलपूर्वादपि प्रज्ञाद्यणि हालहलोपीति त्रैरूप्यं तथा च हालाहलं हलहलं वदंत्यपि हा
लाहलमिति द्विरूपकोषः॥ गौना सगानसो हालाहलं हालहलं विषमिति त्रिकांडशेषः॥ काकोलादय स्त्रयः शु
सिङ्गी वेच वर्तंत इत्यर्थः॥ सारोष्टो देशभेदस्तत्र भव इत्यध्यात्मादित्वाट्ठञि सारोष्ट्रिकः देन्यादिः सुराष्ट्रशब्दा
त् सौराष्ट्रिक इति तु स्वामी॥ शुल्वि देशभवः हृति कुश्चीति योगविभागात् ठञि शौल्विकेयस्तालव्यादिः॥ ब्रह्म
णः पुत्रो ब्रह्मपुत्रः तथा च याज्ञवल्क्यः त्वविषब्रह्मणः पुत्र इति प्रकर्षेण दीपयति दीपी दीप्तौ नंद्यादित्वात्
ल्युः प्रदीपनः तदुक्तं ब्रह्मपुत्रस्तु कपिलो मलयाद्रिभवः॥ प्रदीपनस्तु दहनो रक्तवर्णोऽजनाद्रिज इति॥ दरद
देशभवो दारदः प्रायेण वत्सान् नाभि हिनस्तीति णभ हिंसायां कर्मण्यण् वत्सस्य नाभिरिव अग्रे च प्रत्यग्र पू
र्वादिति योगविभागादचि वा वत्सनाभः अयं च सिंधुवार पत्रसदृश पत्रः तेन वषटूरूप ने दातर्पुसिएषां स्वरू

का
राम
१०

स्वरः २

पाणिग्रंथविस्तरभयान्नोक्तानि नवैतानि स्थावरविषभेदस्य प्रत्येकं ॥ विषेति विषविद्यामधीते वे-
त्ति वा तदधीत इत्यण् उत्तरपदस्य लक्षणत्वादप्युत्तरपदहृद्धिः विषवैद्यः जांगुलं विषं तद्योगाद्-
योपि तया तदधीते तद्वेदेत्यर्थे वसंतादित्वाट्ठक्ष्यौ दित्वाद्वा ठकि जांगुलिकः वर्ग्यादिः जांगुली
[illegible] विषं [illegible] विद्याविषघ्नो मंत्रः ॥ यथा ॥ परीक्षितं समस्त्रायाज्जां-
गुलीभिर्भिषग्वृत इति ॥ तां वेत्त्यधीते वा पूर्ववत् ठक् ॥ तयादीव्यतीति तेन दीव्यतीत्यादिना ठगिति तु
पंजिका ॥ हे गारुडिकस्य ॥ व्यालं गृह्णाति नंदिग्रहीत्यादिना णिनिः व्यालग्राही ॥ अहेः सर्पस्य तुंडं
मुखं तेन दीव्यतीत्यर्थे तेन दीव्यतीत्यादिना ठकि संज्ञापूर्वकत्वाद्वृद्ध्यभावे यो धयतोः हेस्तुंडम-
स्याय तत्त्वे नास्तीत्यनुइनि ठना वि तिग निवा आहितुंडिकोदृस्वादिः तथा च व्यालग्राहो ॥ हितुंडिक
इत्यमरमाला ॥ करोति कनि विषमाहितुंडिक इति दर्शनाद्दीर्घादिरपीति सर्वानंदः ॥ द्विरूपकोषपि
द्वेभिद्रार्थे सर्पखेलस्य ॥ पाताल भोगिवर्गो ॥ स्यादिति नरक एव नारकः प्रज्ञादाण् ॥ अन्येषामपि

हृष्यनइतिदीर्घत्वेनारकः।नरतीतिनृनयेऋकृञादिभ्यःसंज्ञायांवुन्नरकःनराःकायंत्यत्रमूलविभु
ञादित्वात्केनरकइतितुस्वामी।निर्गतोऽयास्तुभावहविशेषेनिरयः।दुःखेनगानिरस्यांदुर्गतिःस्त्री।
चत्वारिनरकस्य।तद्भेदानरकभेदाः।तपतीतितपनःनंघादिः।वीचिःस्वल्पतरंगेस्यादवकाशे
सुखेपिचेतिविश्वः।नास्तिवीचिःसुखमत्रावीचिर्ईखादिःपुंलिंगः।तपनादिसाहचर्यात्अवीचिं
गाहंतेहुतवहशिखापूरितमपीतिशिल्पलेखइतिसर्वधरःस्वामीपंक्तिकाच।महान्रौद्रोरवोत्र
महारौरवःपृषोदरादिः।एवंरौद्रोरवोत्ररौरवः।संघातयंत्यत्रसंघातोहननमत्रवासंघातः।कवर्गम
ध्यःसंहारइतिचेत्यन्ये।कल्पयंत्यनेनकलसंख्यानेएण्यनादेरचुकालश्चतत्सूत्रंचेतिकालसू
त्रेणसंसूच्यकत्वेनदारुवत्पाट्यंतेयत्रतत्कालसूत्रंकालाख्ययोमयानिसूत्राण्यत्रेतितुस्वा
मी।आद्येनप्रगर्जनप्रकस्पनशाल्मलीनभूवालुकप्रतापनासिपत्रादीनांग्रहणंनरकभेदा
नांष्टयकृष्टयकु।नरकस्थाःसत्त्वाजंतवःशेषेऽणभवार्थेवानारकाः।प्रकर्षेणइतागताःप्रेताः

एकं नरकस्थप्राणिनां ॥ विरुद्धं तरणं नद्यस्याः अस्ति ज्योत्स्नादित्वादण् । वैतरणी वितरणेन दानेन नीयते शेषकृत्य
णि वैतरणीत्यन्ये वितरणेर्विसृष्टे पाताले भवा अण् । वैतरणी वितरणिर्विनौका तनतः प्रज्ञाद्यणिति सुस्वामी राम
दासेन तु वैतरणिरिति ह्रस्वान्तोऽप्युत्पन्न एष शब्दो दर्शितः ॥ सिंधुनदी तथा च त्रिकांडशेषः नारकाज्जन्तवः प्रेतान
दी वैतरणी स्मृतेति एकं नरकनद्याः ॥ स्यादिति विरुद्धा लक्ष्मीरलक्ष्मीः ॥ निश्चितमर्यते कर्मणि क्तिन् निर्ऋतिः नि
श्चिता ऋतिः पीडात्र निर्ऋतिरिति तु पंजिका ऋतिर्गतौ घृणायां च स्पर्द्धायां च शुभे पि चेति रभसः निर्गता ऋतेः
शुभान्निर्ऋतिरिति वा ॥ द्वे अलक्ष्म्याः ॥ विष्टिरिति वेतनेन विमुच्यतेऽनेन विष्लृ विप्रयोगे करणे क्तिन् विष्टिः । आ
जायते आङ्पूर्वाज्जनेर्भ्रमेश्च ड इति वा हुल्लकादेनोपि डः आजूः दीर्घीता आजो रूनी जीर्णं इतः क्विप् वीति क्वि
प् आजूरे फांतापि पंजिका स्वामी चा द्वे स्त्रियौ ॥ द्वे वेतनेन विना कर्मकरणे वेगइ इति ख्याते भइ स्वामि निहगद
भृतिकः क्लेशो विष्टिराजूश्चेति । जातरूपश्च । दुःखहेतुत्वादस्य दुःखप्रकरणे निबंधः ॥ भ दुनाम्नः करस्य एते द्वे इ
त्येके ॥ कृच्छ्रं हिंसायां यतनि कारोपस्कारयोरित्येताभ्यां एयं ताभ्यां एयासेति सुचि कारणा यातना च विद वेदनाख्या

११०

ननिवासनेष्विति त्येन तस्य पूर्ववद्घुचि तीव्रवेदना अर्थकथनमेतदित्येकेन त्मते द्विनाम्नी त्रीणि गाढवेदनायाः। पीडे
ति पीडनं पीडा पीड अवगाहन इत्यतश्चौरादिका घुचि प्राप्ते भिदादिपाठादङ्। बाधेति बाधृ विलोडने गुरोश्च
हल इत्यकारः आङ्पूर्वोपि दृश्यते आबाधा वेदना दुःखमिति हलायुधः। व्यथते घटादयः षित इति षित्वाति
देशात् षिद्भिदादिभ्योऽङ्। व्यथा। दुर्निन्दितं खनतीत्यन्येभ्योपि दृश्यत इति डः। इदुदुपधस्येति षत्वमिति धा
तुपारायणं। जिनेन्द्रबुद्धिरक्षिताद्त्पसंतादित्यत्र दुःखवेन दुःखवानामित्यत्र प्रतिषेधमाह। सुखदुःखतत्क्रि
यायामिति चौरादिकात् पचाद्यचि वा सविसर्गं दुःखमिति तु चान्द्राः। कालापाश्च। कालेन तडिल्लताजालमे
घमंडलमंडिते। कांतः सर्वगुणोपेतो बालेन्दुः खेन लभ्यत इति प्रयोगश्च दृश्यते। मानसाय हितं मानसे सा
धु वा उगवादित्वाद्यत् मानस्यं न मानस्यमसुमानस्यमिति दृष्ट्वाद्धि प्रसूतिजम मानस्यं कृच्छ्रं कष्टं कल्पाक
लमिति वाचस्पतिः। अन्येषामपीति दीर्घत्वे आमानस्यं द्विदीर्घमपीति सुभूतिः। प्रसूतेः कृतं प्रत्ययेन जातं प्र
सूतिजं पूर्ववत् डः। कष्टमिति कष्यति कष हिंसायां क्तः। कृच्छ्रं गहनयोः कष इतीड्भावः। कृन्तन्तीति कृच्छ्रं

राम
२२२

दनेकृतेऽस्थ्नि चेति रकृच्छ्रस्थ्नां तादेशः कृच्छ्रं। इलखप्रे अभिपूर्वः इगुपधेतिकः अन्येषामपीति दीर्घः आभी
लमिति सर्वधरः आ समंताज्जियं लातीत्याभीलमिति तु स्वामी। एषां मध्ये यज्ञेद्याणामिदुःखगामितत् त्रिषु।
कष्टा सेवा कष्टोऽग्निः कष्टं व्याकरणं न बदुःखस्य॥ नरकवर्गविवरणं॥ सेनि चंद्रोदये आपः सम्यग्गुंदति क्लि
द्यंत्यत्र उंदी क्लेदने स्फायीतिरक् समुद्रः उक्तं च वायुपुराणे अपां वै वसमुदेन स समुद्र इति स्मृतः इति मु
द्रामर्यादा तया सह वर्त्तत इति तु पंजिकासम्यगुद्रुतोरोऽग्निरत्रेति कौमुदी मुदं रातिददाति कप्रत्यये मुद्रा णि
रत्नादीनि तैः सह वर्त्तत इति वा आपो धीयंते अत्र कर्मण्यधिकरणे चेति किः अब्धिः। अकुत्सितं पारमस्य अकू
पारः अन्येषामपीति दीर्घः न कुं पृथ्वीं पिपर्त्ति पूरयति मर्यादापालनादित्यकूपार इति स्वामी अविद्यमाना कुः
पृथ्वी पारेऽस्येति त्वन्ये न कुं पृथ्वीं वृणोति अणि पूर्ववद्दीर्घत्वं अकूवार इत्यन्ये। पारमावृणोति कर्मण्यण्
पारावारः पारावारावस्य स्त इत्यचि वा पारमपांनराति ददत्त इति एषोदरादित्वे पारापारः पवर्गादिमध्यः तया
च हरिप्रबोधे संदृष्टयमकं। सततमाःसनमालतया पारापारास्तः सदारोदारः। लोकालोकान्तकृत्तिः सह्य स

८२

मनभ्रकूटैरितिसर्वानंदः पंजिकाच।पारमपारमस्यपारापारइत्यन्ये।सरितांनदीनांपतिःसरित्पतिः।उद
कानिसंत्यत्र उंन्वा तुदधौ चेतिनिपातनादुदन्वान्‌तांतः।उदकानिधीयंतेऽत्रेतिपूर्ववत्‌किः।पेषंवासवाह
नधिषु चेत्युदकस्य उदादेशः।असंज्ञायामप्युदादेश उदधिर्घट इत्यपीतिभद्रः।स्यंदतेऽत्रापोऽत्रेतिस्यंदेः
संप्रसारणंधश्चेति उप्रत्यये सिंधुः।सरोनीरेतडागे चेतिरूढः।तद्योगाद्रूढिमनुपूतसौमत्वर्थइतिभसंज्ञा
नपदकार्यसरस्वान्‌।गर्भस्थेनएतन्मात्रेसपत्न्यागरोदत्तः।ततोगरेणसहसद्योजातत्वात्सगरः।सगरे
णखनितत्वान्नस्येदमित्यण्सागरः।क्षीरोदादिषण्णुपमया सागरस्यपदेशाइतिभद्रः।अर्णास्यत्र सं
तीति अर्णसोलोपश्चेतिवः।सलोपश्च अर्णवः।रत्नानामाकरउत्पत्तिस्थानं रत्नाकरः।जलनिधिरुदधि
वत्पर्यायग्रहणात्‌जलधिपयोनिध्यादयः।जलनिधेश्चान्योपसर्गनिवृत्त्यर्थमुपादानं।यादसांजलजं
तूनांपतिःयादःपतिः।अपांपतिःबहुलग्रहणात्षष्ठ्या अलुक्‌वाक्येनैवनामेतिसर्ववरः।मकरालय
वारिराशिगंगाधवोर्मिमालो दुजनकादयोथत्रैव।पंचदशसमुद्रस्य।।तस्येतितस्यसमुद्रस्यप्रभेदाः

राम
२१२

पयोधि२

कारः उत्तरपदस्य चेत्युदादेशे क्षीरोदः। एवं लवणोदः। अथापर इति तथा शब्दः समुच्चये चकारे वा। अपर इ-
ति पंच तदुक्तं क्षारोदेक्षुरसोदौ च सुरोदश्च घृतोदधिः। दध्युदः क्षीरपूर्णश्च स्वादूदः सप्तमः स्मृत इति समुद्रवि-
शेषाणां पृथक् पृथक्॥ आप इति अप्नुवंति व्याप्नुवंतीति आप्नोतेः क्विप् ह्रस्वश्चेति क्विप् ह्रस्वत्वं च अप्नुवादिसूत्रेण
दीर्घः आपः स्त्रियां बहुत्वे अप्शब्दः आप्नोतेरसुनि आपः क्लीवं सांतं च आपोभिर्मार्जनं कृत्वेति स्मृतेः कबं-
धमुदकमापो नीरवार्वारिनारं क्लीवमपि ससारावन्तीदः। निम्नोन्नतं वारयतीति वृञो एयंतात् क्विपूर्वाः रेफां-
तं परेण साहचर्यात् क्लीवमिति कौमुद्यादयः रूपं च वाः वारी वारि इति। प्रयोगश्च वारिपतंतिनदंतिमयूरा
इति पूर्वघटकपरः पूर्वेण साहचर्यात् स्त्रीत्वं वार इति तु कलिंगः पूर्वेत्तिरसाहचर्यात् स्त्रीक्लीवयोर्वारि इति तु
पंजिका॥ निम्नोन्नतं वारयति वृञो एयंतात् वसिवपियजिराजिव्रजिसदिहनिवाशिवदिवारिभ्य इञ् वारि
क्लीवं। सलति निम्नमिति सल गतौ सलिकलीत्यादिना इलच् अनिलवत् सलिलं दंत्यादिरलयोरेकत्व-
स्मरणात् सरिलं सलिरं सलिलमिति वाचस्पतिः। काम्यत इति कम्यु कांतौ वृषादित्वात् कलं चूकमलं क

टी॰

मल्लमित्यखंडमेवज्जलनामनतुकंअलमितिद्वेनाम्नीकमलाश्रीर्जलंपद्मंकमलंकमलोमृगइतिधरण्या
दिदर्शनात्माजलयतिअंतर्गतंवस्तुपवारयतिजल अपवारणेचुरादिस्ततःपचाद्यचिजलमितिसर्वानं
दःजडत्वाज्जलंडलयोरैक्याज्जलमितितुकलिंगःजडंचसजडात्मापदुर्भवानितिदंडी।पीयतइतिपीयते
रच्चेत्यसुनिपीडेऽसुनिवापयः।कील्यतइतिकीलबंधेतमिविद्विरसित्यादिनाकालन्नबाहुलकात्कीले
रपिकीलालं।अमृतमुक्तं।जीव्यतेऽनेनेतिकरणेल्युइजीवनं।भवंत्यस्मादितिभूर्भूस्त्भ्रमस्त्रिभ्यश्छंदसी
तिवाडूलकाद्भाघायामपिक्वुनिभुवनं।वनतिसंभजतेवनसंभक्तौपचाद्यचूवनंवन्यतइतिवनुयाचने
भुवनवद्वाडूलकात्क्वुनिअनुदात्तोपदेशेत्यादिनानलोपेवनमित्युक्तलदत्तः।कंशरीरंबध्नातीति
कर्मण्यण्।कबंधं।वासवदत्तायां समरंसिनृत्यत्कबंधे।माघेचचलितोद्धतकबंधसंपदइतिप्रयोगात्कबं
धमित्यखंडनाम।कं अंधमितिनामद्वयमित्येकेमकारमध्यंकमंधमित्यपरे।उदतीत्युदकमित्युणादिनिपात राम
नंउदकसमानार्थउदशब्दोस्ति।तथाचअसंज्ञायामसत्त्वोदंप्रसत्त्वोदमितिकज्जवः।पीयतइतिउदकेष्वकूचे ११२

सर७

त्यमुनूपाथः। पुष्करं मेघे उक्तं। समविषमचलनात्सर्वतोमुखत्वान्यस्येति सर्वतोमुखं। अमति अमगतौ अमेर्मुक्ते
त्यसुन्मुगागमश्चांभः। ऋच्छतीति ऋगतौ उदकेन्नुट् चेत्यसुन्नुडागमश्च अर्णः। तायते पालयतीति तायृपा
लनेः पचाद्यच् विष्टषोदरादित्वादोकारे सति तोयं। पीयत इति पिबतेरनीयर् पानीयं। नीर्त्ते इरगतौ मि पूर्वादिगुपधे
तिके नीयतेः स्फायीतिरकि वा नीरं निष्क्रमीर्त्ते इति नीरं पृषोदरादिर्वा निर्गतं उदकं तोयोऽस्मादिति वा। ह्रलोपर
तिदीर्घेण नीरमिति तु स्वामी। क्षयति क्षि निवासगत्योः सुसिचिक्षिम्यादीर्घश्चेति रक् दीर्घत्वं च क्षीरं। अंबते
रवित्र्य विलविस्रंसने अम्र्हमृशीत्युचरित्सयादिना वाकूलकादतोणुः अंबु। संवृणोतीति संवृ संवरणे शंवच अ
प्यां अकेरर न्निति वा कुलकादरन् संवरं दंत्यादितालव्यादिश्चेति सर्वधरः पंजिका च। मिघात् तुष्यात् ति पुष्पवि
कसने पचाद्यच् मेघस्य पुष्पमिवेति वा मेघपुष्पं। घनस्य रसः घनरसः। पुंस्त्वं प्रमादादिति कलिंगाः तथा चत्रि
पुरुष पिशंवरपिप्पलकुशाकमलकांडविषवनपयांसि। घनरसमंबु क्षीरं घृतममृतं जीवनं भुवनमिति रत्नको
षस्तद्युक्तं पुंलिंगः स्यात् घनरसः सांद्रनिर्यासनीरयोरिति रभसात्। अंभोर्णस्तोयनीरं च नारं घनरसः शुमानिति

टी.

शट्यार्णवाब्धे। इराशरउडुहू पीटकं दवा द्यास्त्वा नैव॥ ॥सप्तविंशतिर्जलस्य॥ ॥त्रीति आप्यमितिसाधनेलक्ष
णभावः चंद्रगोमीत्वाप्यश्चेति विकारावयवयोर्यत्रा निपातितवान् पाणिनिंतं त्रेन्तुतद्धिता इति बहुवचनमनुक्त
तद्धितग्रहणार्थमितिनियोरेवार्थयोर्यञि आप्यं तथा च प्रयोगः वर्षद्भिरनिशंमेघैर्जलदाप्यमिवाभवदितिखा
मीस्त्रियामाप्या। अम्मयमितिनित्यमेकाचइतिमयट् यद्वासम्म्हवचेतिमयट् तत्रजलवद्भुलेपिवर्त्तते स्त्रि
यांत्वम्मयीशरादित्वान्मयडितितुकलिंगः द्वेजलविकारस्यफेनादेः॥ भंगइतिभज्यतेकूलमनेनभञ्जो आ
मर्दनेघञि कुत्वेभंगः॥ तरन्तूर्ड्ड तिर्यक्कवप्लवतेतरंगः त्हप्लवनतरणयोः ज्ञादिभ्यश्चेति अंगच् आङ्ल्तूर्ड्ड
तिर्यक्कचगातो अर्त्तेरूकूचेतिमिप्रत्ययः धातोरूकूचेति ऊर्मिर्दीर्घादिः ऊर्मिर्वास्त्रियामितियोजनात्तथा च
वामनः पुंलिंगस्त्रीलिंगयोर्वीचिमणिषष्टिमुष्टयोऽन्यानिन्तुटिशामिपाटलिशाल्मलितरणिश्रेणुर्मयोवस्ति
श्चेति। वातीति वा गतिगंधनयोः वातेःकिदितिवीचिः कित्वादाकारलोपेवीचिः विस्मयंचिनोतीतिवीचिः पृषोद
रादिनित्यन्ये। स्त्रियामितिऊर्मिर्वेत्यनेनवीचिरित्यनेनापिकाकाक्षिवत्संबध्यतेतेनवीचिर्नित्यंस्त्रीतिस्वामी

राम
११४

पंजिकादौ तु वा स्त्रियामिति ऊर्मिवीचिभ्यां संबध्यते तेनोर्मी वीची स्त्रियां पुंसि वर्त्तेते ऊदिकारादिति ऊर्मिवीची
चालहरी वात्रैव चत्वारि स्वल्पतरंगस्य ॥ अथेति रोडयति उन्मादयति जलं उत्पूर्वात्तरोड लोड उन्मादने इत्य
तः पचाद्यच् उडलयोरेकत्वस्मरणात् लत्वं उल्लोलः लोलयतीति लोलः पचाद्यच् उद्गतश्चासौ लोलश्चेति उल्लो
ल इति स्वामी। कल्लोल उल्लोलः शब्दे वा डुलन्तकादृत्तो पोल चूक ल्लोलः द्वे महातरंगस्य ॥ चक्रवत्पांभ्रमणमावर्त्तः
आङ्पूर्वो वृतेर्भावे घञ् एकं चक्राकारभ्रमस्य ॥ पृषतीति पर्षति सिंचति पृषु वृषु सेचने पृषद्वृहन्महज्जग
च्छतृवदित्यतिदेशात्। पृषंतीति वद्भूत्वं तान्तत्वाभिव्यक्त्यै नदस्त्रोधाडुत्तरन्नापीति स्वाम्यादयः ननु वद्भू
त्वमतं त्वं पृषन्मृगे पुमान् विंदौ नद्वयोः पृषतोपि नेति मेदिनीकरादिदर्शनात् पृषंति विंदु पृषता इति त्रिमि
र्द्वि इत्यन्ये तथा च पयः पृषंतिभिः स्पृष्टा वांति वाताः शनैः शनैरिति जां वती विजयकाव्ये। अभ्रात्स्त्रि हि
त्रप्य स्ति पुंसि ह निक्ति दिवं विमनिम्य स्त्रे नि च कारात् द्वि दिं अवयवे आनोपुः विंदुः। पृषता इति पृषु वृषु
सेचने पृषिरंजिभ्यां किदित्यतच् किच्च विंदवः पृषता स्त्रेति विंदु पृषताः ॥ विप्रुष इति प्रुषप्लुषस्नेहनसे

चनहरणेषु संभ्रमादित्वात् द्विपूर्वबहुवचनपूर्वाऽनुरोधात् षांतत्वाभियुक्तायेवाचत्वारिः जनकाणस्य अन्यकर्णेनापचारात्॥ वेनिवंचंतिकुटिलीभवंतिवक्रकौटिल्ये स्फायीतिरक्न्यंक्ताादीनां चेतिकुत्वंवक्राणि
खंटसंश्लिष्टभिंदंतीतिपुष्पभेदाः कर्मण्यण् एरघुटसंश्लेषणेहेनघावांकेतिख्यातस्य॥ भ्रमंतिजलान्यनेनेति
घञिघंवा भ्रमाः जलानिनिर्गच्छंत्येभिरितिग्रहवृद्दृहर इत्यादिना अपूजलनिर्गमाः सर्वत्रबहुत्वमफलंपूर्वा
नुरोधात् कृतमितिपंजिका। द्वेप्राकारेष्टहादिभित्तौ च जलनिस्सरणजालकस्य। तथा च माघः पूगकृता
नियत्र भ्रमागनैरं बुभुराशिरिति॥ कूलमितिकूलं। रुणद्धीति अमुनिरोधः अदंतोपिरोधः प्रोक्तः श्वरो
धसीतिसंसारावर्तात् नीयते रणकर्मसमाप्यते। नेनात्रवापारतीरकर्मसमाप्तोचुरादिण्यंतादेरचूतीरं
।प्रतीरमित्यन्योपसर्गनिवृत्त्यर्थं। तटतित्रुख्यांगच्छतितटगच्छायेपचाद्यच् तटेत्रिषुस्त्रियां तटी दुंसित
टःपिचकूलस्य॥ पारेतिपारंतीरमर्वाकूतीरमपारंपार्यते क्रियासमाप्यतेत्रपारतीरकर्मसमाप्तोचुरादित्वा राम
देरचिपारं। अवार्यतेगम्यतइदं अवपूर्वोवृस्तेघंजि अवारं अर्द्धर्चादित्वान्नद्वावव्ययस्त्रियामितिस्वामीयथात्र ११५

कूलयतीतिकूलसंवरणपशाद्यच्॥ ५

मंपरकूलावरकूलयोर्द्वे ॥ [illegible] ॥ तयोः पारावारयोरंतरं मध्यं पात्रं पिबंत्यनेनेति पा पाने सर्वधातुभ्यष्ट्रन्निती
घोसचार्याणामिति द्वित्वनिषेधः पात्यस्मात् पानेष्टुन्निवा एकं पात्रं इति ख्यातस्य ॥ द्वीप इति वारिणोन्तर्म
ध्ये यत्तटं स्थानं तत्र द्विर्गता आपोऽस्मिन्निति द्वीपः ॥ अंतर्गता आपोऽस्मिन्नित्यंतरीपं ऋक्पूरित्यादिना ।
चूसमासांते च द्व्यंतरुपसर्गेभ्योऽप ईदिति अपशब्दस्यादेरीत्वेन च साधिते । अ स्त्रियामिति काकाद्विव
